लघु-ग्रन्थमाला

[१९]

श्रीदीपकघोषविरचितः

अभावविमर्शः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

LAGHU-GRANTHAMĀLĀ

[Vol. 39]

ABHĀVAVIMARŚA

BY

DĪPAKA GHOṢA

WITH A FOREWORD

BY

GAURINATH SASTRI

VARANASI

1984

Published by—
Director, Research Institute,
Sampurnanand Sanskrit University
Varanasi.

Available at—
Sales Department,
Sampurnanand Sanskrit University
Varanasi-221002.

First Edition : 500 Copies
Price Rs. 16-00

Printed by—
Tara Printing Works
Kamachha, Varanasi

लघु-ग्रन्थमाला

[३९]

श्रीदीपकघोषविरचितः

अभावविमर्शः

प्रस्तावनाकारः

श्रीगौरीनाथशास्त्री

वाराणस्याम्

२०४० तमे वैक्रमाब्दे १९०५ तमे शकाब्दे १९८४ तमे खैस्ताब्दे

प्रकाशकः—
अनुसन्धानसंस्थाननिदेशकः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी ।

प्राप्तिस्थानम् :—
विक्रयविभागः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी-२२१००२ ।

प्रथमं संस्करणम्, ५०० प्रतिरूपाणि
मूल्यम्—१६ = ०० रूप्यकाणि

मुद्रकः—
तारा प्रिंटिंग वर्क्स,
कमच्छा, वाराणसी ।

प्रस्तावना

यथा महर्षिगौतमप्रणीतन्यायशास्त्रस्यादिमं सूत्रं प्रमाणादिपदार्थानां तत्त्वज्ञानान्निःश्रेयसाधिगम इति पदार्थनिरूपणं दुःखपङ्कनिमग्नस्य जागतो निःश्रेयससिद्धये प्रावर्तिष्ट, तथा द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसमिति सूत्रयन् भगवान् कणादोऽपि स्वशास्त्रस्य निःश्रेयसमेव प्रयोजनमिति स्पष्टमाचष्टे। उभयोरपि समानतन्त्रत्वं भाष्यकारैः न्यायभाष्ये तत्र तत्र व्यवह्रियते च। अत्र पदार्थनिरूपणप्राधान्यं न्याये तु उद्देशो लक्षणं परीक्षा इति वदता परीक्षाप्राधान्यं सभासु प्रतिपक्षनिरासपूर्वकं वैदिकमतसंरक्षणस्य प्राधान्यम्। अत एव तत्रभवान् श्रीजयन्तभट्टो वेदप्रामाण्यदृढीकरणं न्यायशास्त्रं विना न सेत्स्यति। तदेव चात्र विस्तरेण निर्वर्त्यते इति साटोपं जगाद।

यद्यपि पदार्थोद्देशसूत्रे षडेव पदार्था गण्यन्ते समवायान्ताः; तथापि तत्रभवान् कणादः स्वशास्त्रे अन्यत्र चाभावं व्यवहरन् अभावस्य सप्तमपदार्थत्वं मन्यत एव, प्रतियोगिनिरूपणाधीनत्वात्तु न द्रव्यादिभिस्सह प्रोक्तवानिति गम्यत इति टीकाकृतामुदयनाचार्याणां वचनात्।

अभावं लक्षयन् उदयनाचार्यो लक्षणावल्यां नञर्थविषयप्रत्ययविषयोऽभाव इत्याह। यद्यपि घटाभावो नास्तीत्यादिप्रत्ययस्य विषयो घटरूपो भाव एव, तथापि अभावाभावोऽतिरिक्त एव तृतीयाभावस्य प्रथमाभावरूपत्वान्नानवस्थेति मताभिप्रायेणेदमुक्तम्। प्रागभावलक्षणं च उत्तरैकावधिरभावः प्रागभाव इत्याह, ध्वंसप्रतियोगित्वे सति अभावत्वमिति तदर्थः।

न च ध्वंसलक्षणे पूर्वैकावधिरभाव इति लक्षितप्रागभावप्रतियोगित्वरूपजन्यत्वनिवेशनेन अन्योन्याश्रय इति वाच्यम्, ध्वंसत्वं कालिकसम्बन्धानुयोगित्वमिति लक्षणाभ्युपगमात् प्रागभावत्वं तु ध्वंसप्रतियोगित्वे सति अभावत्वमेव अन्योन्याभावविषये तार्किकेषु विप्रतिपत्तिर्विद्यते। केचन पृथक्त्वगुणमभ्युपगम्यान्योन्याभावं निराकुर्वते। अन्योन्याभावं परित्यज्य पृथक्त्वमात्राङ्गीकारे एतद्रूपं एतद्घटात् पृथगिति प्रत्ययानुपपत्तेः रूपे गुणे पृथक्त्वगुणाभावात्। सामानाधिकरण्यसम्बन्धेन रूपरसयोः एकत्रसत्त्ववत् पृथक्त्वरूपयोः सामानाधिकरण्याद् रूपे घटगतपृथक्त्वं भासते इत्युच्येत यदि, तदा एतद्रूपमेतद्रूपात् पृथगित्यपि प्रयोगापत्तिः सामानाधिकरण्येन पृथक्त्वसत्त्वात्। अतोऽन्योन्याभावमङ्गीकृत्य उक्तप्रयोगाणां पृथक्शब्दस्यान्योन्याभावलक्षणाया उपपादनमेव ज्यायः, इति दिनकरः।

मुक्तावलीकारास्तु पृथक्त्वान्योन्याभावयोरभेदे घटात्पृथगितिवत् 'घटो न' इत्यत्रापि पञ्चमीप्रसङ्गादित्याहुः। इदं तु तत्तद्विभक्तेः तत्तत्पदप्रयोगनिमित्तत्व-कल्पनयोपपद्यते।

नव्यास्तु अन्योन्याभाव एव पृथक्त्वम्, न तु गुणान्तरम्। न च घटः पटो नेत्यत्र पञ्चम्यापत्तिः, तस्य अन्यारादितरर्ते इति सूत्रेणान्यादिपदप्रयोग एव साधुत्वात्। नञस्तु अन्योन्याभाव एवार्थः, न तु तद्विशिष्टो नञर्थभेदस्यानुयोगितासम्बन्धेनान्वयादेव तत्सिद्धेः निपातत्वात्तस्य इत्यादिना दोषनिस्तारादित्याहुः।

त्रयाणां प्रागभावध्वंसात्यन्ताभावानां संसर्गाभाव इति नाम। तत्र ध्वंसस्य पूर्वकालावच्छिन्नप्रतियोगिताकत्वं प्रागभावस्योत्तरकालावच्छिन्नप्रतियोगिकत्वं प्राचीनै-रुक्तम्, तत्पक्षे सर्वेषां संसर्गावच्छिन्नप्रतियोगिताकत्वं सूपपादम्। तदनङ्गीकारपक्षे संसर्गपदं संसर्गपदपूर्वकपरं तस्याभेदेनाभावपदार्थेऽन्वयात् त्रयाणां संसर्गाभावपद-बोध्यत्वोपपत्तिः। अन्योन्याभाव एव भेदो नातिरिक्तः। अत्यन्ताभावस्तु सामान्य-धर्मावच्छिन्नप्रतियोगिताकः सामान्याभावः। सामान्यधर्मव्याप्यतत्तद्धर्मविशेषावच्छिन्न-प्रतियोगिताको विशेषाभावः। तयोर्भेद एव यत्किञ्चिद्घटाभावे सत्यपि घटो नास्तीत्यप्रतीतेः।

अत्र च विशेषधर्मावच्छिन्नप्रतियोगितानिरूपकाभावेषु सर्वेषु सामान्यधर्मावच्छिन्न-प्रतियोगिताकत्वस्य व्यासज्यवृत्तित्वाभ्युपगमादेवातिप्रसंगवारणसम्भवाद् न सामान्य-धर्मावच्छिन्नप्रतियोगिताकाभावोऽतिरिक्तोऽङ्गीकरणीय इति श्रीमधुसूदनसरस्वत्य आहुः। विचारितश्चायं पक्षस्तत्त्वचिन्तामणौ सामान्याभावप्रकरणे। एकसत्त्वेऽपि द्वयं नास्तीति प्रतीतेरुभयाभावः प्रत्येकादन्यः। संयोगादिसम्बन्धावच्छिन्नाभावा अवच्छेदक-सम्बन्धभेदाद् भिन्ना एव। एवं पूर्वक्षणवृत्तित्वविशिष्टवह्न्यभावोऽप्यतिरिक्त एव केवलसत्वेऽपि विशिष्टं नास्तीति प्रतीतेरिति न्यायमतम्।

अद्वैतसिद्धिकारास्तु अभावस्य सम्बन्धावच्छिन्नप्रतियोगिताकत्वं नाभ्युपेयम्, संयोगेन घटवति देशे समवायेन घटाभावो घटसमवायाभावविषयकत्वेनोपपद्यते; अन्यथा सम्बन्धभेदेनाभावभेदकल्पनागौरवात्। एवं संयोगतदभावयोर्न समानाधिकरणत्वम्। मूले वृक्षः कपिसंयोगी, नाग्रे इत्येतादृशप्रतीतिः मूलाग्रयोरेव संयोगाभावविषयिणी, न वृक्षे।

व्यधिकरणधर्मावच्छिन्नप्रतियोगितास्वीकारात् संयोगेन रूपं नास्तीति प्रतीतौ रूपीयसंयोगाप्रसिद्धावपि रूपीयत्वेन संयोगाभावप्रतीत्युपपत्तिः। धर्मावच्छिन्नप्रति-

योगिताकत्वं त्वावश्यकमेव, अन्यथा ह्रदे वह्निर्नास्तीति प्रतीतौ वह्नेः द्रव्यत्वाव-च्छिन्नप्रतियोगिताकत्वसम्बन्धेन भानमुपगम्य भ्रमत्वापत्तेः। यद्यपि वैशेषिकसूत्रभाष्ययोः अभावपदार्थमधिकृत्य न विचारोऽक्रियत प्राचीनैः; तथापि वैशेषिकभाष्यटीकायां किरणावल्यामुदयनाचार्यैरभावस्तु स्वरूपवानपि पृथङ् नोद्दिष्टः, प्रतियोगिनिरूपणा-धीननिरूपणत्वात्, न तु तुच्छत्वात्। उत्पत्तिविनाशचिन्तायां प्रागभावप्रध्वंसाभावयोः वैधर्म्ये च इतरेतराभावात्यन्ताभावयोस्तत्र तत्र निदर्शयिष्यमाणत्वादिति वदन्ति।

सर्वेऽप्यभावाः प्रत्यक्षाः इह घटो भविष्यतीति प्रागभावस्य घटो ध्वस्त इति ध्वंसस्य, घटः पटो नेत्यन्योन्याभावस्य भूतले घटो नास्तीत्यत्यन्ताभावस्य ग्रहणात् तथापि प्रतीतेरन्योपपादनात् प्रागभावे अन्यदेव प्रमाणमुच्यते दार्शनिकैः।

यद्यपि इह घटो भविष्यतीति प्रतीतिर्न मानं भविष्यत्त्वस्य वर्तमानकालध्वंसा-धिकरणकालोत्पत्तिकत्वरूपत्वात् तथापि। उत्पन्नस्य घटस्य द्वितीयक्षणेऽपि घटजनक-सामग्रीसमवधानात् पुनरुत्पत्तिवारणाय प्रागभावः कल्पनीयः, तत्सद्भावे च उत्पन्न-घटप्रागभावस्य तद्घटोत्पत्त्यैव निवृत्तत्वात् प्रागभावघटितसामग्र्यभावान्न पुनरुत्पत्तिः। न च जन्यसत्त्वावच्छिन्नं प्रति द्रव्यत्वान्न तादात्म्येन प्रतिबन्धकत्वान् न पुनरुत्पत्तिरिति वाच्यम्, यत्रैतद्घटकपालाभ्यां पुनः घटान्तरमुत्पद्यते, तत्र ततः पूर्वं तद्घटोत्पत्तिवारणाय तदावश्यकत्वात् तत्रात्यन्ताभावघटितसामग्रीसत्वात्। अतः प्रागभावस्वीकार आवश्यकः। अपि च पाकजस्थले रूपरसगन्धस्पर्शानामेकदोत्पत्ति-स्वीकारात् तत्र रूपादिकं प्रति तत्तत्प्रागभावो हेतुरित्यङ्गीकरणीयम्, तत्र स्वाश्रये प्रति-बन्धकद्रव्याभावसत्वेन द्रव्यप्रतिबन्धकत्वाभ्युपगमनेनानिर्वाहम्।

प्राभाकरास्तु अभावस्याधिकरणस्वरूपत्वमुपगच्छन्ति। तच्च केवलाधिकरण-स्वरूपमाहुः, तन्न, तत्र कैवल्यं घटाभाववत्वमेव, अन्यथा घटवत्यपि तदभावप्रतीत्या-पत्तेरित्याहुः। बहुष्वधिकरणेष्वभावत्वकल्पनापेक्षया एकस्मिन्नभावे तदुपगमे लाघव-माहुः। भाट्टास्त्वतिरिक्तमभावमुपगच्छन्ति।

श्रीशङ्करभगवत्पादास्तु बृहदारण्यकभाष्ये इत्थमाहुः—पटे घटभेदः पटादन्यश्चेत् तद्भेदोऽपि तथेत्यनवस्थापत्तिः। अतो घटभेदः पट इत्येवाङ्गीकर्त्तव्यम्। एवं प्रागभावध्वंसात्यन्ताभावानामपि तत्तदधिकरणस्वरूपत्वमेवेत्याहुः, आस्तां तावत्।

आयुष्मता श्रीदीपकघोषमहाशयेन लिखितोऽयं ग्रन्थः सर्वथा समीचीन इति नः प्रतिभाति। एतेन भूयांसं श्रमं स्वीकुर्वता गहनगहनं नैयायिकसम्मतम्

अभावस्वरूपं प्रतिपादयता शास्त्ररसिकानां विदुषाम्, अन्तेवासिनाञ्च महानुपकारोऽनुष्ठितः।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य रजतजयन्तीमहोत्सवमुपलक्ष्य 'सारस्वती सुषमा' इत्याख्याया अनुसन्धानपत्रिकाया विशेषाङ्के 'लघुग्रन्थमालायाम्' एकोनचत्वारिंशत्प्रसूनतया मुद्रितोऽयं ग्रन्थः साम्प्रतं स्वतन्त्रग्रन्थरूपेण प्रकाश्यते।

लेखकोऽयं वयसा नवीनोऽपि ज्ञानेन प्रौढः, तं वयम् आशीर्भिर्योजयामः। आशास्महे आयत्यामपि प्रमेयान्तरमधिकृत्य एष अन्यानपि ग्रन्थान् प्रणेष्यतीति—

काश्याम्,
महाशिवरात्रिपर्वणि,
वि० सं० २०४०

श्रीगौरीनाथशास्त्री

कृतज्ञतानिवेदनम्

अभावविषये यद्यपि शास्त्रकृद्भिस्तथा पण्डितप्रकाण्डैश्चैतावता पाण्डित्यपूर्णमालोचनं कृतम्, तथापि नैयायिकरीतिमाश्रित्य नव्यन्यायादिपर्य्यालोचनेनैकत्र सम्यगालोचना प्रायशो नैव परिलक्ष्यत इति तथाविधालोचनार्थं समुत्सुकचेतसैतत्प्रबन्धरचने कुतूहलं मम मनसि सञ्जातम्; किन्तु समुपजातेऽपि तथाविधाभिलाषे ममाशक्तिकत्वेन स्वाभीष्टसम्पादनेऽसामर्थ्यं मे विचिन्त्य केवलं दुःखमेवाभूत्। अथ मदीयाचार्य्याणां पुरतो ममाभिलाषप्रख्यापनानन्तरं तेषामुपदेशेन सर्वथाऽऽनुकूल्यदानप्रतिश्रुत्या च सञ्जातसमाश्वासोऽहं निबन्धरचनायां प्रवृत्तोऽभवम्। तेषामेवानुकूल्येन निबन्धोऽयं विद्वज्जनसमीपे समुपस्थापयितुं समर्थोऽस्मि।

एतदवसरे येषां येषां सहृदयानामाचार्य्यप्रवराणां कृपया, स्नेहेन, उपदेशेन चैतन्निबन्धरचने समर्थोऽहम्, तांस्तान् मान्यमान्यान् प्रति कृतज्ञतापूर्णं सश्रद्धं च भूयो भूयो नमस्कारपर्यायो विज्ञाप्यते। तत्रादौ **सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य** कुलपतीनां परितो विश्रुतकीर्त्तीनां परममान्यानां मदीयाचार्य्याणां **श्रीगौरीनाथशास्त्रिमहोदयानाम्** एतद्ग्रन्थप्रकाशनविषये बहुमूल्यं कृपामयमवदानं सप्रश्रयं स्मारं स्मारं तत्रभवतां चरणकमलयोर्निवेद्यते मामकाः सश्रद्धप्रणामाञ्जलयः।

तथैव च **कुरुक्षेत्रविश्वविद्यालयस्य** सुरभारतीविभागीयप्राक्तनप्रधानाध्यापकानां विद्वद्वृन्दसुगृहीतनामधेयानां **डॉ० गोपिकामोहनभट्टाचार्य्यमहोदयानां** सहृदयानुकूल्यमृते ग्रन्थोऽयं कथमपि न लभेताणुमात्रमपि प्रकाशनसफलतामिति तेभ्योऽपि निवेद्यते हार्दिकश्रद्धार्घ्यम्।

अपि च मद्गुरुवर्याणां भारतीयदर्शने लब्धदर्शनानां पण्डिताग्रगण्यानां यादवपुरविश्वविद्यालयसुरवाणीविभागीयप्राक्तनरीडरपदमलङ्कुर्वाणानां **श्रीमद्विधुभूषणभट्टाचार्य्यमहोदयानां** सर्वदाऽनलसं समुपदेशं विना नैतस्य निबन्धस्य विरचनमेव सम्भावितमभवदिति तेभ्यः प्रदीयते सबहुमानमान्तरप्रणामः, प्रदीयते च प्रणामो हृदयश्रद्धाञ्जलिनिवेदनपुरस्सरं निर्मथितभारतीयदर्शनरत्नाकररत्नान् कलिकाताराष्ट्रियसंस्कृतमहाविद्यालयस्थमहाचार्य्यविभागाध्यापकान् मदीयगुरुवर्य्यान् पण्डितप्रवरान् **श्रीयुक्तश्रीमोहनभट्टाचार्यतर्कवेदान्ततीर्थमहोदयानुद्दिश्यापि**—ययोः सुदीर्घकालीनं निरालस्यमध्यापनमन्तरेण नाशक्यत महार्हतत्त्वरत्नान्वेषणकामेन मया संशयादिप्रत्यूहनिरसनपूर्वकं दुरवगाहभारतीयदर्शनग्रन्थरत्नाकरे सुखमवगाहनमित्यहो सानन्दमनुभवामि जन्मान्तरीणसुकर्मफलमिह जन्मनीति—

कालिकातायाम्
वसन्तपञ्चम्याम्
वि० सं० २०४०

आचार्य्यस्नेहधन्यः

दीपकघोषः

विषयानुक्रमणी

प्रथमोऽध्यायः

द्वितीयोऽध्यायः

तृतीयोऽध्यायः

चतुर्थोऽध्यायः

पञ्चमोऽध्यायः

• • •

श्रीदीपकघोषप्रणीतः

अभावविमर्शः

❀ ❀ ❀

प्रथमोऽध्यायः

अध्यायवर्णिता मुख्या विषयाः—

(क) अभावचिन्तने बीजम्

(ख) अभावशब्दार्थविचारः

(ग) नञः प्रकारभेदकथनम्

(घ) अभावशब्दशक्यतावच्छेदकनिर्णयविचारः

(क) अभावचिन्तने बीजम्

१. मोक्षोपयोगिपदार्थतत्त्वनिर्धारणम् अभावोपजीवकम् इति अभावज्ञानं परमपुरुषार्थसाधनानुकूलम्—

आस्तिक-नास्तिकभेदोपपन्नेषु लोकायतवर्जभारतीयदर्शनेषु मोक्ष एव परमपुरुषार्थतया निरूपितः। स च मोक्षो दुःखात्यन्ताभावो वा, नित्यसुखाभिव्यक्तिर्वा इत्यन्यदेतत्[१]; अपि तु परमपुरुषार्थतया मोक्ष एव सर्वेषां दर्शनशास्त्राणां चरमप्रतिपाद्यतया व्यवस्थितः। तत्र च तापत्रयदन्दह्यमानानां प्राणिनां मोक्षलाभः कथं भवेदित्येव दर्शनशास्त्राणां मौलचिन्तनम्। तत्र च अनुभूयमानानां सर्वेषां पदार्थानां तत्त्वज्ञानाद् मोक्षो भवेदित्यपि न कस्यचन दर्शनस्य विप्रतिपत्तिः। उक्तं तत्रभवता गौतमेन—'प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानां निःश्रेयसाधिगमः[१]'।

एवं चाभिहितं कणादपादैरपि—'धर्मविशेषप्रसूताद् द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायानां षण्णां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान् निःश्रेयसम्' सांख्यकारिकायामपि तथैव उक्तम्—'तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्[३]'।

न केवलम् आस्तिकदार्शनिकैरेव एवमुक्तम्, अपि तु नास्तिकदार्शनिकप्रवरैरपि पदार्थानां तत्त्वज्ञानमेव मोक्षकारणमुक्तम्। तथा च सूत्रम्—'सम्यग्ज्ञानपूर्विका सर्वपुरुषार्थसिद्धिरिति तद् व्युत्पाद्यते[४]'।

---

१. न्या० द० २।२।२।

२. वै० द० २।२।४।

३. सां० का० २।

४. न्यायबिन्दुः - २।२।

एवं स्थिते निर्बाधमिदं वक्तुं शक्यते यत् पदार्थानां तत्त्वज्ञानं मोक्षसाधनम् इति। अत एव मोक्षसाधनतत्पराणां दर्शनशास्त्राणां पदार्थतत्त्वज्ञानानुकूलतया पदार्थस्वरूपनिरूपणे विशेषतः प्रयत्नातिशयो दृश्यते।

२. पदार्थस्वरूपज्ञानम् इतरव्यावृत्तिबुद्धिसापेक्षम्

तत्र च किं तावत् पदार्थस्वरूपमिति चिन्तायां प्रधानतो विजातीयव्यावृत्ति-मुखेनैव पदार्थस्वरूपविचारो दर्शनशास्त्रेषु सम्यग् व्यवस्थितः। व्यावृत्तिर्नाम तदितरप्रतियोगिकभेदवत्त्वम्, यथा गोपदार्थस्य स्वरूपज्ञानं गवेतरमहिषादिप्राणि-व्यावृत्त्यैव सास्नादिमत्त्वेन बोध्यम्।

न च सास्नादिमत्त्वेनेव गोपदार्थस्वरूपसिद्धौ गवेतरव्यावृत्तिः नावश्यकीति वाच्यम्, गवेतरवैलक्षण्यमेव सास्नादिमत्त्वम् अवगमयति। यत्र च सास्नादिमानयम् इति बुद्धिर्जायते, तत्र न केवलम् अनुगतप्रत्ययहेतुरेव सास्नादिमत्त्वं भवेत्; अपि तु गवेतरेभ्यः व्यावृत्त्य तादृशधर्मयुक्तं गवादिपदवाच्यं वस्तु बुद्धिविषयी भवेत्, अन्यथा सास्नादिमत्त्वम् एवम्भूतेषु प्राणिषु यथा वर्त्तते, तथा अन्यत्रापि वर्त्तते न वेति सन्देह-निरसनं दुरुपपादनं स्यात्, तस्माद् इतरव्यावृत्तिमुखेनैव वस्तुगतं स्वातन्त्र्यं सर्वत्र बुद्धिस्थं भवेत्। व्यावृत्तिस्तु अभाव एव, स च अभावः स्वतन्त्रः पदार्थो वा किञ्चिद् भावान्तरं वा इति विप्रतिपत्तावपि वस्तुस्वरूपनिरूपणतत्पराबुद्धिः अभावमर्यादां नातिक्रमते इति अवश्यं स्वीकार्यम्।

३. पदार्थस्वरूपज्ञानं लक्षणप्रमाणसाध्यम्, लक्षणं च स्वेतरव्यावृत्तिरूपम्

किञ्च, वस्तुस्वरूपावगमो वस्तुलक्षणादेव सिध्यति। उक्तं च लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति। इदमप्यत्रावधेयं यद् वस्तुलक्षणप्रयोजनं वस्तुस्वरूपनिर्णयार्थमेव, न तु वस्तुस्वरूपनिर्माणार्थम्। तथा हि सिद्धवस्तुनः अपरस्मै व्यवहारोपयोगित्वेन प्रतिपादनार्थमेव लक्षणप्रयोजनम्। तद्यथा कश्चिज्जनः पृथिवीं स्वरूपतो जानन्नपि कुतश्चिद् व्यामोहात् पृथिवीति न व्यवहरति, तं प्रति विषयसम्बन्धाव्यभिचारेण व्यवहारसाधनार्थमेव पृथिव्याः असाधारणधर्मभूतं लक्षणं कथ्यत इति। उक्तं च न्यायकन्दलीकारेण—'**यो पृथिवीति लोके शृणोति, न जानाति च तस्याः स्वरूपं कीदृगिति, तं प्रति तस्याः स्वपरजातीयव्यावृत्तस्वरूपप्रतिपादनार्थम् असाधारणो धर्मः कथ्यते**'[1] इति'। न्यायकन्दलीकाराभिप्राय एवं समायाति यद् वस्तुलक्षणं सजातीय-विजातीयप्रतियोगिकभेदधीसापेक्षम् इति। तदुक्तम् उद्द्योतकारेण—'**लक्षणस्यतरव्यव-च्छेदहेतुत्वात्। लक्षणं खलु लक्ष्यं पदार्थं समानासमानजातीयेभ्यः व्यवच्छिनत्ति**'[2]। अतो व्यवहारसाधनं समानासमानजातीयव्यवच्छेदो लक्षणार्थ इति निष्कर्षः।

---

१. न्या० क० पृ० प्रकरणम्–पृ० ७०।   २. न्या० वा० २।२।३।

४. व्यवहारोपपत्तये लक्षणावश्यकत्वम्

एवं स्थिते गोपदार्थस्वरूपस्य अन्यस्मै व्यवहारोपयोगित्वेन प्रतिपादनार्थं गोपदार्थलक्षणं सजातीयपदार्थगवयादिभ्यः, तथा विजातीयपदार्थगवेतरेभ्यश्च व्यवच्छिद्यैव क्रियते। अतो यदेतद् वस्तुनः प्रात्यात्मिकं स्वरूपम्, स एव भेदः, तच्च अपरदर्शनानपेक्षम् इन्द्रियसन्निकर्षादेव प्रतीयमानं प्रत्येकं विलक्षणमेव संवेद्यत इति युक्तमुक्तं न्यायकन्दल्याम्।

अत्रेदं बोध्यम्—सर्वत्रैव प्रत्यक्षेणाधिगतानां पदार्थानाम् इतरभेदान् परान् बोधयितुं लक्षणं प्रतिपादयेत् प्रमाता, स्वयमप्रतिपन्नस्य प्रतिपादकत्वासम्भवात्। भेदो नाम पदार्थानाम् अन्योन्याभावलक्षण इति न्यायवित्सिद्धान्तः, स चानुयोगिप्रतियोगिसापेक्षः। तथा हि यस्य अभावः, यत्र च अभावः, तदुभयग्रहणं विना अन्योन्याभावो न गृह्यते। न हि घटज्ञानं पटज्ञानं चान्तरेण घटप्रतियोगिकपटानुयोगिकभेदः प्रतिपादयितुं शक्यते। अतः प्रतियोग्यनुयोग्युभयोः ज्ञानं विना निषेधानुपपत्तिः। तस्माद् इतरव्यावृत्तिमुखेन पदार्थस्वरूपं प्रतिपादयल्लक्षणं सर्वथैव भेदम् अवगाहते। भेदश्च अवगाहतेऽन्योन्याभावम्। अतः परम्पराक्रमेण लक्षणाद् भेदः, भेदाच्च अभावसिद्धिः।

५. लक्षणान्तर्गतभेदज्ञानावश्यकत्ववर्णनम्

अत्रेदं विचार्यते—गोस्वरूपग्रहणकाले किं तदितरभेदगोस्वरूपयोः संकीर्णयोर्ग्रहणम्, आहोस्वित् परस्परविविक्तयोरुयोर्ग्रहणम्। तत्र आद्ये **'गौरश्वो न भवति'** इति प्रतीत्यसम्भव एव। यतो गवाश्वयोर्भेदे गोत्वं च यदि सङ्कीर्णतामापद्येत, तदा गोत्वम् अश्वभेदश्च इति पदार्थद्वयग्रहणासम्भवात् पदार्थद्वयावगाहिनी **'गौरश्वो न भवति'** इति प्रतीतिः नोपपद्यते। यदि पुनः विविक्तयोरेव ग्रहणम्, तदा अन्योन्याश्रयत्वं दुर्वारम्। तथा हि विविक्तयोर्ग्रहणे सति अभावग्रहणम्, अभावग्रहणे सति विविक्तयोर्ग्रहणमिति।

६. पदार्थस्वरूपतदितरव्यावृत्तिबोधविचारः

अत इतरभेदमुखेन वस्तुस्वरूपनिर्णयः कथं सम्भाव्यते इति चेत्, उच्यते—भिन्नयोर्वस्तुनोः इतरेतराभावः सिध्यति। भेदश्च वस्तुनिष्ठं यदसाधारणं रूपं तत्स्वरूप एव। तथाविधं स्वरूपम् अपरदर्शनानपेक्षं स्वेन महिम्ना इन्द्रियादिसंयोगद्वारा वस्तुस्वरूपस्य प्रतीतिसम्भवात्। तथा चोक्तं कन्दलीकृता—"यदेतद् वस्तुनः प्रातिस्विकं स्वरूपम्, स एव भेदः, तच्च अपर-दर्शनानपेक्षम् इन्द्रिय-सन्निकर्षमात्रादेव प्रतीयमानं प्रत्येकं विलक्षणमेव संवेद्यते" (न्या० क० पृ० ९२—जलप्रकरणे)। एतेनैतत् सिध्यति यद् गोस्वरूपदर्शनं न अश्वदर्शनादिकम् अपेक्षते, किन्तु यत्र गोस्वरूपं पश्यतोऽपि

प्रमातुः गोशब्दज्ञानं नास्ति, तत्र अश्वे गवि च स्वेन स्वेन आत्मना गृह्यमाणेन तत्तत्स्वरूपनियमार्थम् अन्योन्याभावप्रतीतिर्जायते। अतो वस्तुस्वरूपनिर्धारणार्थं यल्लक्षणं प्रयोक्तव्यम्, तत्रैव अभावचिन्तनं बलादापतितं दार्शनिकेषु।

७. पदार्थतत्त्वनिर्धारणम् अभावोपजीवकम्

न केवलं पदार्थतत्त्वविश्लेषणोपायेन अभावचिन्तनं दार्शनिकहृदयराज्यम् अधिरूढम्, अपि तु व्यवहारनिष्णातानां भ्रमप्रमाददोषरहितानां सज्जनानामपि लोकव्यवहारतोऽभावचिन्तनं सिद्धम्। तथा हि लोकानां व्यवहारः **'साम्प्रतम् इदं नास्ति', 'इदं च विनष्टम्', 'इदम् इदं न भवति'** इत्यादिः, तत्र च 'नास्ति' शब्देन किं प्रतीयत इत्येव विश्लेषणीयम्। यद् वस्तु यत्र देशे यत्र काले च विद्यते, तद् वस्तु तत्र तदानीं नास्तीति न केनापि व्यवह्रियते। एवं विद्यमाने वस्तुनि विनष्टप्रतीतिरपि न भवेत्। अत एव न तद्व्यवहारश्च। एवम् इदम् इदानीं न भवतीति, अत्रापि यद् वस्तु यन्न भवतीति व्यवह्रियते, तत्र तद् वस्तु न तत्स्वरूपम् इति सर्वैः प्रतीयते। एवं च सति इदं सर्वाभ्युपेयं यद् वस्तुनो विद्यमानदशायां नास्तीति व्यवहाराभावाद्। वस्तुनः अविद्यमानदशायां तद्व्यवहाराच्च नास्तिपदेन वस्तुसत्त्वं निषिध्यत एव। अयमेव निषेधोऽभावाख्य इति प्रसिद्धिः।

अत एव घटो नास्तीति प्रत्यये नास्तिपदाभिधेयघटप्रतियोगिकाभावस्य सर्वानुभवसिद्धत्वाद् अभावपदार्थस्य प्रतीतिसिद्धत्वं न केनापि वारयितुं शक्यते। किं पुनर्बहुना, न केवलं प्रेक्षावतामेव अभावव्यवहारः लोकप्रसिद्धः; अपि तु पांशुलचरणानां हालिकादिप्राकृतजनानामपि सति वस्तुनि तन्नास्तीति व्यवहाराभावात्, असति च वस्तुनि तन्नास्तीति व्यवहाराच्च वस्तुसत्त्वमेव अभावप्रतीतिम् अवगाहयति।

८. पदार्थव्यवहारस्थलेऽपि अभावोपजीवकत्वस्थापनम्

प्रसिद्धं चैतत्—क्षुधार्त्तस्य भोजनेन क्षुन्निवृत्तौ साम्प्रतं मे क्षुधा नास्तीति व्यवहारो बालमूकादीनामपि, अतः कथमपि लोकव्यवहारसिद्धोऽभावो नानङ्गीकर्त्तुं शक्यते। स चाभावः किं स्वरूपः? भावादन्यो वा, भावान्तरं वा इत्यन्यदेतत्, तदग्रे विवेचनीयम्, किन्तु आपामरसाधारणानां सर्वेषामभावः प्रतीतिसिद्धो व्यवहारानुविधायीति सर्वैरेव स्वीकर्त्तव्यम्।

९. शास्त्रीयविचारो लोकसिद्धानुभवं नातिक्रमेत्

अत एव अनुभवसाक्षिकस्य अभावस्य स्वरूपपर्यालोचनं शास्त्रकृतामपि सुतरामावश्यकीयम्। न हि लोकानुभवसिद्धपदार्थान् अतिक्रम्य शास्त्रयुक्त्या सर्वानु-

भवविरुद्धं किञ्चित् साधयितुं शक्यते, यतः पदार्थाः खलु स्वे महिम्नि प्रतिष्ठिता वर्त्तन्ते। न हि शास्त्रयुक्त्या पदार्थानां स्वरूपम् आविर्भवति, तिरोभवति वा, अतो ये ये पदार्था यथास्वरूपम् आश्रितास्तिष्ठन्ति, तेषां तेषां पदार्थानामनन्यसाधारणं तत्स्वरूपं प्रेक्षावदनुभवसिद्धं शास्त्रयुक्त्या व्यवस्थापनीयम्। यतः पदार्थानां स्वरूपम् अवलोक्यैव तत्पदार्थस्वरूपविधायिनी चिन्ता प्रवर्त्तते, न तु आदौ यथा यथा चिन्तितम्, तथैव वस्तुस्वरूपं पश्चाद् आविर्भूतमिति कथमपि युक्तिसिद्धम्। केवलं तु भगवान् एव मनसि सङ्कल्पं विधाय पश्चाद् विश्वं सृजति सङ्कल्पानुरूपम्, न तु दार्शनिकानां युक्तिविदां तथात्वं सम्भवति।

१०. पदार्थस्वरूपनिर्धारणार्थं शास्त्रेषु अभावचिन्तनप्रयोजनम्

न हि ते दार्शनिका नित्याः परमैश्वर्यमापन्नाः स्वतःसिद्धाः; अपि तु अस्मिन् जगति लब्धजन्मानो विविधविद्याविद्योतितचेतसो मनीषिणस्ते वैचित्र्यपूर्णं जगद् विलोक्य तत्रानुभूयमानानां पदार्थानां स्वरूपनिर्णये बद्धप्रयत्ना भवन्ति, अतः स्वभावतो ये पदार्था यथावस्थिताः, तेषां तेषां स्वरूपम् आलोक्य तत्स्वरूपोद्घाटनानुसन्धित्सा मनीषिणां मानसे पदं विदध्यात्। तद्वशादेव ते स्वकीयचिन्ताप्रसरवशाद् विविधैः भावैः परीक्ष्य तत्त्वनिर्णयं कुर्वन्ति। अत एव ये ये पदार्था लोकानुभवसिद्धाः, तांस्तान् पदार्थान् विहाय शून्यमूला दार्शनिकानां चिन्ता कथमपि न प्रसरति, न वा तच्चिन्तावशाद् लब्धजन्मानः पदार्थाः, तस्माद् लोकव्यवहारसिद्धं प्रतीतिसाक्षिकं अभावपदार्थम् अनुसृत्य दार्शनिकानां स्वाभीष्टसिद्धय एव अभावविषयको विचारः समापतित इति।

(ख) अभावशब्दार्थविचारः

न भावः, अभाव इति अभावशब्दनिष्पत्तिः। तत्र नञ् इत्यर्थश्च संसर्गाभावः, अन्योन्याभावश्च इति नञ्वादे दीधितिकृता उक्तम्। संसर्गाभावादयोऽग्रे विचारयिष्यन्ते। **'इदम् इह नास्ति', 'इदम् इदं न भवति'** इत्यादिप्रतीतिसिद्धपदार्थविशेषः अभावः। एवम्भूतश्च 'अभावः' अभावत्वप्रकारकप्रमाविषयः।

११. लोकव्यवहारमाश्रित्य अभावशब्दार्थनिरूपणम्

अत्रेदं बोध्यम्—इदमिह नास्ति, इदमिदं न भवतीति प्रतीतिवैलक्षण्याद् अभावपदशक्यतावच्छेदकं न अभावत्वम्, अपि तु संसर्गाभावत्वम् अन्योन्याभावत्वं च इति नञः शक्यतावच्छेदकम्।

१२. अभावशब्दशक्यतावच्छेदकविचारः

न च लाघवाद् अभावबुद्धिविषयीभूताभावत्वं सर्वाभावसाधारणम् अभावशब्दशक्यतावच्छेदकम् एकमेव, इति वाच्यम्, इह **'घटो नास्ति'** इत्यत्र यादृशाभावः

प्रतीतिविषयी भूतः, 'घटः पटो न' इत्यत्र न तथाविधाभावः प्रतीयते, अपि तु अभाव-वैलक्षण्यमेव प्रतीयते। अन्यथा अभावविषयिण्या बुद्धेः द्वैविध्यं नार्हति। अभावत्वस्य सर्वसाधारण्येन अभावपदशक्यतावच्छेदकत्वे तदवच्छिन्नप्रतीतौ सर्वत्रैव प्रतीतेः एकविधत्वं युक्तम्। दृश्यते तु पुनः न तथा, यतः क्वचिद् अनुयोगिवाचकपदोत्तरं सप्तमीविभक्तिः, क्वचित् प्रतियोगिवाचकपदोत्तरं प्रथमाविभक्तिः। यथा 'भूतले घटो नास्ति', 'इह कपाले घटो ध्वस्तः' इत्यादि। अन्यत्र च पुनः प्रतियोग्यनुयोग्युभय-वाचकपदोत्तरं प्रथमाविभक्तिरेव यथा घटः पटो नेति। यदि पुनः अभावत्वं अभाव-पदशक्यतावच्छेदकम् एकमेव स्यात्, तदा सर्वत्रैव अभावबोधे अनुयोगिप्रतियोग्यादि-पदानां तुल्यविभक्तिकत्वं सम्भाव्येत। न हि अर्थवैलक्षण्यं विना विभक्तिवैलक्षण्यं सम्भवेत्। अत एव अभावत्वं नैकम् अभावपदशक्यतावच्छेदकम्। तथा हि 'घटो नास्ति' इत्यादौ संसर्गाभावत्वस्य, 'घटो न भवति' इत्यत्र च अन्योन्याभावत्वस्यैव प्रकारतया आनुभविकत्वेन अभावपदशक्यतावच्छेदकं द्विविधम् इति सिद्ध्यति।

१३. अभावत्वं संसर्गान्योन्याभावसाधारणं न भवेदिति मतप्रदर्शनम्

केचित्तु नञ्पदजन्यप्रातिपदिकार्थे अभावान्वयबोधस्थले सप्तमीसमभिव्याहार-ज्ञानं कारणम्, अत एव 'भूतले घटो नास्ति' इत्यत्र भूतलपदोत्तरं सप्तमीविभक्तिर-पेक्ष्यते। यत्र पुनः नञ्पदजन्यभेदबोधः, तत्र समानविभक्तिकप्रातिपदिकार्थसमभि-व्याहारः कारणम्। अत एव व्युत्पत्तिभेदसूचनायैव क्वचित् सप्तमीविभक्तिः, क्वचिच्च प्रथमाविभक्तिः अनुयोगिवाचकपदोत्तरं प्रयोजनीया, किन्तु 'अभावः' इत्यनुभवाद् उभयाभावसाधारणम् एकमेव शक्यतावच्छेदकम् इति।

(ग) नञः प्रकारभेदकथनम्

ननु नञर्थाः षड् इति प्रसिद्धिर्भवति। तथाहि—

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः॥

१. तत्सादृश्यं यथा– अब्राह्मणः, ब्राह्मणसदृश इत्यर्थः।

२. अभावो यथा—अपापम्, पापाभाव इत्यर्थः।

३. तदन्यत्वं यथा—अघटः, घटभिन्नं द्रव्यम्।

४. तदल्पता यथा—अनुदरा कन्या, अल्पोदरी इत्यर्थः।

५. अप्राशस्त्यं यथा—अकार्यम्, अप्रशस्तं कार्यम्।

६. विरोधो यथा—असुरः, सुरविरोधी इत्यर्थः।

एवं च षडेव शक्यतावच्छेदकानि वक्तव्यानि—तत् कथं द्विविधमेव शक्यतावच्छेदकम् उक्तम् ? इति चेत्, उच्यते—संसर्गाभावत्वान्योन्याभावत्वरूपधर्मद्वयावच्छिन्ने अभावपदशक्त्यङ्गीकारेणैव निर्वाहसम्भवे गौरवात् षडवच्छेदकानि नाङ्गीकर्त्तव्यानि। यत्र च सादृश्यादिकं प्रतीयते, तत्र लक्षणयैव तथाविधप्रतीतिः सम्भवति।

१४. तत्रैव रघुनाथशिरोमणेः मतोल्लेखः

तथा चोक्तं गदाधरभट्टाचार्यपादैः नञ्वादव्याख्यानावसरे—लक्षणयैव सादृश्याद्यर्थप्रयोगनिर्वाहे तादृशार्थे शक्तिकल्पनम् अयुक्तम्; अपि तु अभावान्यत्वरूपार्थद्वय एव सादृश्यत्वाद्यपेक्षया अभावत्वभेदत्वयोः लघुतया तयोः प्रवृत्तिनिमित्तत्वे विनिगमकसत्त्वात्[१]।

(घ) अभावशक्यतावच्छेदकनिर्णयविचारः

इदमत्रावधेयम्—यद्यपि 'भूतले घटो नास्ति', 'घटः पटो न भवति' इत्यादौ सर्वत्रैव अभावबुद्धिः सम्पद्यते, तथापि प्राचीनानां मते अभावत्वं न उभयाभावसाधारणम् अनुगतप्रतीतिनियामकम्, यतः सर्वत्रैव पदार्थाङ्गीकारे अनुगतप्रतीतिरेत्र नियमिका।

१५. अभावशब्दशक्यतावच्छेदकविषये प्राचीनमतप्रदर्शनम्

तथा चोक्तं न्यायकन्दल्याम्—'यथा भावस्य स्वाधारेषु द्रव्य-गुण-कर्मसु आत्मानुरूपः प्रत्ययः सत्सदिति प्रत्ययः द्रव्यत्वस्य स्वाश्रयेषु द्रव्येषु आत्मानुरूपः प्रत्ययः, द्रव्यं द्रव्यमिति प्रत्ययः, गुणत्वस्य स्वाश्रयेषु गुणेषु आत्मानुरूपप्रत्ययः गुण इति प्रत्ययः, कर्मत्वस्य स्वाश्रयेषु कर्मसु आत्मानुरूपः प्रत्ययः कर्मेति प्रत्ययः, तस्य कर्तृत्वाद् भावद्रव्यत्वादीनां स्वाश्रयादिभ्यः परस्परतश्च अर्थान्तरभावः, तथा समवायस्यापि पञ्चसु पदार्थेषु इहेति प्रत्ययदर्शनात् तेभ्यः पञ्चभ्यः पदार्थान्तरत्वम्[२]'।

एवं च सति अभावस्वीकारस्थलेऽपि अनुभव एव प्रमाणपदवीम् अधिरोहति, तथा च 'भूतले घटो नास्ति' इत्यत्र सप्तम्यन्तानुयोगिकप्रथमान्तप्रतियोगिताकाभावप्रतीतिः सर्वेषाम् अनुभवसिद्धा, 'घटः पटो न' इत्यत्र पुनः अनुयोगिप्रतियोगिवाचकपदयोः उभयोरेव प्रथमान्तत्वम् अनुभूयते, तस्माद् अनुभवभेदात्, संसर्गाभावान्योन्याभावयोः नैकत्वं सिध्यति, अतः संसर्गाभावत्वम् अन्योन्याभावत्वं च नञः शक्यतावच्छेदकम्, न च पूर्वोक्ताभावप्रतीतिद्वयस्थले समवायाद्यवच्छिन्नायास्तादात्म्यावच्छिन्नायाश्च प्रतियोगितायाः संसर्गतया भानादेव वैलक्षण्यसिद्धौ अभावत्वं लाघवात्

१. रघुनाथशिरोमणिः-नञर्थवादः—पृ० २०२२।
२. न्यायकन्दली -- ७७७-७७।

सर्वाभावसाधारणम् एकमेव शक्यतावच्छेदकं स्यादिति वाच्यम्, अपि च, अभावद्वयवैलक्षण्यं विना प्रतियोगितायाः सम्बन्धद्वारकभेदो न भवेत्, तादात्म्यसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रकारताकबुद्धिं प्रति तादात्म्यसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रतियोगिताकाभावबुद्धेरेव प्रतिबन्धकत्वम्, न तु तथाविधबुद्धिं प्रति समवायाद्यवच्छिन्नघटत्वावच्छिन्नप्रतियोगिताकाभावबुद्धेः प्रतिबन्धकत्वं सम्भवेत्। एवं समवायाद्यवच्छिन्नघटत्वावच्छिन्नप्रकारताकबुद्धिं प्रत्यपि समवायाद्यवच्छिन्नघटत्वावच्छिन्नप्रतियोगिताकाभावबुद्धेरेव प्रतिबन्धकत्वम्, न तु तत्रापि तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावबुद्धेः प्रतिबन्धकत्वम्, अतः प्रतिबध्यप्रतिबन्धकभावस्थले स्पष्टत एव द्वयोः अभावयोः वैलक्षण्यम् अनुभवसिद्धम्।

न च पदार्थद्वयवैलक्षण्यं विना तथात्वं सम्भवति, अतः संसर्गाभावान्योन्याभावयोः वैलक्षण्यात् शक्यतावच्छेदकमपि द्वयमेव स्यात्।

१६. अभावशब्दशक्यतावच्छेदकविषये नवीनमतप्रदर्शनम्

नवीनास्तु—अभावत्वम् अखण्डोपाधिरूपमेव। तथा हि संसर्गाभावत्वम् अन्योन्याभावत्वं च पृथग् इत्यत्र इयमेव युक्तिर्यत् यत्र संसर्गारोपपूर्वकप्रतीतिरभावस्य तत्रैव संसर्गाभावः, यथा अत्र यदि घटः स्यात् तर्हि घटवत्तया उपलभ्येत, इति प्रतियोग्यारोपपूर्वकमेव संसर्गाभावः प्रतीयते, अन्योन्याभावस्थले तु न तथा, एवम् अन्योन्याभावस्थले तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकत्वमेव, संसर्गाभावस्थले तु न तथा, अपि तु तादात्म्यातिरिक्तसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वं संसर्गाभावत्वम्।

१७. अभावशब्दशक्यतावच्छेदकोपसंहारः

एतच्च न युक्ततरम्, तथा हि यदि संसर्गारोपपूर्वकप्रतीतिविषयतात्त्वमेव संसर्गाभावत्वं स्यात्, तदा अतीन्द्रियाभावस्थले अभावे अव्याप्तिः दुष्परिहारा। अतः आरोपस्य अभाव प्रत्यक्षे हेतुत्वं न प्रमाणसिद्धम्। एवं तादात्म्यातिरिक्तसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वं संसर्गाभावत्वम् इत्यपि न वक्तुं युज्यते, संयोग्यन्योन्याभावे अतिव्याप्त्यापत्तेः, यतः संयोगितादात्म्यस्य फलतः संयोगरूपतया तथाविधाभावस्य संयोगावच्छिन्नप्रतियोगिताकत्वात् तत्र संसर्गाभावलक्षणस्य अतिव्याप्तिः स्यात्। अतः पूर्वोक्तरूपेण संसर्गाभावत्वं न निर्धारयितुं युक्तम्, नापि यथोक्तम् अन्योन्याभावत्वमपि संगच्छते, तथा सति संयोग्यन्योन्याभावे अव्याप्त्यापत्तेः, पूर्वोक्तरीत्या अत्रापि संयोगस्यैव फलतः तथाविधाभावप्रतियोगितावच्छेदकसम्बन्धसम्भवात्। अतः अत्यन्ताभावादौ संसर्गाभावः इत्याद्यनुभवसाक्षिकम् अखण्डोपाधिरूपमेव तत्। एवम्

अन्योन्याभावत्वमपि तथैव प्रतीतिसिद्धम् अखण्डोपाधिरूपमेव वक्तव्यम्। तथा च उभयाभावानुगतम् अभावत्वमेव शक्यतावच्छेदकं वाच्यम्।

एवम् अभावाधिकरणकाभावस्थले अभावत्वस्य अनुयोगिताविशेषरूपत्वेन प्रतीयमानतया अनुयोगिताविशेष एव अभावत्वमिति वक्तुं शक्यते। अत एवोक्तं दीधितिकृता सिद्धान्तलक्षणे—'अभावत्वं चेद् इदमिह नास्ति—इदमिदं न भवति इति प्रतीतिनियामको भावाभावसाधारणः स्वरूपसम्बन्धविशेषः[1]'। तथा चोक्तं गदाधरभट्टाचार्यपादैः नञ्वादव्याख्यानावसरे—'यदि अन्योन्याभावत्वं तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वरूपं भवेत्, तदेव न, संयोग्यादितादात्म्यस्य संयोगादिरूपतया संयोगसम्बन्धावच्छिन्नसंयोग्यत्यन्ताभावस्य अन्योन्याभावत्वापत्तेः, अपि तु अनुयोगिताविशेष एव। एवं च तादात्म्यस्य अन्योन्याभावप्रतियोगितावच्छेदकसम्बन्धत्वमपि अप्रामाणिकम्। इह संयोगेन घटो नास्ति इत्यादिवद् अयं तादात्म्येन न घटः इत्याद्यप्रत्ययात्। एवं च तादृशानुयोगिताविशेषप्रकारकत्वमेव अभेदसम्बन्धेन प्रतियोगिप्रकारकधीविरोधित्वे तन्त्रम्। तथा च न तेन रूपेण पृथक्शक्तिकल्पनम् तत्प्रकारकबोधानुरूपेणावश्यकम्।'

भाषापरिच्छेदे अभावव्याख्यानावसरे दिनकर्याम् उक्तम्—'अत्र नव्याः—अभावत्वस्य अखण्डोपाधित्वे प्रमाणाभावः, किन्तु भावभिन्नत्वं समवायसामानाधिकरण्यान्यतरसम्बन्धावच्छिन्नप्रतियोगिताकसत्ताऽभावत्वम् इति; किन्तु नञ्वादे गदाधरभट्टाचार्य्येण प्रदर्शितरीत्या अखण्डोपाधित्वम् अभावत्वम् इति नव्यानां मतम्'—इत्युक्तम्।

दिनकरीकृतामाशयः—यत्र तु प्रकारान्तरेण उपपत्तिर्नैव सम्भवेत्, तत्रैव अखण्डोपाधित्वं स्वीकर्त्तव्यम्। अतो यदि प्रकारान्तरेण घटाभावादौ अभाव इत्यनुगतप्रतीतिः सम्भवेत्, तदा अखण्डोपाधित्वं न स्वीकर्त्तव्यम्। प्रकारान्तरं तु दर्शितमेव भावभिन्नत्वम् इत्यादिना।

ननु एवमपि यस्य सत्तात्वेन सत्ताज्ञानं नास्ति, तस्य सत्तानुपस्थितिदशायां घटो नास्ति इत्यादिप्रतीतेरनुपपत्तिरेव इति चेत्, तत्रोच्यते, सत्ताऽभावस्य स्वरूपतो भानस्वीकारान्न दोषः। तथा चोक्तं दिनकर्याम्—'सत्ताऽत्यन्ताभावव्यक्तेः स्वरूपत एव प्रकारत्वोपगमात्'।

ननु तथापि सत्तोपस्थितिशून्यकाले 'घटो नास्ति' इत्यादिप्रतीतिरनुपपन्नैव, यतः अभावज्ञाने प्रतियोगिज्ञानस्य हेतुतया सत्ताज्ञानं विना सत्ताऽभावभानासम्भवाद् इति चेत्, उच्यते, अभावत्वप्रकारकप्रत्यक्षं प्रत्येव प्रतियोगितावच्छेदकावच्छिन्न-

१. दीधीतिः–सिद्धान्तलक्षणम्–पृ० ३०६।

प्रतियोगिज्ञानं कारणम्, न तु घटो नास्ति इत्यादिप्रतीतिस्थले, सत्ताऽभावस्य अभाव-विषयकशाब्दज्ञानरूपतया तत्र प्रतियोगिज्ञानानपेक्षणात्। अन्यथा 'इदं तमः' इत्यादि-प्रतीतेरनुपपत्तिः। तथा हि तमस्त्वं तु न तेजोऽभावस्वरूपत्वम्, अपि तु तेजोऽभाव-निष्ठतत्तद्व्यक्तित्वमेव।

ननु तथापि विशिष्टबुद्धित्वावच्छिन्नं प्रति विशेषणज्ञानत्वेन हेतुत्वात् सत्ताऽभावस्य पूर्वानुपस्थितस्यापि प्रकारत्वोपगमे पूर्वोक्तकार्यकारणभावे व्यभिचार इति चेत्, तत्रोच्यते—'विशिष्टबुद्धित्वं हि विशिष्यैव वाच्यम्। तथा हि यदि सप्रकारक-बुद्धित्वं विशिष्टबुद्धित्वम्, तत्र विशेषणत्वमपि प्रकारतया भानाद् अतिरिक्तं वाच्यम्, अन्यस्य दुर्वचत्वात्। एवं च सति यदि सामान्येन विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुत्वम् उच्यते, तदा घटज्ञानात् पटविशिष्टबुद्ध्यापत्तिर्दुर्वारा, यतः घटस्यापि क्वचित् प्रकारकत्वात्। अतो घटविशिष्टबुद्धिं प्रति घटज्ञानत्वेन तथा पटविशिष्टबुद्धिं प्रति पटज्ञानत्वेन इत्यादिरीत्या विशिष्यैव कार्यकारणभावो वक्तव्यः। एवं च सति कार्यकारणभावस्य प्रतिव्यक्तिभेदेन भिन्नतया अभावत्वविशिष्टबुद्धिस्थले विशेषणज्ञानस्य कारणत्वं नैव कल्प्येत, फलानुरोधित्वात् कल्पनायाः। अतः इदं तम इत्यत्र तेजस्त्वेन तेजोज्ञानं विनापि न अनुपपत्तिः, तथा च विशेषणज्ञानं विना यत्र विशिष्टबुद्धिः नोत्पद्यते, तत्रैव विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य कारणत्वं कल्प्यम्। अतो घटादिज्ञानं विना घटादिविशिष्टबुद्धेरनुदयात् तत्र पूर्वोक्तरीत्या कार्यकारणभावः कल्प्यते। अत एवोक्तं दिनकर्याम्—'विशेषणभेदेन हेतुताया भिन्नत्वेन तत्र तद्धेतु-त्वानुपगमात् फलानुरोधित्वात् कल्पनाया इति'[1]।

वस्तुतस्त्वयं पक्षो न संगच्छते। जात्यखण्डोपाध्यतिरिक्तपदार्थस्य स्वरूपतः प्रकारत्वेन भानानुपगमात्। अपि च, यदि निरवच्छिन्नप्रकारताश्रयीभूतं 'घटो नास्ति' इत्यादिप्रतीतिविषयीभूतम् अभावत्वं स्यात्, तर्हि तस्य अखण्डत्वं कथं वार्यते? यतः जात्यखण्डोपाध्यादेरिदमेव अखण्डत्वं यद् निरवच्छिन्नप्रकारताश्रयत्वम्। तथा च सति 'नास्ति' इति प्रकारीभूतधर्मस्य अखण्डोपाधित्वं सिद्धमेव इति दिक्।

---

१. सि० मु० पृ० ९६।

द्वितीयोऽध्यायः

अभावस्वातन्त्र्यविचारः

(क) प्रमेयतया अभावम् अनङ्गीकुर्वतां प्राभाकराणां मतम्

एतावता प्रबन्धेनानुभवसाक्षिकः कश्चित् पदार्थः अभावो नामास्तीति किञ्चिदालोचितम्। तत्र अभावस्य पदार्थत्वविषये केचित् पुनः वैमत्यमावहन्ति। तथा हि 'इदमिह नास्ति' इति प्रतीत्या इदन्तावच्छिन्ने धर्मिणि किञ्चिद्धर्मावच्छिन्नप्रतियोगिताकाभावः प्रकारविधया भासत इत्यत एव धर्मिणोऽतिरिक्तस्य प्रकारीभूतस्याभावस्य स्वतन्त्रतया पदार्थत्वं यद् अभाववादिभिरङ्गीकृतम्, तन्नैव युज्यते, यतोऽनुभवसाक्षिकतयैव यदि पदार्थानाम् अस्तित्वं स्वीकर्त्तव्यं स्यात्, तदा प्रणिहितेन मनसा चिन्तनीयं यत् 'भूतले घटो नास्ति'त्यादौ प्रतीतौ भूतलत्वावच्छिन्नधर्मिण एव ग्रहः स्यात्, न तु तत्र प्रकारविधया अभावोऽपि कश्चित् प्रतीयते, यतस्तत्र भूतलं पश्यन्नेव जनो घटो नास्तीति व्यवहर्रति। अत एव तत्र दृश्ये प्रतियोगिनि तदेकविषया या बुद्धिः, सैव तदभाव इति व्यपदिश्यते।

१. नास्तीत्यादिवाक्यानाम् अर्थप्रदर्शनम्

तथा चोक्तं प्रकरणपञ्चिकायां शालिकनाथेन—'भावानामवगतिर्द्विधा—एका तावद् भावान्तरसंसृष्टविषया, अपरा च तदेकविषया। यापि च सा तदेकविषया बुद्धिः, सापि च द्विधा—प्रतियोगिनि दृश्ये, अदृश्ये च। तत्र दृश्ये प्रतियोगिनि या तदेकविषया बुद्धिः, सैव तस्य प्रतियोगिनः अभाव इत्युच्यते'[1] इति।

२. घटाभाववद् भूतलम् इत्यादिप्रतीतेः अर्थप्रदर्शनम्

अपि च, अभावस्य पदार्थम् अङ्गीकुर्वन्तोऽपि दार्शनिका दृश्ये प्रतियोगिनि तदेकविषयां बुद्धिमेव अभावज्ञानार्थम् अनुमन्यन्ते। तथा हि अत्र यदि घटः स्यात्, तर्हि घटवत्तया उपलभ्येत—इति प्रतियोग्यारोपेण तत्र तेषाम् अभावज्ञानं सिध्यति। एवं च सति दृश्यस्य अदर्शनमेव अभावप्रतीतौ कारणम्, तर्हि अदर्शनं यदि कारणं स्यात्, तदा तत्र केवलं दृश्यादर्शनम् इत्येवास्तु, किं पुनः अभावाख्यस्य प्रमेयस्य स्वीकरणेन। यत्र भूतले घटो न दृश्यते, तत्र भूतलमात्रं दृश्यते—इत्यनेनैव उपपत्तौ भूतलातिरिक्तम् अभावाख्यं वस्तु प्रमेयतया कथं नाम अङ्गीक्रियते? न हि भूतलप्रत्यक्षं

---

१. प्र० प० ६, पृ० २८६–२८७।

विना तत्र घटाभावप्रतीतिर्वादिनामपि आनुभविकी, अतस्तत्र भूतलज्ञानमात्रम् इत्येवमुच्यताम्, किं पुनः अभावस्वीकरणेन ?

३. अभावप्रतीतिं प्रति दृश्यानुपलब्धेः कारणत्वनिराकरणम्, तत्रैव घटध्वंसवत् कपाल-प्रत्यक्षेण अभावस्वीकार आवश्यक इति पूर्वपक्षमतोल्लेखः

अत एव तेषां मते भावान्तरमभावो हि कयाचित्तु व्यपेक्षया इति सिद्धान्तः सङ्गच्छते। अत एवोक्तं प्रकरणपञ्चिकायामपि—'तुल्योपलम्भयोग्यार्थान्तरदर्शनेन दृश्यानुपलम्भः अवधार्यते, अतो दृश्ये प्रतियोगिनि तदेकविषयोपलब्धिरेव वरम् अभावोऽस्तु'[1] इति।

ननु यदि अभावो नास्त्येव, तर्हि कपालादौ पूर्वं प्रतीयमानो घटो मुद्गरादि-प्रहारेण तस्य विनाशे कथं तत्र पूर्ववद् घटबुद्धिर्नाविर्भवति ? यतः प्राक् कपालादौ घटसंसृष्टबुद्धिरासीत्, मुद्गरप्रहारानन्तरं च न तथाविधा बुद्धिः। अतः पूर्वापरप्रत्यययोः प्रमेयवैलक्षण्यं विना कथं भिन्नविषयत्वम् ? अपि च यत्तु केवलं दृश्यादर्शनमात्रमेव अभावबुद्धौ कारणमित्युक्तम्, तदपि न युक्तम्, अनुमानादिभिरपि अभावस्यावगम-सम्भवात्।

तद्यथा—गगनं मेघाभाववत्, उज्ज्वलसौरालोकदर्शनात्। अत्र च मेघाभाव-वत्तया प्रतीयमानस्य गगनस्य प्रत्यक्षायोग्यत्वेन केवलम् अनुमानमेव मेघाभावनिर्णये प्रमाणम्। न च तत्र मेघादर्शनमेव इत्यपि वाच्यम्, गृहान्तर्वर्त्तिनो जनस्य गवाक्ष-जालनिपतितसूर्यकिरणदर्शनाद् मेघाभावानुमानं यत्र स्यात्, तत्र मेघस्य दर्शनादर्शनयो-स्तुल्यतया न तत्र मेघादर्शनमेव मेघाभावनिर्णायकं वाच्यम्, यतो गृहान्तर्वर्त्तिनो यथा मेघसन्दर्शनं न सम्भाव्यते। अतो विनापि मेघादर्शनं तत्र मेघाभावानुमानं परिनिष्पन्नं स्यात्। अतो न केवलम् एकदेशमात्रबुद्धिविषयतया तत्रत्यमेघाभाव उपपादयितुं शक्येत। अतोऽस्त्येव 'अभावः' स्वतन्त्रः पदार्थः प्रमेय इति चेत्, उच्यते—यत्र कपालादौ घटादिकं पूर्वं संसृष्टम् आसीत्, तत्रैव मुद्गरप्रहारादिकम् अभावबुद्धौ कारणमिति भवता स्वीकृतम्—एवं चेत् प्राभाकरैरपि वक्तुं शक्यते यद् यथायथकारणोप-निपातादेव तदेकविषया बुद्धिः सम्भवति। अत एव मुद्गरादिप्रहारानन्तरमपि कपालादौ केवलं तदेकविषया बुद्धिरेव प्रवर्त्तते, मुद्गरादिप्रहारात् पूर्वं घटादिसंसृष्ट-दशायां न केवलं कपालैकविषया बुद्धिः सुतरां जायते, मुद्गरप्रहारादिकारणाभावात्।

४. प्राभाकरमतेन तत्खण्डनम्

तथा चोक्तं प्रकरणपञ्चिकायाम्—'यस्य यत्र भाव आसीत्, कथं तस्य तत्राऽभाव इति। स चेत् पर्यनुयुक्तो ब्रूते यत् कारणोपनिपातवशेन तस्मिन्नेव अभावो

---

१. प्र० प०—६, पृ० २८७।

जायत इति, ततो वयमपि वदितुं शक्ताः कारणोपनिपातादेव तदेकविषया बुद्धिर्भवति"[1] इति। अतो यथा घटादिसंसृष्टदशायां तत्तत् कारणवशादेव संसृष्टबुद्धिरासीत् मुद्गरादिप्रहारानन्तरं च भावान्तरोदय एव कपालाद्येकविषयबुद्धौ कारणम्।

न च निरन्तरविनाशशालिनां प्रत्ययानां कस्य भावान्तरोदय इति वाच्यम्, धर्मिणः स्वरूपमात्रेण अवस्थानभेदस्यैव भावान्तरोदयत्वेन ग्राह्यत्वात्। न च कपालादिस्वरूपमात्रं तावद् घटादिसंसृष्टदशायामपि यथा स्थितम्, तथैव घटादिविनाशानन्तरं स्थितमेव इति अवस्थाभेदेऽपि स्वरूपस्य अवैलक्षण्यम्। अतो घटसंसृष्टदशायां यादृशं स्वरूपं घटविनाशानन्तरमपि कपालादेः, तथैव स्वरूपम् इति कुतो भावान्तरोदय इति। तस्माद् धर्माभाव एव तदानीं कपालादिधर्मिस्वरूपमात्रं अङ्गीकरणीयं वाच्यम्, पूर्वमेव दत्तोत्तरत्वात्।

५. भावस्य अवस्थाद्वयावगाहिप्रतीतिदर्शनम्

तथा हि भावातिरिक्तः अभावो नास्ति इत्येव प्राभाकरसिद्धान्तः। भावस्तु क्वचिदेकाकी, स क्वचित् सद्द्वितीयश्चेति अवस्थाद्वयं भजते। तत्र यदा एकाकी, तदैव भावस्वरूपमात्रमुच्यते। एष एव एकाकी भावः परैः विनाशादिशब्दैः अभिधीयते। तथा चोक्तं प्रकरणपञ्चिकायाम्—'न भावातिरिक्तः अभावः अङ्गीक्रियते, भाव एव तु एकाकी सद् द्वितीयश्चेति द्वयीमवस्थामनुभवति। तत्र एकाकी भावस्वरूपमात्रमुच्यते। योऽपि च अभावाख्यं तत्त्वान्तरम् अभ्युपैति, तेनापि तावद् एकाकिभावोपलम्भनमाश्रित्य अभावप्रमितिरङ्गीकरणीया, न ह्यप्रतीते भावे अभावः प्रतीयते'[2] इति।

६. प्रभाकरमतोपसंहारः

(ख) अभावस्य प्रमेयत्वमङ्गीकुर्वतां भाट्टमीमांसकानां मतम्

अत्रोच्यते भाट्टमीमांसकैः—अत्र भूतले घटो नास्ति इति व्यवहारस्य यदि केवलं भूतलमात्रविषयकं ज्ञानं कारणं स्यात्, तदा पटादिवत्यपि भूतले घटो नास्तीति व्यवहारो न सम्भवेत्, तत्रापि भूतलातिरिक्तस्य पटस्य सत्त्वेन भूतलमात्रविषयकस्य ज्ञानस्य असम्भवात्। अथ यदि घटासमानकालीनभूतलमेव घटाभाववद् भूतलम् इति व्यवहारं प्रति हेतुः स्यात्, तत्रेदं पृच्छ्यते किमिदं घटासमानकालीनत्वं नाम? यदि भूतलमात्रम्, तदा घटवत्यपि भूतले घटो नास्तीति व्यवहारः कथं वार्येत? यदि तु भूतलातिरिक्तं घटसंयोगाविद्यमानत्वम्, तर्हि अभावः प्रमेयतया अनिच्छतोऽपि भवतो बलादापतितः।

---

१. प्र० प० ६, पृ० २२८।   १. प्र० प० ६, पृ० २८९।

तथा चोक्तं शास्त्रदीपिकायाम्—'घटोऽत्र भूतले नास्ति इति व्यवहारस्य किं कारणम् ? दृश्ये घटे यद् भूतलमात्रविषयं ज्ञानम्, तदस्य कारणम् इति चेत्, तथा सति पटवद्भूतलोपलम्भे 'घटो नास्ति' इति व्यवहारो न स्यात्, भूतलमात्रोपलम्भाभावात्। घटविविक्तभूतलोपलम्भ इति चेत् कोऽयं घटविवेकः ? यदि भूतलस्वरूपमेव घटवत्यपि प्रसङ्गः, घटसंयोगाभावः चेद् अङ्गीकृत, तर्हि अभाव' इति।

७. दृश्यादर्शनस्यैवाभावोपलब्धिकारणत्वम्

ननु अभाववादिनां मतेनापि अभावज्ञानं प्रति किञ्चित् कारणं वाच्यमेव, तच्च प्रतियोग्यदर्शनादिकम् इति तदेव भूतलैकविषयबुद्धौ कारणमिति चेत्, तत्रोच्यते—दृश्यस्य वस्तुनो यद्दर्शनम्, तदेव अभावबुद्धौ कारणम्, अदर्शनं च दर्शनाभावो भवद्भिः नाङ्गीकृतः, अभावस्वीकारप्रसङ्गात्।

अपि तु भूतलैकविषयबुद्धौ यत् कारणम्, तच्च घटवद्भूतलबुद्धौ नास्ति इति भवता अङ्गीकृतम्, अन्यथा अत्र कारणम् अस्ति—अत्र कारणं न इत्यनयोः प्रत्यययोरवैलक्षण्यापत्तेः। एवं च सति कारणाभावस्वीकारात् प्रमाणाभावान्तर्गततया अभावो यदि स्वीकृत एव, तर्हि प्रमेयरूपेण प्रमेयाभावरूपेण वा अभावाङ्गीकारे कोऽपराधः ?

इदमत्रावधेयम्—यस्याम् अवस्थायां केवलं भूतलस्वरूपज्ञानम्, घटतदभावयोश्च अज्ञानम्, तादृशावस्था घटवद्ज्ञाने घटाभाववद्ज्ञाने वा वर्त्तते न वा ? वर्त्तते चेद् भूतलमिति, घटाभाववद् भूतलमिति च व्यवहाराणामविशेषप्रसङ्गः, तुल्यकारणत्वात्। अथ यदि अवस्थाभेदः स्वीक्रियेत, तदा स भेदः यद् वशात् सम्पद्यते, तदपि विलक्षणमेव स्वीकर्त्तव्यम्। तथा च भूतलमिति ज्ञानं यत्र स्यात्, तत्र यादृशं कारणं वर्त्तते, घटवद्भूतलमिति ज्ञानस्थले न केवलं तादृशमेव कारणम्, तथा सति भूतलमिति घटवद्भूतलमिति व्यवहारवैलक्षण्यं न सिध्येत्, एवं च घटाभाववद् भूतलमिति अत्रापि भूतलमिति घटवद्भूतलमिति व्यवहारकारणापेक्षाया किञ्चित् कारणान्तरं स्वीकर्त्तव्यम्, तच्च कारणान्तरं घटादिप्रमेयाभावं विना नान्यत् किञ्चिदपि भवितुमर्हति।

८. भूतलं घटवत्, भूतलं घटाभाववदिति प्रतीतिद्वयवैलक्षण्योपपत्तये अभावस्य प्रमेयत्वं स्वीकर्त्तव्यम् इति भाट्टसिद्धान्तप्रदर्शनम्

अतः प्रतियोग्यनुपलब्धिवशादेव अभावप्रतीतेः सर्वानुभविकतया न अभावम् अनङ्गीकर्तुं शक्यते। यत्र च चाक्षुषप्रत्यक्षकारणकलापसत्वेऽपि भूतलादौ पटाद्युप-

---

१. शास्त्रदीपिकायाम् १।२।५, पृ० ८४।

लब्धिदशायां घटो न उपलभ्यते, तत्र सुतरां घटाभावः पांसुलचरणैः ह्यालिकैरपि निर्णेतुं शक्यः, अतस्तत्र घटाभावप्रतीतेः कथमपि अनङ्गीकरणं न प्रेक्षावतां युक्तम्। अत एव इदं परिनिष्पन्नं यन्न केवलं भूतलादिसत्तामात्रेणैव घटाभावबुद्धिः व्यवस्थापयितुं शक्यते, यतो घटसंसृष्टदेशेऽपि भूतलस्वरूपस्य सत्त्वेन, तत्र भूतलबुद्धौ सत्यामपि न घटाभावबुद्धिः, तस्माद् योग्यानुपलब्धौ एव अभावज्ञानम् इति अभावस्य ज्ञानविषयत्वं सिद्धमेव।

ननु योग्यानुपलब्धिरेव सर्वत्र अभावबुद्धौ कारणमिति कथं निर्णेतुं शक्यते, न हि स्फीतालोकवत्यपि भूतले पटादौ इन्द्रियसन्निकर्षे पटवद्भूतलमिति ज्ञानसत्त्वेऽपि घटाभाववद्भूतलमिति सर्वत्रावधारणं न भवेत्, तस्माद् योग्यानुपलब्धिर्न अभावाधिकरणमिति चेत्, तत्रोच्यते—'यत्र योग्यानुपलब्धिः कारणं भवेत्, तत्र तु योग्यत्वं विद्यमानमपि यत्र अज्ञातम्, तत्र नाभावधीः। एवमसत्यपि योग्यत्वे यदि भ्रान्तिवशाद् निश्चितं स्यात्, तत् तर्हि भ्रान्तिज्ञानविषयीभूतस्यापि योग्यत्वस्य अभावबुद्धिकारणत्वं भवत्येव, तस्माद् अभावाख्यं प्रमेयं स्वीकर्त्तव्यमेव'[1]।

(ग) वैशेषिकमतानुसारेण प्राभाकरमतखण्डनम्

९. भूतलादिविशेष्यातिरिक्ततया विशेषणत्वेन घटाभावादीनां स्वीकारः कर्त्तव्यः

भूतलमस्ति,घटाभाववद्भूतलम्, घटवद्भूतलम् इत्येतेषां प्रत्ययानां वैलक्षण्यं प्राभाकरमेते नोपपन्नम्, तथा हि भूतले घटो नास्तीत्यत्र केवलं भूतलस्वरूपेणैव प्रतीतिः स्वीकर्त्तव्या, तद् घटशून्यत्वं विना नान्यत् किञ्चित् वक्तुं शक्यते। एवं भूतलं घटाभाववदित्यत्र विशेष्यतया भूतलस्य, विशेषणतया च घटाभावस्य प्रतीतिः अनुभवसिद्धा। तत्र यदि घटाभाववद् भूतलम् इत्यत्र घटाभावोऽपि भूतलस्वरूपमेव, तर्हि घटाभावे विशेषणतया अवगाहमाने यथा प्रतीतिविषयः तथैव भूतलस्यापि विशेषणत्वं तत्र युक्तम्। तच्च पुनर्न सम्भवति, न हि भूतले भूतलमिति प्रतीतिः सङ्गच्छते।

तथा चोक्तं प्रशस्तपादभाष्यसेतुटीकायाम्—'कैवल्यस्य घटशून्यत्वरूपतया अभावस्वीकाराद् भूतलस्य भूतलावृत्तितयाऽऽधाराधेयभावानुपपत्तेः'[2]।

---

१. पादटीका—'यत्तु सत्यामपि योग्यानुपलब्धौ अथवानवधारणम्, असत्यां च अवधारणम् इति, तत्तु योग्यत्वाज्ञानकृतम्, न सत्तामात्रेण, ततः सदेव योग्यत्वं कदाचित् अज्ञातम् अवधारयति, कदाचित्तु अविद्यमानमेव योग्यत्वं भ्रान्त्या निश्चित्य अभावम् अवधारयति, उपलब्ध्य भावस्तु सन्मात्रतया कारणम्—न ज्ञाततया। तेन न अनवस्थापत्तिरिति सर्वमवदातम्, अतः अस्ति अभावाख्यं प्रमेयम्' (शास्त्रदीपिकायाम्—२।२।२, पृ० ८६)।

२. प्रशस्तपादभाष्ये सेतुटीकायाम्—पृ० ८०।

१०. प्रत्यक्षं प्रति कार्यकारणभावविचारेणापि अभावस्य उपयोगित्वव्यवस्थापनम्

न च यत्र भूतले घटः प्रत्यक्षीक्रियते, तत्र भूतलातिरिक्तस्य घटस्यापि चक्षुः संयुक्ततया केवलं भूतलमिति प्रतीतिर्न स्यात्, यत्र च पुनः घटे न चक्षुः सन्निकृष्टः, भवद्भिरभावविषयावगाहिनीति कल्प्यते। युक्तिप्रणीहितेन मनसा विचारीक्रियते तत्र भूतलातिरिक्तो नाभावः चक्षुःसन्निकृष्ट इति घटवद्भूतलभिन्नं भूतलमेव अभावत्वेन भवद्भिः उपकल्प्येत इति वाच्यम्, यस्मिन् भूतले पूर्वं घट आसीत्, पश्चात् च घटशून्ये तद् भूतले अपि घटवद्भिन्नत्वस्य अभावः, स्वरूपभेदस्य व्याप्यवृत्तित्वनियमात्। तथा हि घटे यः पटभेदः, स खलु सर्वेषु कालेषु, सर्वेषु देशेषु च वर्त्तत एव। अतो घटस्वरूप एव तत्र पटभेदसाधक इति स्वरूपभेदस्य व्याप्यवृत्तित्वमवश्यम् अङ्गीकर्त्तव्यम्।

अपि च, प्रतियोगिमद्भेदवत्त्वमेव अनुयोगिस्वरूपमिति स्वीकार एव दुःशकः, तथा सति गगनाभाववद्भूतलमित्यत्र कथमपि नोपपद्यते। तथा हि भवन्मते गगनवद्भूतलभिन्नत्वमेव गगनाभाववद् भूतलमिति वक्तव्यम्। तत्र गगनस्य अवृत्तेस्तद्वत्त्वमेव न प्रसिध्यति। तथा चोक्तं तत्रैव सेतु टीकायाम् (पृ० ८०)—'पूर्वं घटवति, पश्चाद् घटशून्ये घटवद्भिन्नत्वाभावात् स्वरूपभेदस्यापि व्याप्यवृत्तित्वाद् अवृत्त्यत्यन्ताभावे तद्वतः अप्रसिद्धेश्च' इति।

११. प्रागभावभेदात्यन्ताभावप्रतीतीनां प्राभाकरमते नोपपत्तिरिति प्रतिपादनम्

एवमत्र कपाले घट उत्पत्स्यते, कपालश्च घटभिन्नः, तथा कपाले घटो नास्तीति प्रतीतीनां वैलक्षण्यं प्राभाकरमते नोपपद्यते, यतस्तन्मते सर्वत्रैव कपालस्वरूपमेव प्रतीतिविषयः। कपालस्वरूपं च पुनः अविलक्षणम्, अतो विलक्षणप्रतीतिस्तत्र न सिध्यति।

१२. अभावस्य कालविवेषस्वरूपत्वखण्डनम्

ये च पुनः कालविशेषसम्बन्ध एव तेषामपि असम्यग्वस्तुस्थितिनिर्धारणम्। तथा कालविशेष इत्यत्र गतवैशिष्ट्यं घटसंयोगासंयोगाभ्यां निरूपणीयम्, तथा च सति यत्र काले घटो विद्यते, तथाविधस्य कालस्य घटासंयोगोऽस्ति। यस्मिन् काले पुनः घटो घटसंयोगोऽपि नैव विद्यत इति घटभावाभ्यामेककालगतवैशिष्ट्यं निरूपणीयम्, अतः अभावमनङ्गीकुर्वता कथङ्कारं कालविशेषोऽपि निर्णेतुं शक्यते ?

वस्तुतस्तु यस्मिन् भूतले घटोऽस्ति इति प्रतीतिः, तत्र घटो नास्तीति प्रतीतिः न स्यात्। अपि तु, घटाभावाभावोऽस्ति इति प्रतीतिः स्यादेव। अत्र यदि अभावाख्यः कश्चन पदार्थः प्रमेयतया नाङ्गीक्रियते, तर्हि अत्र घटाभावाभावोऽस्ति, अत्र च

घटाभावो नास्ति, अत्र च पुनः घटो नास्ति—इत्यादिप्रतीतीनां वैलक्षण्यं न कथमपि निर्धारयितुं शक्यते ।

१३. प्राभाकरमते प्रतिबध्यप्रतिबन्धकभावानुपपत्तिप्रदर्शनम्

नापि प्रतिबध्यप्रतिबन्धकभावोऽपि प्राभाकरमते उपपद्यते । तथा हि भूतलत्वावच्छिन्नविशेष्यकसंयोगसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रकारताकबुद्धिं प्रति भूतलत्वावच्छिन्नविशेष्यकसंयोगसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रतियोगिताकाभावबुद्धिः प्रतिबन्धिका । अत्र यदि घटाभाववद्भूतलमित्यस्य केवलभूतलविषयकत्वमेव तत्र स्यात्, तर्हि घटवद्भूतलम् इति ज्ञानं घटाभाववद्भूतलम् इति ज्ञानं प्रतिबन्धकं न स्यात् । न हि प्रमेयपदार्थास्तित्वं विना अपरस्य प्रतिबन्धकत्वं सम्भवेत् । तस्माद् यदि अभावो नाम पृथिव्या विलुप्येत, तर्हि घटवद् भूतलमिति ज्ञानं कः प्रतिबध्नीयात् ? न हि आलोकपदार्थस्य असत्त्वे अन्धकारप्रतिबन्धक आलोक इति वचनीयं स्यात् । तस्मात् सर्वत्रैव वस्तुस्थितिद्वारा प्रतिबध्यप्रतिबन्धकभावः कल्पनीयः । अतो घटाभावस्य असत्त्वे घटवद्भूतलम् इति बुद्धिर्न केनापि प्रतिबन्धितुं शक्यते ।

अपि च अभावत्वावच्छिन्नप्रकारताकबुद्धेरनुव्यवसायकाले घटाभावं जानामि इत्यनेनैव अभावत्वप्रकारकप्रमाज्ञानानुसारिणी अनुव्यवसायबुद्धिः स्यात् । न तु घटशून्ये भूतले भूतलं जानामि इति प्रत्ययः ।

१४. अनुव्यवसायतोऽपि अभावसिद्धिः

इदमत्रावधेयम्—कण्टकाद्यभाववति भूतले पादचारणादिव्यवहारः कण्टकाद्यभावावधारणपूर्वकमेव स्यात् । यदि तु अभावो नाम कश्चिन्नास्ति, तर्हि भूतलमात्रोपलम्भात् कण्टकादिज्ञानं न सम्भवेत् । सत्स्वपि कण्टकेषु तत्र 'नास्ति' इति बुद्धिः सम्भवति । न च भूतलमात्रधीरेव कण्टकाद्यभावावधारणबुद्धिरित्यपि साम्प्रतम् । तत्र 'मात्र'शब्देन किञ्चिद् व्यवच्छिद्यते न वा ? यदि न किञ्चिद् व्यवच्छिद्यते, तर्हि अनर्थकः 'मात्र'शब्दः । अथ व्यवच्छिद्यते—अस्ति तर्हि व्यावृत्तिविषयः । स च विषयः अभावादन्यो नैव स्यात् । न च अभावस्य कारणं कल्पनालाघवात् तन्मात्रधीरेव स्यात् इति वाच्यम्, न हि प्रामाणेन अवगतस्य अर्थस्य कल्पनालाघवात् परित्यक्तुं शक्यते ।

१५. व्यवहारतोऽपि अभावस्वीकार आवश्यक इति प्रदर्शनम्

किं बहुना—यदि अभावस्य प्रामाण्यं नाङ्गीक्रियते, तर्हि सर्वं सर्वेण सङ्कीर्येत, तथा हि क्षीरे दधि नास्ति, दध्नि च क्षीरं नास्ति इति प्रमाणसिद्धव्यवहारः । तत्र यदि अभावो नैवाङ्गीक्रियते, तदा क्षीरे दधि, एवं दध्नि क्षीरमित्यपि स्यात् । किं

बहुना—शशे शृङ्गं नास्ति इति व्यवहारासम्भवेन शशे शृङ्गमित्यपि व्यवहारः स्यात्। तथा चोक्तं श्लोकवार्त्तिके—

वस्तुसंकरसिद्धिश्च तत्प्रामाण्यसमाश्रया।
क्षीरे दध्यादि यन्नास्ति प्रागभावः स उच्यते ॥२॥
नास्तिता पयसो दध्नि प्रध्वंसाभाव इष्यते।
गवि योऽश्वाद्यभावस्तु सोऽन्योन्याभाव उच्यते ॥३॥
शिरसोऽवयवा निम्ना वृद्धिकाठिन्यवर्जिता।
शशशृङ्गादिरूपेण सोऽत्यन्ताभाव उच्यते ॥४॥
क्षीरे दधि भवेदेवं दध्नि क्षीरं घटे पटः।
शशे शृङ्गं पृथिव्यादौ चैतन्यं मूर्तिरात्मनि[1] ॥५॥

१६. अभावस्य प्रमेयत्वखण्डनार्थं पुनराशङ्का, तन्निरसनं च

अथ यदि मन्यसे घटाभाववद् भूतलमित्यादौ घटादेः अप्रतीयमानतया घटो न प्रतीयत इत्येवमर्थो व्यवहारविषयतया सिध्यति। न च तेन भूतलसत्तातिरिक्तस्य अभावस्य प्रमेयत्वं युक्तिसिद्धम्, इति चेत्, तत्रोच्यते वैशेषिकैः—सत्यपि घटे कुतश्चित् प्रतिबन्धाद् न प्रतीयते घट इति व्यवहारः स्यात्। न तु पुनस्तत्र घटो नास्ति इति व्यवहारः सम्भवेत्। अतो घटो न प्रतीयत इत्यनेन घटाभाववद् भूतलमिति प्रतीतिसिद्धस्य पदार्थस्य न गतार्थत्वम्। किं बहुना—घटो भविष्यति इत्यनेन यः प्रागभावः प्रतीयते, तथा घटो विनष्ट इत्यनेन घटाध्वंसः, तथा घटो नास्ति इत्यनेन घटात्यन्ताभावः, तथा घटो न पटः इत्यनेन प्रतीयमानोऽन्योन्याभावः प्रतीतिभेदाद् वैलक्षण्यम् आवहति। अतः प्रतीतिसाक्षिकतया अभावस्य वस्तुत्वमङ्गीकरणीयम्।

तथा चानुमानम्—अभावो वस्तु चतुर्धा भेदाद् द्रव्यादिवत्। तथा चोक्तं श्लोकवार्त्तिके—

न चावस्तुनः एते स्युर्भेदास्तेनास्य वस्तुता।
कार्यादीनामभावः को यो भावः कारणादिना[2] ॥८॥

(घ) अभावस्य तत्त्वान्तरत्वमनङ्गीकुर्वतां बौद्धानां मतम्, तत्र भाट्टमीमांसकानाम् उत्तरं च

१७. स्वेतरव्यावृत्तस्यैव वस्तुस्वरूपत्वेन भावेतरव्यावर्त्तकाभावाद् अभावो न तत्त्वान्तरमिति पूर्वपक्षः

अथ केचिदपरे एवं प्रत्यवतिष्ठन्ते—तथा हि वस्तूनि प्रत्यर्थनियतत्वेन स्व-स्वरूपात्मना परस्परं भिद्यन्ते, यथा नीलादयः। तथा च नीलमित्युक्तौ विजातीयेतर-

१. श्लोकवार्त्तिके—अभावपरिच्छेदे। २. तदेव।

भेदमात्रमवगाह्यते—अनीलव्यावृत्तं नीलमित्यर्थः। तस्माद् येषां प्रत्यक्षादिप्रतीति-योग्यं सजातीयेतरभेदस्वरूपं किञ्चित् सिध्यति, तेषामेव स्व-स्वरूपेण स्वेतरव्यावर्त्तक-तया भेदः सम्भवेत्। अभावस्य च पुनः भावात् किञ्चित् भेदकं नोपलभामहे। यतः प्रत्यक्षयोग्यस्यैव स्वेतरव्यावर्त्तकत्वं प्रमाणसिद्धम्। अभावस्तु नैव प्रत्यक्षसिद्धः। प्रत्यक्षस्य सतत्त्वनियतत्वात्। अभावस्य तु तुच्छत्वाद् न प्रत्यक्षयोग्यत्वम्। तस्माद् अभावो न किञ्चित् तत्त्वान्तरम्। अभावव्यवहारस्तु नास्तीति विकल्पशब्दप्रयोगात्मा भावाश्रय एव कथञ्चिद् उपपादनीयः, न तु एकाकारप्रतिनियतादन्यासंसर्गिणी भावादन्योऽभाव इति। उक्तं च—'भावादन्यः अभावोऽस्ति न कश्चिदनिरूपणात्'। अत्र भाट्टैः प्रत्युच्यते—नास्तीति व्यवहारो विकल्पप्रयोगात्मा इति यदुक्तं भवद्भिः, तेनैव अभावस्य पदार्थस्य भवन्मतप्रक्रियया सिद्धिरापतिता, तथा भवन्मते विकल्पो नाम—अभिलापसंसर्गयोग्यप्रतिभासा प्रतीतिः कल्पना[1]" इति।

१८. शब्दप्रयोगस्य कल्पनात्मकत्वेन अभावाख्यवस्त्वभावे अभावशब्दानुपपत्तिरिति उत्तरपक्षः

तथा हि वाचकेन शब्देन वाच्यस्य अर्थस्य सम्बन्धज्ञानमेव कल्पनासंज्ञां लभते। ततो यदि अभावो नाम कश्चिदर्थ एव नास्ति, तर्हि नास्तीति व्यवहारस्य विकल्प-प्रयोगात्मकत्वं नैव सङ्गच्छते। तस्माद् यदि नास्तीतिशब्देन किञ्चिदिह प्रत्याय्यते, तर्हि तथाविधः प्रत्ययो विकल्पो भवेत्, यस्य च न स्वरूपं किञ्चिदस्ति, तदेव निर्विकल्पकं शब्दाद्यविषयं सम्भवति। अत एव ततस्वरूपमाश्रित्य शब्दादिप्रयोगे कृते शब्दजन्यस्य तथाविधस्य बोधस्य कल्पनाप्रभवतया विकल्पत्वं सङ्घटते। अत्र यदि अभावस्य स्वरूपमेव किञ्चिन् नास्ति, तर्हि किमाश्रित्य कल्पना प्रवर्त्तते। अथ यद्येवमुच्यते यद् यथा जात्यादीनां असत्त्वेऽपि समारोपितविषयतया विकल्पविज्ञानं तत्र प्रवर्त्तते, एवम् अभावोऽपि स्यात्।

न चानेन अभावविकल्पो दुष्यति इति चेत्, तत्रोच्यते भाट्टैः—वस्तुतः स्वरूप-सिद्धावेव एकत्र स्थितस्य तस्य अन्यत्र समारोपः सम्भवेत्। दृश्यते तु रज्जुसर्पादि-समारोपस्थले अन्यत्र प्रसिद्धस्य वस्तुभूतस्यैव सर्पस्य रज्वां समारोपः। अत्र च पुनः यदि अभाव एव वस्तुभूततया नाङ्गीक्रियेत, तर्हि आकाशकुसुमादीनामिव अभावाना-

---

१. सूत्रार्थः—अभिलप्यते उच्यते अनेन इति अभिलापः वाचकः शब्दः। स च संकेतकालेन दृष्टेन रूपेण ऐक्यम् आपादितः। अन्तर्जल्पाकारस्तथा प्रतिभासमानो वाच्योऽभिलापेन वाचकेन संसर्गः सम्बन्धः। अभिलापसंसर्गाय योग्य इति अथकथनमिदम्। अभिलाप-संसर्गाय योग्य अभिधेयाकाराभासो यस्यां प्रतीतौ, सा कल्पना इति सूत्रार्थः (न्यायबिन्दौ-२१५)।

मपि समारोपः कथङ्कारं स्यात्? न च कल्पिताकारभेदानध्यवसायाद् एकत्वाध्यवसाय एव समारोप इत्यपि वाच्यम्, यदि पूर्वापरयोः एकत्वाध्यवसायः सम्भवेत्, तदैव पुनः एवं रीत्या समारोपोऽपि कल्पयितुं शक्येत। क्षणिकत्ववादिनां च बौद्धानां मते उत्पन्नविनष्टानां वस्तूनां पौर्वापर्यभावेन एकत्वप्रतिसन्धानमेव न सङ्गच्छते। तस्मात् तया रीत्या समारोपः कल्पयितुं न युज्यते। एवम् असति च विपर्यये समारोपत्वाभिधानमलीकमेव स्यात्। तस्मात् "नास्ति" इति एकशब्दोपसृष्टं किञ्चिद् भाववद् अभावाख्यमपि स्वरूपं किञ्चिदवस्थितं सिध्यति।

१९. मुद्गरादिप्रहारेण घटानुपलब्ध्यापि अभावः सिध्यतीति प्रदर्शनम्

अपि च, यदि अभाव एव नास्ति, तर्हि मुद्गरादिप्रहारे कृते घटस्य अनुपलब्धिः कथम्? न च विनष्टत्वाद् अनुपलब्धिरिति वाच्यम्, विनाशस्य अभावत्वानतिरेकात्। तथा हि मुद्गरादिप्रहारात् प्राक् कम्बुग्रीवादिमत्त्वावच्छिन्नस्य घटस्य जलाहरणाद्यर्थक्रियाकारित्वमुपलभ्यते। प्राहृते च मुद्गरेण नैव तथा इति घटस्य अनुपलम्भे विना विनाशं न किञ्चत् कारणमुपलभ्यते, विनाशस्तु अभाव एव।

अत्र पुनरपि बौद्धानामाशङ्का—ननु भाव इत्यनेन सत्ता अवगम्यते। तथा च सति अभावो वस्तुत्वेन सन् इति न सम्भवति। अतो वस्तुत्वसमनियतसत्ताऽसम्भवाद् अभावोऽस्तु। इदमत्र सौगतानां विवक्षितम्—पदार्थत्वम् अस्तित्वसमनियतम्। अस्तित्वं च भावत्वानतिरिक्तम्। अत एव आकाशकुसुमादीनाम् अस्तित्वविरहेणैव न भावत्वम्, न वा पदार्थत्वमपि। तस्माद् भावः सत्ता इति फलितम्। सत्त्वं च अर्थक्रियाकारित्वम्, न च अभावानां किञ्चिदर्थक्रियाकारित्वं सिध्यति। यतः स्वलक्षणं वस्तु स्वेतरव्यावृत्तरूपेण स्वमहिम्नैव अर्थक्रियाकारि भवेत्। न हि आगन्तुकेन रूपेण अर्थक्रियाकारित्वं सिध्यति। दृश्यते च गुडादीनां माधुर्यं नागन्तुकम्, किन्तु स्वाभाविकमेव तत् सत्। अतोऽभावो यदि क्वचिदपि किञ्चिदर्थक्रियाकारी भवेत्, तदैव तस्य पदार्थत्वं सम्भाव्येत। नास्ति पुनरभावानां तुच्छत्वादेव अर्थक्रियाकारित्वम्। अभावो नाम किञ्चिद् वस्तु न सिध्यति। अपि च अभावः सन् असन् वा? बन्ध्या पुत्रवती इतिवद् अभावः सन् इति व्याहतं वचः। अथ यदि असन् अभावः, तर्हि आकाशकुसुमादेरिव तुच्छस्य तस्य पदार्थत्वं ब्रुवाणः प्रेक्षावद्भिरुपहस्येत। अतो न कथमपि अभावस्य पदार्थत्वं विचारशीलानां युक्तिसिद्धं स्यात्।

२०. भावसत्तयोस्तुल्यार्थकतया भावभिन्नस्य अभावस्य अवस्तुत्वमिति पूर्वपक्षः। ज्ञानजननाख्यार्थक्रियाकारित्वेन अभावे गौणतया सत्त्वव्यवहारः, तथा विहिताकरणस्य प्रागभावरूपस्य पापजनकत्वेन वस्तुत्वमपि सिध्यतीति प्रतिपादनम्

अत्रोच्यते भाट्टैः—अभावस्य च ज्ञानजननाख्यार्थक्रियाकारित्वदर्शनाद् अभावे गौणतया वस्तुत्वव्यवहारः। न तु मुख्यतस्तत्र वस्तुत्वं सिध्यति। अपि च विहितस्य

अकरणे तदकरणस्य विहितप्रागभावरूपतया प्रत्यवायहेतुत्वं शास्त्रेषु श्रुतम्। तस्मात् प्रत्यवायाख्यकार्यजनकत्वेन अभावस्य वस्तुत्वं वेदितव्यम्। तथा च विहितानां कार्याणां यः प्रागभावः, स एव पुनः कारणत्वेन वस्तुत्वमावहति। तस्माद् वस्तुस्वरूपस्यैव अभावस्य शशशृङ्गादीनामिव तुच्छत्वमनुपपन्नम्।

२१. अभावस्यापि अस्तित्वव्यवहारास्पदत्वेन नालीकत्वम्, अर्थक्रियाकारित्वस्य सत्त्वानुपपादनं च

एतत् पुनरिहावधेयम्—अस्तित्वेन व्यवहारानास्पदं यत्, तदेव अलीकम्। न हि शशशृङ्गमस्ति इति व्यवहारः क्वचिदपि सम्भवेत्। अभावस्तु पुनः अस्तित्वव्यवहारकक्षान्तर्गतः सर्वेषामनुभवसिद्धः। तेजसि गन्धाभावोऽस्ति, वायौ रूपाभावोऽस्ति, इत्यादिव्यवहारो भ्रमप्रमाद्यनास्कन्दिततया प्रमात्वसाधको भवत्येव। एवं विशेषाभावकूटानाम् अस्तित्वव्यवहारास्पदतया सुतरां सामान्याभावस्यापि अस्तित्वव्यवहारविषयत्वं सिध्यति। अतः 'अभावः' अस्ति इति व्यवहारस्य सिद्धतया आकाशकुसुमादिवत् तुच्छत्वम् अभावस्य न सम्भाव्यते।

यच्च पुनरुक्तम्—अर्थक्रियाकारित्वं सत्त्वं तदपि न संगच्छते, व्यभिचारात्। दृश्यते च घनान्धकाराच्छन्ने वर्त्मनि निर्विषेण सर्पेतरेण मूषिकादिना सन्दष्टस्य आशीविषेण सर्पेण दष्टोऽस्मि इति दृढनिश्चयवशात् शङ्कितविषप्रभावेणैव मरणम्। तत्र विषस्य अर्थक्रियाकारित्वं वर्त्तते, न पुनः विषसत्ताम्। एवं स्वप्नादिस्थलेऽपि भीषणाकृतिसिंहादिदर्शनेन महाभयं समुत्पन्नं भवेत्, न च तत्र भयार्थक्रियाकारिणां सिंहादीनां सत्त्वम्। अतः सत्त्वस्य अर्थक्रियाकारित्वव्यभिचारात् नार्थक्रियाकारित्वं सत्त्वम्, अपि च, अर्थक्रियाकारित्वस्य अर्थक्रियाकारित्वान्तरं वर्त्तते न वा ? वर्त्तते चेत् तस्यापि पुनः अर्थक्रियाकारित्वान्तरस्वीकारध्रौव्याद् अनवस्था दुष्परिहारा। अथ यदि अर्थक्रियाकारित्वान्तरविरहादपि अर्थक्रियाकारित्वं सत्त्वं भवेत्, तर्हि अभावस्यापि अर्थक्रियाकारित्वराहित्यात् सत्त्वं कथं नाङ्गीकर्त्तव्यम् ? अतः अर्थक्रियाकारित्वं सत्त्वम्, इत्येव रिक्तं वचः। अभावस्य च पुनरर्थक्रियाकारित्वं प्रदर्शितमस्माभिः।

२२. भावाभावद्वयात्मकं वस्तुस्वरूपमिति भाट्टसिद्धान्तप्रदर्शनम्

एतदपि न विस्मर्त्तव्यं यत् सर्वं वस्तु स्वेन रूपेण सदपि धर्मान्तरेण असदिति व्यवह्रियते। गोत्वेन रूपेण सन्नपि गौः अश्वत्वेन रूपेण न सत्, तस्माद् द्वयात्मकं वस्तु अवगम्यते भावाभावाभ्याम्।

नन्वेवं वस्तूनां द्वयात्मकत्वे भावाभावयोरभेद एव भवतामभिप्रेत इति चेत्, तत्रोच्यते—एवंभूतयोः भावाभावयोः धर्मधर्मिरूपतया भेदोऽपि कियानस्त्येव। तथा

हि यावद् घटो नोत्पन्नः, तावत् कपाले विद्यमानो घटप्रागभावः कपालधर्मितया प्रतीयते। तथा च व्यवहारः—घटप्रागभाववान् 'अयं कपालः', तस्माद् धर्मधर्मितया भावाभावयोः तत्र भेदोऽपि अस्त्येव। तथोक्तं भट्टपादैः श्लोकवार्त्तिके—

न चावस्तुनः एते स्युः भेदस्तेनास्य वस्तुता।
कार्यादीनामभावः को यो भावः कारणादिना[1] ॥ इति।

२३. प्रागभावादिभेदेन चातुर्विध्यादपि अभावस्य वस्तुत्वं स्वीकर्त्तव्यमिति प्रदर्शनम्

चतुर्विधेषु अभावेषु सर्वत्रैव अभावत्वावच्छिन्नप्रकारकबोधोदयात् तथा अयं प्रागभावः, स च ध्वंसाभावाद् व्यावृत्त इत्यादिरूपेण प्रत्येकमभावेषु व्यावृत्तबुद्धेरपि उदयाद् अभावस्य प्रमेयत्वं वस्तुभूतत्वं च सिध्यति। तथा चात्रानुमानम्—अभावो वस्तु, सामान्यविशेषात्मकत्वात्, गवादिवत्। एवं प्रमेयत्वादिति हेतुनापि अभावस्य वस्तुत्वं सिध्यति।

२४. अभावस्य भावाभावात्मकत्वे मीमांसकाभिमतमनुपलब्धिप्रमाणं नोपपद्यते इति पूर्वपक्षः

नन्वेवं यदि भावाभावात्मकं वस्तु, तर्हि सर्वत्रैव प्रत्यक्षादिभिरपि वस्तुनि गृह्यमाणे द्वयात्मकत्वं प्रतिभातं भवतु, किं पुनः षष्ठप्रमाणाङ्गीकारेण इति चेत्, अत्रोच्यते—यद्यपि गवादिकं वस्तु गोत्वादिरूपेण सद्रूपम्, अश्वत्वादिरूपेण च न तथा इति द्वयात्मकमेव, तथापि चक्षुरादीन्द्रियसन्निकर्षेण केवलं सद्रूपतैव गृह्यते—न असद्रूपता, यतः सर्वत्रैव द्वयात्मकानां वस्तूनां किञ्चिदेव कदाचित् प्रतीयते, न तु सर्वात्मकमेव ग्रहीतव्यम्। तत्रेदं कारणं यद् उद्भूतं हि वस्तु गृह्यते, न अनुद्भूतम्। अतो यदेव सदसतोः उद्भूतं भवति—तेनैव बुद्धिव्यपदेशः। तत्र च प्रत्यक्षस्थले सद्रूपमेव उद्भूतमिति व्यवहारानुकूलतया तदेव रूपं प्रत्यक्षेण गृहीतम्। अत एव यत्र सत्यपि प्रत्यक्षकारणे विषयमन्तरेण तत्तत्कारणसमवधानेऽपि विषयस्य अनुपलब्धिः, तत्र प्रतियोग्यारोपक्रमेण अनुपलब्धिप्रमाणाद् अभावो गृह्येत। अतो न कश्चिद् दोषः।

तथा चोक्तं श्लोकवार्त्तिके—

स्वरूपपररूपाभ्यां नित्यं सदसदात्मके।
वस्तुनि ज्ञायते कैश्चिद् रूपं किञ्चित् कदाचन॥
यस्य यत्र यदोद्भूतिर्जिघृक्षा वोपजायते।
चेत्यतेऽनुभवस्तस्य तेन च व्यपदिश्यते[2] ॥ इति।

---

१. श्लोकवार्त्तिके, अभावपरिच्छेदे—९ श्लोकः।

२. श्लोकवार्त्तिके -- अभावपरिच्छेदे— २२-२३।

अत इदमेव तत्त्वं यद् भावात्मकस्य प्रमेयस्य प्रमाणं भावरूपमेव। अत एव तत्र अभावस्य प्रमाणत्वं नास्ति। एवमभावस्य प्रमेयस्य अभावाख्यं प्रमाणमेव स्यात्। तथा हि—

भावात्मके यथा मेये नाभावस्य प्रमाणता।
तथाऽभावप्रमेयेऽपि न भावस्य प्रमाणता[1]॥

२५. भावत्वं भावप्रमाणगोचरम्, अभावत्वं च अभावप्रमाणगोचरम् इति भाट्टसिद्धान्तः

ननु प्रमाणमभावाख्यमिति कथम्? प्रत्यक्षादीनां भावत्वदर्शनादिति चेद् भावात्मकमेव प्रमाणम् इति नेयं राजाज्ञा। यत्र यादृशं वस्तु, तत्र तदनुरूपमेव प्रमाणं भवेत्। अतः अभावाख्यस्य प्रमेयस्य सिद्धौ तद्ग्राहकं प्रमाणमपि अभावाख्यं स्यादेव, यतः अर्थपरिच्छेदो हि प्रमाणफलम्। तच्च फलं यथा भावरूपेण प्रमाणेन, तथा अभावेनापि प्रमाणेन तुल्यमेव स्यात्। यथा—

भावात्मकस्य मानत्व न च राजाज्ञया स्थितम्।
परिच्छेदफलत्वाद्धि प्रामाण्यं स्याद् द्वयोरपि[2]॥

अतोऽभावाख्यं प्रमाणं तद्ग्राह्यं प्रमेयं च वस्तुतत्त्वानुसन्धिना प्रेक्षावता नैव अनङ्गीकर्तुं शक्यम्।

ङ) अभावस्य पदार्थान्तरत्वे नैयायिकमतारम्भः

२६. तत्र नास्तीत्यादिप्रतीतिसिद्धः अभाव इति स्थापनम्

नैयायिकास्तु अभावस्य पदार्थान्तरत्वमङ्गीकुर्वन्त एवमाहुः—घटाभाववद्भूतलम् इत्यत्र भूतलत्वावच्छिन्नविशेष्यतानिरूपितघटाभावत्वावच्छिन्नप्रकारताशाली बोधो जायते। तत्र अभावत्वावच्छिन्नप्रकारताशालिप्रमायाः अभावं विना नोपपत्तिः। यदि अभावः पदार्थान्तरं न भवेत्, तर्हि अभावत्वावच्छिन्नप्रकारताशालिप्रमाज्ञानं नोपपद्यते।

२७. अभावस्य देशकालादिभिः सम्बन्धासिद्धेः स्वतन्त्रपदार्थत्वाऽसम्भवशङ्का, तत्रैव बौद्धमतप्रदर्शनं च—

अत्राहुः सौगताः—घटो नास्ति इत्यादिना प्रतीयमानः अभावो न घटाभावस्वरूपत्वेन स्वतन्त्रतया अनुभूयते; अपि तु देशंकालप्रतियोगिविशिष्टत्वेन। अत एव इह इदानीम् इदं नास्ति इत्येवं प्रतीयते। नन्वेवं प्रतीयमानस्यापि स्वातन्त्र्यं कथं नाङ्गीक्रियते इति चेत्, तत्रोच्यते—एवं प्रतीयमानोऽपि यदि देशकालादिभिः सम्बद्धः

---

१. श्लो० वा० अ० प्र०–४६। २. तदेव-४७।

स्यादभावः, तदा तस्य स्वातन्त्र्यं सिध्यति। न तु पुनः देशेन कालेन वा सम्बध्यते अभावः, संयोगसमवायादीनामनुपपत्तेः। एवं च सम्बन्धराहित्येन अभावो विशेषणमपि भवितुं नार्हति। विशेष्येण देशकालादिना सम्बन्धाऽसम्भवात्। न हि विशेष्येण असम्बद्धमपि विशेषणं स्यात्। तथा चोक्तं ज्ञानश्रीमित्रनिबन्धावली–'न चाभावो नाम विग्रहवान्, येन अन्वयव्यतिरेकिणा रूपेण साक्षात्कर्त्तव्यः, किन्तु व्यवहर्त्तव्यः[1]' इति।

ननु यदि अभावः स्वतन्त्रो नास्ति, तर्हि निषेधप्रतीतेः विषयः क इति चेत्, तत्रोच्यते सौगतैस्तत्रापि देशकालसम्बद्धस्य वस्तुस्वभावस्य अनुभूतिसिद्धतया तथाविधसम्बन्धासिद्धेः अभावस्य वस्तुतया अगम्यत्वात्। उक्तं च ज्ञानश्रीमित्रपादैः—'वेद्ये यत्र हि यन्मतिर्नियमतः स्याद् वा न वा तस्य धीरिष्टा नोऽनुपलब्धिरन्यविरहज्ञानस्थितेराश्रयः[2]'।

अत्रेदं तात्पर्यम्—घटो नास्ति इत्यादौ प्रतीयमानस्य घटाभावस्य नास्ति कश्चित् प्रत्यक्षयोग्यो विग्रहः। अपि तु, सत्यपि प्रत्यक्षकारणे तत्र स्थितानां सर्वेषां प्रत्यक्षसत्त्वेऽपि घटस्य प्रत्यक्षाभावाद् घटो नास्तीति व्यवहारमात्रम्। तत्र च व्यवहारं प्रति किं कारणमिति चेत्, एकाकारनियम एव। तथा हि अभिज्ञेन जनेन घटादर्शनाद् एकत्र यथा घटो नास्तीति व्यवह्रियते, तथैव सर्वत्र प्रत्यक्षकारणकलापे सति घटादर्शनात् घटो नास्तीति निषेधात्मकव्यवहारस्तस्य प्रवर्त्तते। यश्च अपटुः जनः, स घटानुसन्धानेन तमनुपलभ्य तत्र घटो नास्तीति निषेधात्मकं व्यवहारं करोति, तत्सादृश्याद् अन्यत्रापि तथैव व्यवहरति। यश्च अतिशयमन्दमतिः, स घटानुपलम्भेऽपि तत्र सन्दिहानो घटो नास्तीति प्रवर्त्तते।

तथा चोक्तं ज्ञानश्रीपादैः—'न चाभावो नाम विग्रहवान्, येन अन्वयव्यतिरेकिणा साक्षात्कर्त्तव्यः, किन्तु व्यवहर्त्तव्यः। स च एकाकारनियमात् पटुना व्यवहर्त्तुमध्यक्षेण शक्य एव। यः पुनः अपटुः आपातत प्रवृत्तेऽपि अभावनिश्चये संशेते सादृश्यमस्य अनुपलम्भनमात्रमनुसृत्य तद्व्यवहारं प्रवर्त्तयति, यस्तु ततोऽपि अपटुः, स दृश्यानुपलम्भेऽपि सन्दिहानो व्यापकानुपलम्भेन प्रवर्त्तते[3]'।

अत्रायमभिसन्धिः—यस्मिन् विद्यमाने यद् अवश्यं विद्यते, तस्य अभिन्नेन्द्रियग्राह्यस्य अनिन्द्रियग्राह्यस्य वा बुद्धिरेव अनुपलब्धिः। सा च केवलं व्यवहारमात्रमेव साधयति, अन्यथा प्रत्यक्षसिद्धिः स्यात्। तदर्थमेव च अभावज्ञानस्य व्यवहारसाधकत्वम्। न तु अभावः कश्चिद् विग्रहवान् इति निश्चयार्थम्। यथा नीलमिदम् इति

१. ज्ञानश्रीमित्रनिबन्धावल्याम्–पृ० २८६। २. तदेव–पृ० २८३।
३. ज्ञानश्रीमित्रनिबन्धावल्याम्–पृ० २८६।

-निश्चये अनीलो न भवति इति व्यवहारः, न तु तेन नीले नीलेतराभावस्य विग्रहवतः कस्यचित् स्थितिर्बोध्यते ।

(च) न्यायमतमाश्रित्य घटो नास्ति इत्यादिप्रतीतेः आधाराधेयभाव-घटितत्वेन अभावस्य देशसम्बन्धप्रतिपादनम्

अत्रेदमुच्यते—किञ्चिदधिकरणे यदा किञ्चिद् व्यह्नियते, तदा तस्मिन्नधिकरणे व्यवह्नियमाणेन वस्तुना भवितव्यम्, यतः अधिकरणेन सम्बन्धं विना आधेयतया प्रतीतिः नैव सिध्येत् । न हि घटेन सम्बन्धं विना 'भूतलं घटवत्' इति प्रतीतिः । एवं च सति भूतले घटो नास्ति इति व्यवहारस्तदैव सम्भवेत्, यदि भूतलाधिकरणे आधेयतया प्रतीयमानस्य घटाभावस्य केनचित् सम्बन्धेन वैशिष्ट्यं सिध्येत् । तत्र यदि घटाभावः कश्चिद् विग्रहवान् न भवेत्, तर्हि घटाभाववद् भूतलमित्यत्र भूतलस्य अधिकरणतया घटाभावस्य च आधेयतया प्रतीतिः न कथञ्चिद् उपपद्येत । अतो नास्ति अभावो विग्रहवान्, प्रतीयते च पुनः कस्मिंश्चिदधिकरणे व्यवह्नियमाणः इति परस्परं व्याहतं वचः । भूतलघटाभावयोः सुतरामेव नैक्यम्, एकत्वे तादात्म्यावागाहित्वेन आधाराधेयतया प्रतीतिः नोपपद्यते । तस्माद् यदि भूतले घटो नास्तीति व्यवहारः स्वीक्रियेत, तदा तत्र घटाभावाख्यस्य स्वतन्त्रस्य पदार्थस्य अस्तित्वमपि स्वीकर्त्तव्यम् । अतो बौद्धाभिमतं नैव ग्राह्यम् ।

(छ) अभावस्य अधिकरणस्वरूपताविमर्शः, तत्र न्यायसिद्धान्तः

२८. न्यायमते अभावस्य प्रत्यक्षग्राह्यतया तत्र इन्द्रियसन्निकर्षासम्भवाशङ्का, अतः अधिकरणेन्द्रियसन्निकर्षेणैव अभावप्रतीतिसिद्धौ अभावस्य अधिकरणात्मकत्व-मिति पूर्वपक्षः

ननु घटाभाववद्भूतलमिति ज्ञानं प्रत्यक्षात्मकमेव न्यायनये इष्टम्, इन्द्रिय-सन्निकर्षातिरिक्तस्य कारणान्तरस्य तत्र असत्त्वात् । इन्द्रियसन्निकर्षस्तु तत्र सुतरामावश्यकः, ग्राह्येन्द्रियसन्निकर्षस्य सर्वत्र प्रत्यक्षप्रयोजनकत्वात् 'भूतलं घटाभाववत्' इत्यत्र तु पुनः भूतलातिरिक्तत्वेन अभावाख्येन सन्निकर्षश्चक्षुरादीनां नैव सम्भवेत् । तथा हि रूपवद् द्रव्यमेव चक्षुषा सन्निकर्षेण ग्राह्यम्, अभावस्तु न रूपवद् द्रव्यम् इति नैव तेन सक्षुःसन्निकर्षः सम्भवेत् । एवं स्पर्शविशिष्टद्रव्यस्यैव त्वगिन्द्रियग्राह्यतया अभावस्य च अतथात्वात् न त्वचापि अभावसन्निकर्षः सम्भवेत् । घ्राण रसन-श्रोत्राणां च यथाक्रमं गन्ध-रस-शब्द-ग्राहकाणां सुतरां न अभावग्राहकत्वम् । अत एव घटाभाववद्भूतलम् इत्यादौ भूतलग्राहकसन्निकर्षेणैव अभावस्यापि ग्रहणात्, अभावः

भूतलाद् नातिरिच्यते। यदि हि अभावः भूतलातिरिक्तः स्यात्, तर्हि भूतलग्राहकसन्नि-कर्षातिरिक्तसन्निकर्षग्राह्यः स्यात्, स च नास्ति, तस्मात् भूतलग्राहकसन्निकर्षग्राह्य-त्वाद् भूतलवृत्त्यभावस्य न भूतलातिरिक्तत्वम्।

२९. घटाभावस्य भूतलादिस्वरूपत्वे सर्वत्रैव भूतले घटाभावप्रतीतिः कथं न स्यात्? इति प्रश्ने प्रतियोगिस्मरणं विना तदभावबुद्धिः न भवेत् इति पूर्वपक्षीणामुक्तिः

न च घटाभावस्य यदि भूतलानतिरिक्तत्वम्, तर्हि यत्रैव भूतलज्ञानम्, तत्रैव घटाभावज्ञानं स्यात्। एवं भूतलं जानामि इति अनुव्यवसायस्य घटाभावं जानामि इत्याकारकत्वापत्तिर्दुर्वारा इति वाच्यम्, प्रतियोगिस्मरणं विना अभावज्ञानानुदयात्। तथा हि भूतलस्य घटाभावादिरूपत्वेऽपि यदा भूतलदर्शनेन घटाख्यप्रतियोगिनः स्मरणम्, घटेन च न इन्द्रियसंयोगः, भूतलस्य घटाभाववत्तया ज्ञानम्। भूतलस्य घटाभावरूप-त्वेऽपि यावद् घटाख्यप्रतियोगिस्मरणं न भवेत्, न तावत् घटाभावरूपेण भूतलस्य ज्ञानमपि। या च पुनः अनुव्यवसाये आपत्तिः प्रदर्शिता, साऽपि न युज्यते, यतः अभाव-ज्ञाने जाते तदनन्तरमेव अनुव्यवसाये घटाभावज्ञानं प्रतिभासेत। यावच्च भूतलस्य घटाभावत्वेन ज्ञानं न भवेत्, तावद् घटाभावं जानामि इत्यनुव्यवसायोऽपि सुतरां न सम्भवति।

३०. नानाधर्मकस्यापि वस्तुनो यत्किञ्चिदेकेन धर्मेण प्रतीतिकाले सर्वधर्माणां भानं न आवश्यकम्

अपि च, एकस्य वस्तुनो विभिन्नरूपत्वेऽपि एकरूपता ज्ञाने न सर्वप्रकारेण ज्ञानं भवेत्। दृश्यते च एकैव नारी, कन्या, पत्नी, माता, भगिनी चेति विविधेन रूपेण वर्त्तते। न हि तत्र व्यक्तिभेदः, तस्याः स्त्रिय एकत्वात्। न च पुनस्तत्र कन्यात्वेन ज्ञातेऽपि मातृत्वेन वा भगिनीत्वेन वा ज्ञानं तत्र नियतम्। एवं तत्र यया सम्बन्ध-व्यपेक्षया एकरूपेण भानम्, रूपान्तरं च तत्र नैव भातम्। एवमत्रापि भूतलत्वेन भानेऽपि सर्वदैव अभावत्वेन भानं नावश्यकम्।

यथा वा एकस्यैव घटस्य पदार्थत्वद्रव्यत्वघटत्वाद्यनेकधर्मावच्छिन्नत्वेऽपि घटत्वावच्छिन्नतया द्रव्यत्वावच्छिन्नतया भानं न आवश्यकम्, एवमत्रापि भूतल-त्वावच्छिन्नज्ञाने न घटाभावत्वेन ज्ञानमावश्यकम्। अतो घटाभावस्य भूतलानति-रिक्तत्वेऽपि न कोऽपि दोषः।

अत्रेदमुच्यते—भूतलत्वावच्छिन्नविशेष्यकसंयोगसम्बन्धावच्छिन्नघटत्वावच्छिन्न-प्रकारताकज्ञानं प्रति भूतलत्वावच्छिन्नविशेष्यकसंयोगसम्बन्धावच्छिन्नघटत्वावच्छिन्न-प्रतियोगिताकाभावज्ञानं ग्राह्याभावमुद्रया प्रतिबन्धकम्, तत्र प्रतिबध्य-प्रतिबन्धकतया

च परस्परविरोधित्वेनैव सम्भवेत्। विरोधित्वं चात्र सहानवस्थायित्वं बोध्यम्। अत्र यदि घटाभावो भूतलाद् नातिरिच्यते, तर्हि यत्र भूतलत्वं तत्रैव घटाभावस्य नियतत्वाद् भूतले घटावस्थानं न सम्भवेत्।

३१. अभावस्य अधिकरणातिरिक्तत्वव्यवस्थापनार्थं नैयायिकानामुत्तरं—तत्रादौ प्रतिबध्यप्रतिबन्धकभावविचारमुखेन अभावस्य स्वातन्त्र्यप्रतिपादनम्

न हि यत्र अन्धकारो वर्त्तते, तत्रैव तद्विरोधिन आलोकस्यापि अवस्थानं सम्भवेत्। अतो 'भूतलं घटवत्' इति सर्वजनानुभवसिद्धप्रतीतेः भूतले घटस्यावस्थानं स्वीकर्त्तव्यम्। भूतलस्य घटाभावस्वरूपत्वे भूतलस्य तत्र अवस्थानेन च घटाभाव-घटयोः सहानवस्थायित्वलक्षणविरोधाभावाद् घटवद् बुद्धिं प्रति घटाभावज्ञानं प्रतिबन्धकं न भवेत्। तस्मादकामेनापि भूतलस्वरूपाद् घटाऽभावस्य व्यतिरिक्तत्वं वाच्यमेव।

३२. प्रतियोगिग्राहकेन्द्रियग्राह्यतया अभावस्य अधिकरणातिरिक्तस्वरूपव्यवस्थापनम्

वस्तुतस्तु अभावस्य अधिकरणानतिरिक्तत्वे अभावप्रत्यक्षं दुरुपपादनीयं स्यात्, यतः प्रतियोगिग्राहकेनैव इन्द्रियेण अभावप्रत्यक्षमिति नियमः। न हि चक्षुषा गन्धाभावः प्रत्यक्षीकर्त्तुं शक्यते। न वा घ्राणेन रूपाभावोऽपि संवेद्यः स्यात्। एतन्नियमानङ्गीकारे अन्धस्यापि घ्राणेन्द्रियादिभिः नीलपीताद्यभावः प्रत्यक्षः स्यात्। न चैवमस्ति तस्मात् प्रतियोगिग्राहकेण इन्द्रियेण अभावानां प्रत्यक्षमित्यवश्यमङ्गीकर्त्तव्यम्। एवं च सति यदि अभावः अधिकरणाद् नातिरिच्यते, तदा जलाधिकरणस्य गन्धाभावस्य अप्रत्यक्षत्वापत्तिः, यतः तत्र भवन्मते गन्धाभावो जलस्वरूपाद् नातिरिक्तः। एवं च सति घ्राणेन्द्रियग्राह्यगन्धाभावस्य जलस्वरूपतया जलस्य च घ्राणेन्द्रियग्रहणात् सुतरामेव जलस्वरूपगन्धाभावोऽपि घ्राणेन्द्रियेण ग्रहीतुं नैव शक्यते। तथा च 'जलं गन्धाभाववत्' इति नोपपादनं सम्भवति।

ननु 'जलं गन्धवत्' इति प्रत्यक्षाभावात् सुतरामेव जले गन्धाभावसिद्धौ जलं गन्धाभाववद् इत्यप्रत्यक्षेऽपि न कापि क्षतिरिति चेत्, तत्रोच्यते—यत्किञ्चिदधिकरणे घटादिप्रतियोगिताकाभावज्ञानं विना तत्र घटो नास्ति इति व्यवहारसम्भवे, तत्र घटप्रत्यक्षाभावः अनुपपन्नः, यतः 'भूतलं घटवत्' इति प्रत्यक्षं प्रति भूतलानुयोगिकघटप्रतियोगिकसंयोगः सन्निकर्षो भवति। सन्निकर्षश्च सम्बन्धात्मक इति सम्बन्धिद्वयसापेक्षः। अतो यत्र तथाविधः सन्निकर्षो नास्ति, तत्र भूतलस्य विद्यमानत्वेऽपि संसर्गप्रतियोगिनो घटस्य असत्त्वादेव तथाविधसन्निकर्षाभावः स्वीकर्त्तव्यः। अतो यत्र घटो नास्ति, तत्रैव 'भूतलं घटवत्' इत्याकारकप्रत्यक्षाभावः। तत्र 'भूतलं घटवत्' इत्याकारकप्रत्यक्षाभावं प्रति भूतलाधिकरणकघटाभावज्ञानं प्रयोजकं भवत्येव। तत्र अभावग्रहणं विना न तत्प्रयोज्यस्तथाविधप्रत्यक्षाभावः सम्भवेत्।

३३. प्रतियोग्यसमानकालीनतत्तद्देशादिरूपविशेषणताविशेष्याख्यसन्निकर्षेण अभावग्रहणव्यवस्थापनम्

तत्र यदि भूतलं घटाभावस्वरूपमेव स्यात्, तर्हि भूतलग्राहकसन्निकर्षेण घटाभावोऽपि अवश्यमेव ग्राह्यो भवति, भूतलघटाभावयोरभेदात्। 'एवं च सति यत्रैव भूतलेन्द्रियसन्निकर्षः, तत्र सुतरां भूतलाभिन्नघटाभावादिग्राहकसन्निकर्षोऽपि भवत्येव। तथा सति सर्वत्र भूतलग्राहकसन्निकर्षग्राह्यभूतलस्वरूपमिव भूतलानतिरिक्तघटाभावादिस्वरूपमपि गृहीतं भवति'। एवं च सति भूतलं घटवत् इति प्रत्यक्षमेव नोपपद्यते। तस्माद् भूतलग्राहकसन्निकर्षातिरिक्तसन्निकर्षग्राह्यत्वं भूतलवृत्तिघटाभावस्य स्वीकर्त्तव्यम्।

एवं च सति यदि घटाभावज्ञानं प्रतियोगिग्राहिणा चक्षुरादिना इन्द्रियेण व्यवस्थापयितुं न शक्यते, तर्हि 'भूतलं घटवत्' इति प्रत्यक्षाभावोऽपि नोपपन्नः। अतो 'जलं गन्धवत्' इति प्रत्यक्षाभावप्रयोजकस्य जलाधिकरणकगन्धाभावस्य ग्रहणम् आवश्यकम्। तत्र अभावस्य अधिकरणात्मकत्वे तदनुपपत्तिः प्रदर्शिता। अतः 'जलं गन्धाभाववत्' इत्याद्यभावप्रतीतेः प्रमात्वरक्षार्थं जलाधिकरणकगन्धाभावग्रहणोपपत्तये घ्राणेन्द्रियेण तत्र गन्धाभावग्रहणमावश्यकम्। अतः अभावस्य अधिकरणातिरिक्तत्वमवश्यस्वीकार्यम्।

• • •

तृतीयोऽध्यायः

अभावलक्षणविचारः

(क) नञर्थविचारेण अभावशब्दार्थनिर्धारणद्वारा अभावलक्षणपरीक्षारम्भः, तत्र अभावलक्षणे पूर्वपक्षः

अथ लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति नियमाद् लक्षणं यदि अभावस्य निर्धारयितुं शक्येत, तदेव अभावस्य पदार्थत्वं निर्धारितं स्यात्। वस्तुतस्तु लक्षणमेव अभावस्य न सम्भवेदिति केचिदाक्षिपन्ति। तथा हि न भावः अभाव इति व्युत्पत्त्या भावभिन्नत्वम् अभावत्वमित्यायातम्। नञश्च तदन्यत्वं तदभावत्वं तद्विरोधित्वं वा अर्थः सम्भवेत्। तत्र 'अभाव' इत्यत्र त्रिषु नञर्थेषु न कस्यापि अर्थस्य ग्रहणं सम्भवेत्, इत्येवम् आक्षेपकाणामाशयः। अतः प्रथमपक्षस्य ग्रहणं तावत् समीचीनं नवेति विचारः प्रथमः क्रियते। तथा हि यदि भावान्यत्वमेव अभावत्वं स्यात्, तदा घटाख्यस्य भावस्य पटाख्याद् भावाद् अन्यत्वेन तस्यापि अभावत्वं प्रसज्येत। तथा चोक्तं तत्त्वप्रदीपिकायाम्—'भावस्यापि भावादन्यत्वेन अतिव्याप्तेः'[1]।

अथ यदि भावत्वानधिकरणत्वम् अभावत्वम्, घटादीनां च भावत्वाधिकरणत्वेन न तत्रातिव्याप्तिरित्युच्येत, तदपि न सम्यक्। तथा हि अनधिकरत्वम् इत्यस्य यदि अधिकरणत्वाभाव अर्थः स्यात्, तर्हि आत्मश्रयदोषः स्यात्, अभावलक्षणस्य अभावघटितत्वात्।

१. अभावस्वरूपनिरूपणप्रसङ्गे भावस्वरूपनिर्णयस्य अशक्यत्वप्रदर्शनम्

अपि च भावत्वानधिकरणत्वमित्यत्र किं नाम तावत् भावत्वम् ? यदनधिकरणम् अभावः, तदेव भावत्वमिति यदि इष्येत, तर्हि अभावे अतिव्याप्तिः, यतः अस्तित्वं घटादिभावानां धर्मः, अस्तितावान् घटः इत्यादिप्रतीतेः। तस्मात् यदनधिकरणमित्यत्र यच्छब्देन अस्तित्वमेव ग्राह्यम्। तथा च सति घटाभावोऽस्ति इत्यादिप्रतीतिबलाद् अस्ति तावान् अभावः इत्यनुभवबलेन अभावोऽपि अस्तित्वाधिकरणं भवत्येव। अतः अभावेऽपि भावत्वलक्षणातिव्याप्तिः।

इदमत्रावधेयम्—समवायेन सत्तावत्त्वं भावत्वमिति न्यायाभिप्रेतं भवितुमर्हति। तथा सति सामान्यादौ अपि समवायेन सत्ताराहित्यात्, तत्रापि अभावत्वप्रसङ्गः। अतः सत्तावत्त्वं न भावत्वम्। नापि अर्थक्रियाकारित्वं भावत्वं वाच्यम्। अभावस्यापि

---

१. तत्त्वप्रदीपिकायां—२, पृ० ४३९।

अर्थक्रियाकारित्वेन भावत्वप्रसङ्गात्। भवति च निदाघे बहून्यभावस्य सुखसाधकत्वम्, तथा शिशिरे अतिशीतलहिमनिकरसम्पर्काभावस्य सुखकारित्वम्। तस्माद् अभावानामपि अर्थक्रियाकारित्वसत्त्वात् नार्थक्रियाकारित्वम् यदनधिकरणेत्यत्र 'यत्' पदग्राह्यम्। अतः केवलमस्तित्वमेव अत्रोक्तभावलक्षणान्तर्गत'यत्' पदग्राह्यं स्वीकर्त्तव्यम्, अन्यस्य असम्भवात्। अपि तु अस्तित्वस्य 'यत्' पद ग्राह्यत्वेऽपि न निस्तारः प्रागेव दूषितत्वात्। न च नास्तीति प्रत्ययाविषकत्वमेव वा भावत्वम्, भूतले घटो नास्तीति प्रत्ययविषयत्वेन घटादेरपि भावत्वानुपपत्तेः। तथा भावत्वलक्षणस्य च अव्याप्तिः।

न च प्रतियोग्यनपेक्षनिरूपणविषयत्वमेव भावत्वमित्यपि वाच्यम्, ह्रस्वत्वदीर्घत्वादौ अव्याप्तेः। ह्रस्वत्वदीर्घत्वनिरूपणं च सर्वत्र प्रतियोग्यपेक्षम्। 'अयमस्माद् ह्रस्वः, अयमस्माद् दीर्घं' इत्येवं रूपेण प्रतियोगिसापेक्षतयैव तयोर्निरूप्यमाणत्वात्। नापि निर्विकल्पकबुद्धिबोध्यत्वं भावत्वम्। तथा हि—तद्विषयत्वात्यन्ताभावानधिकरणत्वं निर्विकल्पकबुद्धिविषयत्वम्, घटादौ च घटविषयकात्यन्ताभावानधिकरणत्वं वर्त्तते, अभावे च न तथेति, भावत्वं निर्बाधं सिध्यति, इत्यपि न युक्तम्। तदत्यन्ताभावे अतिव्याप्तेः। न हि घटात्यन्ताभावः घटात्यन्ताभावाधिकरणकनिर्विकल्पकबुद्धिविषयः[1]। तस्माद् घटात्यन्ताभावस्यापि यथोक्तलक्षणाक्रान्ततया भावत्वापत्तिः। एवं भावत्वस्यैव अभावभिन्नत्वे तथा अभावस्यापि पुनर्भावभिन्नत्वेनान्योन्याश्रयो दुष्परिहर एव स्यात्।

२. अभावस्वरूपनिर्णयाशक्यत्वाक्षेपः

अपि च अभावो यदि निरूपयितुं शक्यः, तदैव तस्य लक्षणपरीक्षणं सम्भवेत्। वस्तुतस्तु अभाव एव न निर्धारयितुं शक्यते। तथा हि भूतले घटो नास्ति इति अबाधितप्रत्यययोग्य अभाव इत्येवम् अभाववादिनामाशयः।

अत्रेदं पृच्छ्यते—अभावः कुत्र वर्त्तते? किं भाववति अभावो विद्यते, उत अभाववति। तत्र नाद्यः कल्पः। भावत्वावच्छिन्नाधिकरणेन सह अभावत्वावच्छिन्नाधिकरणत्वस्य विरोधाद् 'भाववान् अभाव' इति वक्तुं न शक्यते। नापि द्वितीयः कल्पः। आत्माश्रयदोषसमाश्रयणात्। तथा हि अभावत्वावच्छिन्नाधिकरणत्वस्य प्रसिद्धौ तत्र अभावः प्रतिपादयितुं शक्यते। अतोऽभावस्य अभावसापेक्षत्वेन आत्मश्रयदोषः।

---

१. सर्वत्रैव 'अयं घटः' इत्यादिबुद्धेः विशिष्टज्ञानतया तत्पूर्वं घट-घटत्वे इत्याकारकं निर्विकल्पकज्ञानं जायत इति नैयायिकाः। पदार्थानां च बुद्धिग्राह्यत्वं विना अनुपपत्तेः, सुतरां घटादिबुद्धेः प्राक् तथाविधनिर्विकल्पकज्ञानं विना घटादिबोधासम्भवाद् घटस्य भावत्वं निर्विकल्पकबुद्धिविषयत्वम्। तच्च निर्विकल्पकज्ञानं तदत्यन्ताभावानधिकरणविषयकमिति घटादीनां सर्वेषां भावत्वसिद्धि इति पूर्वपक्षाशयः।

३. अभावस्वरूपनिर्णयशक्यत्वप्रदर्शने नैयायिकमतम्

अत्रेदमुच्यते—अभावस्य यया रीत्या दुर्निरूपत्वम् आक्षिप्यते, तत्तु स्वव्याघातकत्वेन न युक्तम्। तथा हि भूतलं घटवत् इति प्रतीतौ भूतलत्वावच्छिन्नविशेष्यतानिरूपितघटत्वावच्छिन्नप्रकारताको बोधः सर्वत्रानुभवसिद्धः। तत्र घटो भावः, अभावो वा ? यदि अभावत्वेन घटस्य अङ्गीकरणम् तर्हि अभाववद् भूतलमित्येवम् आयातम्। तथा च सति अभावः सिध्यत्येव।

वस्तुतस्तु भूतले घटं पश्यामि, घटवद् भूतलं जानामि इत्याद्यनुभवाद् घटस्य अभावत्वं नैव वक्तुं शक्यते। अतो भाव एव घटः स्वीकार्यः। तथा च सति स भावः किं भाववति विद्यते, अथवा अभाववति विद्यते इत्यपि प्रश्नः समायाति। तत्र यदि आद्यः कल्पः तर्हि तत्रापि आत्माश्रयो दुष्परिहरः। यदि पुनः अन्त्यः कल्पः—तर्हि विरोधः समापतेत्। अभावत्वावच्छिन्नाधिकरणस्य भावत्वावच्छिन्नाधिकरणत्वेन अङ्गीकारात्। वस्तुतस्तु यद्धर्मावच्छिन्नसमभिव्याहृतपदोत्तरं विशेष्यतया यद् वस्तु प्रतीयते, विशेष्यीभूते तस्मिन् वस्तुनि तद्धर्मावच्छिन्नप्रकारताकत्वेनैव तस्यान्वयः, न हि तद्धर्माश्रयप्रकारकत्वेनापि। अन्यथा 'घटवद् भूतलम्' इति वाक्यादपि भूतलं द्रव्यम् इति शाब्दबोधापत्तिः, घटस्यापि द्रव्यत्वाश्रयत्वेन द्रव्यत्वाश्रयप्रकारताकबोधस्य तत्र निरङ्कुशत्वात्।

न च भवति तथा, यतस्तद्धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टपदज्ञानस्यैव हेतुत्वम्। अतो भूतलं घटाभाववदित्यत्र भूतलत्वावच्छिन्नविशेष्यतानिरूपितघटत्वावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नप्रकारताकत्वेन शाब्दबोधो भवेत्। अन्यथा यदि घटो नास्ति इत्यत्रापि केवलमभावत्वावच्छिन्नप्रकारत्वेनैव बोधः स्यात्, तर्हि घटवद्भूतलेऽपि 'घटो नास्ति' इति प्रत्ययापत्तिः, यतस्तद्धर्मावच्छिन्नप्रतियोगिताकत्वेन यद्यभावस्य अन्वयो न भवेत्, अपि तु सर्वत्रैव केवलम् अभावत्वावच्छिन्नप्रकारताकत्वेनैवान्वयः स्यात्, तर्हि 'पटो नास्ति' इत्यस्यापि न पटत्वावच्छिन्नप्रतियोगिताकाभावत्वेन बोधः, अपि तु केवलमभावत्वावच्छिन्नप्रकारताकत्वेनैव बोधः स्यात्। तथा च सति घटवत्यपि भूतले पटाभावसत्त्वेन तत्राप्यभावत्वावच्छिन्नप्रकारताकत्वेन अन्वयः स्यात्।

एवं च सति घटाभावपटाभावयोः सर्वत्रैव अभावत्वावच्छिन्नप्रकारताकत्वेन बोधस्वाभाव्याद् घटाभावपटाभावयोरवैलक्षण्येन घटवत्यपि पटाभावसत्त्वेन घटाभावसत्त्वे बाधकाभावः। एवं च सति सर्वेषामभावानां सङ्करप्रसंगेन सर्वव्यवहारोच्छेदप्रसङ्गः। अतो न केवलमभावत्वावच्छिन्नप्रकारताकत्वेनान्वयः, अपि तु प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकाभावत्वेनैवान्वयो भवितव्यः। अतो भूतलत्वावच्छिन्ने वस्तुनि भावत्वधर्मसत्त्वेऽपि तत्र घटत्वादिविशेषधर्मावच्छिन्नप्रतियोगिताकाभावस्यान्वये न कापि बाधा।

न हि 'भावः अभाववान्' इति प्रत्ययो भवेत्, तथाविधप्रत्ययस्य आहार्यत्वया परोक्षत्वासम्भवात् । तस्माद् अभावस्य स्वतन्त्रपदार्थत्वनिरूपणे प्रदर्शिताभिर्युक्तिभिरत्रापि अभावस्य निर्णयः सम्भवत्येव । न हि कुत्रचिदपि केवलम् अभाव इति प्रतीतिः, तत्तद्विशेषधर्मावच्छिन्नप्रतियोगिताकाभावत्वेनैव प्रतीयमानत्वात् ।

अत्रायमाशयः—'भूतले घटो नास्ति', 'भूतलं घटो न' इत्याद्यनुभवात् स्वप्रतियोगिकस्यैवाभावस्य अनुभवविषयत्वम्, न तु नञर्थमात्रम् । अतः अभाववित्तिवेद्यत्वं प्रतियोगिनः । प्रतियोगिज्ञानाधीमज्ञानत्वं चाभावस्य प्रतियोगिसाक्षिकं, गोसादृश्यवत् । अतः केवलमधिकरणं तद्ज्ञानं वा नाभावः; अपि तु किञ्चिद्धर्मावच्छिन्नाधिकरणे किञ्चिद्धर्मावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नाधेयताशालिज्ञानं सर्वानुभवसिद्धम्, एवं च संति अभावप्रतीतेर्निष्प्रत्यूहतया प्रतीयमानतया प्रतीयमानानां च पदार्थत्वेन सुतरां तल्लक्षणं निरूपणीयम् ।

ननु भावभिन्नत्वम् अभावत्वम् इत्यत्र यदि भावविरोधित्वम् अर्थः स्यात्, तर्हि अन्योन्याभावे अव्याप्तिः—अन्योन्याभावस्य भावसमानाधिकरणत्वेन सहानवस्थानलक्षणविरोधासम्भवात् । अत्र सहानवस्थानमित्यत्रानवस्थानपदेऽपि नञः श्रवणात्, तत्रापि नञर्थः कः ? इति प्रश्ने पुनरपि अन्यत् किञ्चित् नञ्प्रतिपाद्यं वाच्यम् । एवं तत्रापि अन्यत् इति अनवस्था दुष्परिहारा ।

४. अभावलक्षणविचारे वाद्यभिमतदोषोद्भावनम्

न च भावानात्मकत्वं भावभिन्नत्वम् इति वाच्यम्, तत्रापि नञर्थानिरुक्तेः । नापि निषेध्यनिरुप्यत्वमेव भावभिन्नत्वं वाच्यम्, तत्रापि निषेध्यस्य निषेधप्रतियोगित्वेन वक्तव्यतया तत्रापि निषेधार्थस्य अनिरुक्तेः पूर्वदोषप्रसक्तेः । अपि च, भावभिन्नत्वमित्यत्र यदि भावानाम् प्रातिस्विकरूपेण प्रतियोगिकुक्षौ निवेशः, तर्हि अननुगमः । न च नास्ति इति बुद्धिवेद्यत्वमेव अभावत्वम् इत्यपि वाच्यम्, विचारासहत्वात् । तथा हि अभावस्य सप्रतियोगिकत्वनियमात् नास्ति इति बुद्धेरालम्बलनं किञ्चिद् अनुगतं वाच्यम्, तच्च न किमपि उक्तम्, नापि भावप्रतियोगित्वं नास्ति इति बुद्धिवेद्यत्वम् इत्यपि वक्तुं शक्यते, प्रतियोगित्वस्य अभावविरहरूपत्वात् सादृश्यादौ अतिव्याप्तेः ।

५. अभावलक्षणविचारे सिद्धान्तिनां समाधानम्

अत्रोच्यते सिद्धान्तिभिः—समवायसामानाधिकरण्यान्यतरसम्बन्धावच्छिन्नप्रतियोगिताकसत्ताऽभावत्वं भावभिन्नत्वं वाच्यम्, तथा चोक्तं न्यायलीलावत्याम्—'सत्ता सम्बन्धबोधविधुरस्य सत्ताविरहस्यैव अभावप्रत्ययहेतुत्वात्[1] । इति ।'

---

१. 'अभावविरहात्मत्वं वस्तुनः प्रतियोगिता'—(न्यायकुसुमाञ्जलौ तृतीयस्तवके द्वितीयकारिका) ।

अत्रायमाशयः—सत्ता द्रव्यगुणकर्मसु समवायेन अवस्थिता सामान्यरूपा, पुनस्तु सर्वत्रैव अस्तीति बुद्धिविषयत्वमपि सत्तात्वेन स्वीकर्त्तव्यम् । तथा चोक्तं न्यायकन्दल्याम्—'यत् प्रमाणेन प्रतीयते, तत्रास्ति व्यवहारो लोकानाम्, 'विपर्यये तु नास्तीति'[1] ।

(ख) न्यायमतमाश्रित्य अभावलक्षणनिरूपणे उत्तरपक्षः

तस्माद् अस्तीति प्रयीयमानेषु पदार्थेषु अस्तित्वसमानार्थकसत्ताधिकरणत्वं सिद्धमेव । द्रव्यगुणकर्मसु समवायेन सामान्यरूपा या सत्ता वर्त्तते, सैव पुनः सामानाधिकरण्यसम्बन्धेन सामान्यविशेषसमवायेष्वपि वर्त्तते, सामानाधिकरण्यमपि स्वसमवायिसमवायरूपं बोध्यम् । अत एव अभावस्य द्रव्यगुणादौ विद्यमानत्वेऽपि पूर्वोक्तसामानाधिकरण्यसम्बन्धेन अवर्त्तमानत्वाद् न तत्र सत्तास्वरूपस्य भावत्वस्य अतिव्याप्तिः । अतस्तथाविधसत्ताऽभावत्वम् एव भावभिन्नत्वम् इति ग्राह्यम् ।

अत एव अनुयोगिताविशेषः अभावत्वम् इति पक्षोऽपि परास्तः, यतस्तत्र अभावत्वस्य अनुयोगितारूपत्वे अनुयोगिताया अभावभेदेन भिन्नत्वाद् अभावप्रतीतेरनुगतत्वं नैव स्यात् । अत्र च पुनः घटाभावपटाभावप्रतीतीनाम् एकधर्मप्रकारकत्वम् अभावांशे अनुगतत्वं युज्यते । ननु जातिभिन्नस्य सत्ताभावस्य स्वरूपतो भानासम्भवतः, जात्यखण्डोपाध्यतिरिक्तपदार्थानां किञ्चिद्धर्मावच्छिन्नत्वनियमात् । अतः अभावत्वेनैव तस्य प्रकारता वाच्या । तच्च अभावत्वं सत्ताऽभावरूपम्, तदपि च पुनः सत्ताऽभावरूपाभावत्वेन प्रकार इति अङ्गीकरणीयम् ।

६. अभावज्ञाने अभावत्वोपस्थितेः आवश्यकतया अनवस्था शङ्का

तथा च अभावप्रतीतौ अनवस्था विषयतानन्त्याद् इति चेत् तत्रोच्यते, अन्यत्र जात्यखण्डोपाध्यतिरिक्तपदार्थानाम् स्वरूपतो भानाऽसम्भवेऽपि अत्र सत्ताऽभावस्य एकस्यैव तत्र तत्र प्रकारत्वाद् विषयानवस्था । तथा च सत्ताऽभावस्य स्वरूपतः प्रकारत्वोपगमाद् न पूर्वोक्तदोषः ।

ननु एवमपि सत्तोपस्थितिशून्यकाले 'घटो नास्ति' इति प्रतीतेरनुपपत्तिः, अभावज्ञाने प्रतियोगिज्ञानस्य हेतुतया सत्ताज्ञानं विना सत्ताऽभावभानासम्भवादिति चेत् अत्रोच्यते—घटो नास्ति इत्यादिशाब्दबुद्धिं प्रति प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिज्ञानं न कारणम्, अपि तु प्रत्यक्षबुद्धिं प्रत्येव प्रतियोगिज्ञानं कारणम् । तथा चोक्तं दिनकर्याम्—'सत्तारूपप्रतियोगिज्ञानं विनापि घटो नास्तीति बुद्धौ स प्रकारः,

---

१. न्यायकन्दल्यां उद्देश्यप्रकरणे, पृ० ३२ ।

५

अभावत्वप्रकारकप्रत्यक्षे एव प्रतियोगिधियो हेतुत्वात्। अन्यथा इदं तमः इति प्रतीत्यनापत्तेः[1]"।

७. सत्ताऽभावस्य स्वरूपतः प्रकारविधया भानम् इति अभावज्ञाने न अनवस्था

इदमत्र तत्त्वम्—इदं तमः इत्यत्र इदमिति प्रत्यक्षविषयः, तमस्त्वं तु न तेजोऽभावत्वरूपम्, अपि तु तेजोऽभावनिष्ठतत्तद्व्यक्तित्वमेव। नातः तेजोज्ञानं विना तथाविधप्रतीतेः अनुपपत्तिः भवेत्। ननु सत्ताऽभावस्य पूर्वानुपस्थितस्यापि प्रकारत्वोपगमे विशिष्टबुद्धिविषयकस्थलीयकार्यकारणभावः भज्येत। तथा हि रक्तत्वविशिष्टरक्तज्ञानं विना रक्तदण्डवान् अयम् इत्यादिविशिष्टबुद्धेरनुदयाद् विशिष्टबुद्धित्वावच्छिन्नं प्रति विशेषणतावच्छेदकप्रकारकविशेषणज्ञानत्वेन हेतुत्वम् इति कार्यकारणभावः सिद्धः। स चात्र व्यभिचरेत्। अतोऽकामेनापि पूर्वानुपस्थितस्य सत्तात्वावच्छिप्रतियोगिताकाभावस्य प्रकारत्वेन भानं परिहर्त्तव्यम् इति चेत्, अत्रोच्यते—सामान्यतो विशिष्टबुद्धिं प्रति विशेषणज्ञानत्वेन हेतुत्वम् इति कार्यकारणभावो नैव संगच्छते, यतो विशिष्टबुद्धित्वं नाम सप्रकारकबुद्धित्वम्, अन्यस्य दुर्वचत्वात्।

एवं विशेषणत्वमपि प्रकारत्वाद् अनतिरिक्तम्। एवं च सति सामान्यतः कार्यकारणभावाङ्गीकारे घटज्ञानादपि पटविशिष्टबुद्धिः सम्भवेत्। घटस्यापि क्वचित् प्रकारत्वात्। अतस्तद्धर्मावच्छिन्नतद्विशिष्टबुद्धिं प्रति तद्धर्मावच्छिन्नतद्ज्ञानत्वेन कारणत्वं वाच्यम्। अतो न प्रदर्शितापत्तिः सम्भवेत्। तथा हि घटत्वावच्छिन्नघटविशिष्टबुद्धिं प्रति घटत्वावच्छिन्नघटज्ञानत्वेन कारणत्वम्। एवं पटत्वावच्छिन्नपटविशिष्टबुद्धिं प्रति पटत्वाच्छिन्नपटज्ञानत्वेन कारणत्वम् इति विशिष्य पृथक पृथक् कार्यकारणभावो वाच्यः।

न च तत्र गौरवमिति वाच्यम्—फलमुखगौरवस्यादोषत्वात्। कार्यकारणभावादिकल्पनायाश्च फलानुरोधित्वात्। एवं च सति अभावत्वविशिष्टबुद्धौ अभावत्वज्ञानस्य हेतुत्वं नैव अभ्युपेतव्यम् प्रयोजनाभावात्। अतः सत्ताऽभावत्वेन सत्ताऽभावज्ञानं विनाऽपि 'घटो नास्ति' इत्यादौ घटाभावत्वेन घटाभावज्ञानं सम्भवेत्।

८. विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुत्वकल्पने बीजम्

अत्रेदं तात्पर्यम्—विशेषणज्ञानं विना विशिष्टबुद्धेः अनुत्पादः फलम्, तदनुरोधित्वात् कार्यकारणकल्पनाया आवश्यकत्वम्। घाटदिज्ञानमन्तरेण घटादिविशिष्टबुद्धेरनुदयात् तत्र कार्यकारणभावः कल्प्यते। अनुपस्थिताभावत्वविशिष्टबुद्ध्युदयादत्र न तथाविधः अनुपस्थिताभावत्वविशिष्टबुद्ध्युदयादत्र न तथाविधः कार्यकारभावः

---

१. भाषापरिच्छेदे दिनकरीटीकायां–प्र० प्र० पृ० ९३।

कल्पनीयमिति तात्पर्यम् । तथा चोक्तं दिनकार्याम्—"विशेषणभेदेन हेतुताया भिन्नत्वेन तत्र तद्हेतुत्वानुपगमात् फलानुरोधित्वात् कल्पनाया इति प्राहुः[1]" ।

९. अभावबुद्धिषु अनुगतधर्मचिन्तनम्

वस्तुतस्तु पूर्वोक्तप्रकारेण सत्ताऽभावत्वेनैव अभावलक्षणे विवक्षणीये तत्र अभावत्वमेव अनिरूपितमिति न वाच्यम्, अभावानुगतबुद्धेरबाधितायाः सर्वसिद्धत्वात् । अत एव नात्माश्रयः । ननु सत्ताऽत्यन्ताभावस्य अभावेषु सम्बन्धाभावात् कथम् अनुगमकत्वम् इति चेत्, उच्यते—विशेषणतारूपसम्बन्धसत्त्वात् तत्र अनुगमकत्वं सम्भवति । घटे रूपसमवाय इत्यत्र तथा समवायः स्वरूपसम्बन्धेनैव विशिष्टव्यवहारं करोति, अत्रापि तथैव बोध्यम् । प्रत्यक्षसिद्ध एक एव अभाव इति बोधोऽनुगतधर्मापेक्षः । तथा चोक्तं न्यायलीलावत्याम्—'स च नञर्थनिरुक्तिमन्तरेणापि स्वग्राहकमानसामर्थ्यात् स्वेन रूपेणावभासमानस्वभावप्रत्यासत्त्या सर्वभावेष्वसम्बद्ध एव अभावप्रत्ययं करोति समवाय इव समवायिव्यवहारम्[2]' ।

ननु सत्ताऽत्यन्ताभावमादाय अभावेष्वनुगतव्यवहारः कथं सम्भवेत् ? आत्माश्रयदोषप्रसङ्गादिति चेत्, उच्यते—प्रमाणबलादत्र आत्माश्रयः अङ्गीकृत एव । यथा प्रमेयत्वं स्वस्मिन्नपि वर्तते, तथैव सत्ताभावोऽभावे वर्त्तते । प्रमेयत्वं यदि स्वस्मिन् न विद्यते, तर्हि केवलान्वयित्वं भज्येत । अतोऽभावोऽपि अभावे विद्यते ।

ननु प्रमेयत्वस्य केवलान्वयित्वात् प्रमाविषयत्वाच्च आत्माश्रयः स्वीकर्त्तव्यः, अभावे तु नात्माश्रयः समीचीनः, युक्तेरभावादिति चेत्, तर्हि भावबुद्ध्यविषयत्वमेव अभावत्वं वाच्यम् । तथा हि अनुगताया भावत्वबुद्धेर्यो विषयः, स एव भावः । अतो भावत्वप्रकारकबुद्धिविषयाऽभावत्वेनाविषयत्वेन इति यावद् यत् प्रतीयते, तदेव अभावत्वम् । तथा चोक्तं न्यायलीलावत्याम्, भावबुद्ध्यविषयत्वं वा अभावत्वम्—

> भिन्नरूपेष्वभावेषु स्वे च रूपे च कश्चन ।
> असम्बद्धोऽप्यभावात्मा तुल्यबोधप्रबोधकः[3] ॥

नन्वेवं यदि तावत् सर्वाभावव्यक्तीः न जानाति, तदा सर्वाभावानुगतः को धर्म इति प्रश्नावकाशः । अथ यदि अभाववृत्तीः जानाति, तदापि तन्निश्चयार्थम् अनुगतधर्मस्वीकारो व्यर्थ इति चेत्, अत्रोच्यते नास्तीति व्यवहारस्य व्यवहर्त्तव्यगतसामान्यविशेषात्मको यो विषयः तथाविधविषयाकाङ्क्षायां सम्भावितायां तत्र सामान्यव्यवस्थाया आवश्यकत्वम् । तथा हि व्यवहर्त्तव्ये अङ्गीभूतम् एकं सामान्यं यावद् नोच्यते, तावद् अनुगतव्यवहार एव नोत्पद्यते । अत एकं सामान्यं वाच्यम् । अभावे अनुगतो

---

१. दिनकार्याम्—पृ० ९४; २. न्यायलीलावत्याम्—पृ० ५६४ ।
३. न्यायलीलावत्याम्–पृ० ५६५ ।

यो व्यवहारः 'अभावोऽयम्' 'अभावोऽयम्' इत्याकारकः, तत्र भावत्वप्रकारकबुद्ध्य-विषयत्वमेव अनुगतो धर्मो वाच्य इति तात्पर्यम्। तथा चोक्तं न्यायलीलावत्याम्—'तस्य सामान्यविशेषविषयसाकाङ्क्षत्वे सामान्यव्यवस्थाया एव अपेक्षणात्[1]'।

१०. अभावस्य इन्द्रियग्राह्यत्वपरीक्षणम्

अत्रेदं तात्पर्यम्—अभावत्वं प्रत्यक्षेण ग्रहीतुं यदि शक्येत; तदैव भावबुद्धि-विषयत्वाभावेन 'अभावः' निर्णेतुं शक्यते, किन्तु इन्द्रियसन्निकर्षाद् उपलभ्यमाने भावात्मके अधिकरणे प्रत्यक्षकारणीभूतेन्द्रियसन्निकर्षो यद्यपि सम्भवेत् अभावेन च स नैव सम्भवति। अभावांशेनैवेन्द्रियस्य योग्यत्वात् सम्बन्धः। तस्माद्भावत्वग्रहणा-सम्भवाद् भावबुद्ध्यविषयत्वं कथं निर्णीयते इति चेत्, तत्रोच्यते—सर्वत्रैव योग्यता कार्यगम्या। दृश्यते च दाहोत्पत्तेः प्राक् वह्नेर्दाहकत्वयोग्यत्वं नैव गृह्यते, अपि तु दाहानन्तरमेव वह्नेर्दाहकत्वं निर्णीय अन्यत्रापि दाहयोग्यता वह्नेः स्थिरीक्रियते। एवमत्रापि यथा इन्द्रियान्वयिव्यतिरेकानुविधायि कार्यं भावे दृश्यते, तद्वद् अभावेऽपि।

तथा हि निमीलितनयनो घटाभावादिकं भूतलादौ स्थितमपि नैव गृह्णाति। पुनस्तु आलोकादिसत्त्वे उन्मीलितनेत्रो घटाभावादिकं प्रत्यक्षीकर्तुं शक्नुयात्। अतो भावानामिव अभावस्यापि इन्द्रियान्वयव्यतिरेकानुविधायित्वं सिद्धमिति फलदर्शनेनैव अभावानामपि इन्द्रियैर्ग्रहणयोग्यत्वं स्वीकर्त्तव्यम्।

तथा चोक्तं न्यायकन्दल्याम्—'कार्यगम्या हि योग्यता यथा इन्द्रियान्वयव्यति-रेकानुविधायि कार्यं भावे दृश्यते तद्वद् अभावेऽपि इति भाववदभावोऽपि इन्द्रियग्रहण-योग्य एव। कार्यदर्शनादेव चास्य इन्द्रियसम्बन्धोऽपि कश्चित् कल्पयिष्यते[2]'।

११. पुनरपि अधिकरणेन्द्रियसंयोगेनैव अभावव्यवहारइत्याशङ्का

ननु सर्वत्रैव अभावः किञ्चिदधिकरणक एव प्रतीयते, निरधिकरणाभावप्रतीतेर-सम्भवात्। अत एव देशादिविशेषमधिकृत्य अभावविषयिणी प्रवृत्तिर्निवृत्तिर्वा सङ्गच्छते। एवं सति यस्मिन् अधिकरणे अभावः प्रतीयते, तस्य अधिकरणस्य प्रतीतावेव इन्द्रियव्यापार आवश्यकः। न त्वभावग्रहणेऽपि इन्द्रियव्यापारस्वीकारे युक्तिर्वर्त्तते। लोकव्यवहारेणापि सिध्यत्ययं पक्षः।

तथा हि कश्चिद् यथायथं स्वरूपेण विद्यालयादिकं प्रतीत्य स्थानान्तरगतः सन् विद्यालये देवदत्तोऽस्ति नास्ति वा इति केनचित् पृष्टः, तदानीमेव ज्ञातजिज्ञासो नास्तीति प्रतीत्या अभावं व्यवहरति नास्तीति। अतः प्रतिषेधस्वभावस्य अभावस्य स्वरूपमेव प्रतिषेधवाक्येन तत्र वक्ति। तस्माद् अधिकरणेन्द्रियसंयोगवशादेव अभाव-व्यवहारः सिध्यति, न तु अभावे इन्द्रियसम्बन्धयोग्यत्वं स्वीकर्त्तव्यम्।

१. न्यायकन्दल्याम्–पृ० ५६७। २. न्यायकन्दल्याम्–अनुमानप्रकरणे–पृ० ५४४।

ननु देवदत्तो नास्तीति व्यवहारात् प्रागेव विद्यालयादिदर्शनकाले देवदत्ताभावो निर्विकल्पकज्ञानेन सम्पन्नः। अतोऽभावस्य निर्विकल्पकज्ञानेन समुपस्थितस्य परत्र व्यवहारकाले स्मरणम्। तद्वशादेव देवदत्तो नास्तीति व्यवहारः। अतो नाधिकरणेन्द्रियसंयोगवशादेव अभावव्यवहार इति चेत् अत्रोच्यते वादिभिः—घटादीनां वस्तूनाम् इन्द्रियसंयोगानन्तरं तत्र विशिष्टज्ञानोपपत्तये निर्विकल्पकं ज्ञानं तत्तद्विषयाणां सम्भवति। न हि इन्द्रियसंयोगं विनापि घटादीनां निर्विकल्पकज्ञानं सम्भवति। अतोऽभावेन इन्द्रियसंयोगाभावे कथङ्कारं तन्निर्विकल्पकं ज्ञानं सम्भाव्येत ? भावस्तु प्रतिषेधस्वभाव इति यस्य प्रतिषेधः, तदधीनमभावज्ञानम्। अतः तर्कप्रतिषेधतामन्तरेण तदभावस्य स्वरूपान्तरं नैव सिध्यति।

१२. अभावस्य निर्विकल्पकज्ञानानुपपत्तिः इति वादिमतम्

एवं च सति प्रतियोगिस्वरूपनिरूपणमन्तरेणाभावस्यापि निरूपणम् अशक्यम्, यतो भावाभावयोरयमेव विशेषो यद् एकस्य विधिस्वरूपतया ग्रहणम्, अपरस्य च अन्यप्रतिषेधमुखेन। यदि तु अभावस्यापि स्वातन्त्र्येण ग्रहणमङ्गीक्रियते तर्हि भावाभावयोर्विशेषो न स्यात्। अतोऽभावस्य निर्विकल्पकज्ञानं नैव सम्भवति। अतोऽभावस्य प्रत्यक्षेण ग्रहणं दुरुपपादम्।

१३. पूर्वोक्तशङ्कितविषये सिद्धान्तिनां समाधानम्

अत्रोच्यते—यत्र देशान्तरं गतः कश्चिद् अपरेण पृष्टो विद्यालये देवदत्तो नास्तीति ब्रवोति—स किं तदानीन्तनानुपलम्भेन इदानीन्तनाभावं ब्रवीति 'इदानीं देवदत्तः नास्तीति' आहोस्वित् प्राक्तनानुपलम्भेन प्राक्तनाभावम् इदानीं वदति विद्यालये देवदत्तो नासीदिति। तत्र यदि पूर्वः कल्पः, तर्हि इदानीन्तनानुपलब्धिस्तावत् प्रत्यक्षयोग्यवस्तूनामनुपलब्धिरिति न सम्भवेत्, वक्तृदेवदत्तयोर्देशव्यवधानात्। अतो व्यवहिते देशे सतोऽपि देवदत्तस्य प्रत्यक्षोपलब्धेरसम्भवात् तत्र, तस्य प्रत्यक्षयोग्यत्वमेव नास्ति। अतो योग्यानुपलब्धेरनुपपत्तेः 'देवदत्तः इदानीं नास्ति' इति व्यवहारो न सम्भवेत्, अपि तु तदानीं देवदत्ताऽभावः सन्दिग्ध एव स्यात्। तदागमनस्यापि तत्र सम्भवात्।

नापि द्वितीयः कल्पः। पूर्वकालीनाभावपरिच्छेदयोग्या प्राक्तनानुपलब्धिः। सा च नेदानीमनुवर्तते, देवदत्तस्य तदानीमवस्थान्तरप्राप्तिसम्भवात्। अविद्यमानया च अनुपलब्ध्या अभावप्रतीतिर्न सम्भवेत्। अतोऽभावः प्रत्यक्षीभूत एव स्वात्मानं स्वातन्त्र्येण प्रतिपादयति।

यच्च पुनरुक्तम्—निधिकरणकाभावप्रतीतेरसम्भवाद् अधिकरणप्रतीत्यैवाभावप्रतीतिः सिध्यति, न तु अभावस्य तत्रापि स्वातन्त्र्यम् अङ्गीकर्त्तव्यम् इति, तत्रेदं

प्रत्युच्यते—इदं भूतलम् अस्ति, अत्र च घटो नास्ति इति प्रतीतेर्वैलक्षण्यं सर्वथैव-स्वीकर्त्तव्यम्। न हि 'भूतलम् अस्ति' इत्येव उक्तौ घटो नास्तीति प्रतीयते। तस्मात् घटो नास्तीति प्रतिषेधस्य किञ्चिद् आलम्बनं स्वीकर्त्तव्यम्। यदि वस्तूनां वैलक्षण्यं न भवेत्, तर्हि प्रतीतिवैलक्षण्यं न सिध्यति। तथा चोक्तं न्यायकन्दलीकारेण—'घटादेरभावात् भूतलं च व्यतिरेच्यैकाकिशब्दस्यार्थः कः समर्थितः भवद्भिः। यो हि नास्तीति प्रतिषेधधिय आलम्बनम्? न हि विषयवैलक्षण्यमन्तरेण विलक्षणाया बुद्धेरभ्युदयः, नापि व्यवहारभेदस्य सम्भव इति[1]'।

(ग) अभावलक्षणोपसंहारः

एवं क्रमेण अभावलक्षणासम्भवम् आशङ्कमानानां सर्वेषां वादिनां मतानि समासतः समालोच्य अभावलक्षणं नैयायिकरीत्या यथामति निरूपितम्। तेन लक्षणाभावाद् नास्त्यभाव इति प्रतिपक्षाणाम् आक्षेपः परिहृतः। ततश्च साम्प्रतं लक्षणेन निरूपितोऽपि 'अभावः' प्रमाणेनापि परीक्षणीय इति अभावसिद्धौ प्रमाणसद्भावासद्भावविषयिणी आलोचना कर्त्तव्या इति तत्रैव मतिर्दीयते।

● ● ●

१. न्यायकन्दल्याम्—पृ० ५५४।

चतुर्थोऽध्यायः

अभावविषये प्रमाणचिन्तनम्

(क) आदौ वैदान्तिकैरभावस्य प्रत्यक्षाग्राह्यत्वप्रतिपादनम्, नैयायिकैस्तत्समाधानम्

एतावता प्रबन्धेन सपरिकरमभावलक्षणं निरूप्य लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति न्यायेन 'अभावः' प्रमाणसिद्धो न वेति विचार्यते। यद्यपि अभावलक्षणनिरूपणावसरे अभावस्य प्रत्यक्षगोचरत्वं न्यायमतसिद्धं प्रसङ्गात् प्रतिपादितमेव, तथापि अत्र वादिनां बहुधा विप्रतिपत्तिदर्शनात् तासां विप्रतिपत्तीनां विशेषतः परिहारः कर्त्तव्य इति पुनरपि स एव विषयो विदुषां पुरस्तात् समुपस्थाप्यते।

तत्रादौ वैदान्तिकानामाशयः प्रपञ्च्यते। तत्र अभावानां प्रत्यक्षं यदि सम्भवेत्, तर्हि प्रत्यक्षसिद्धत्वादेव 'अभावः' नापलपितुं शक्यते, किन्तु अभावस्य प्रत्यक्षमेव न सम्भवेत्। यतस्तद्विषयकप्रत्यक्षत्वावच्छिन्नं प्रति तद्विषयेन्द्रियसन्निकर्षो व्यापारविधया कारणम्। अभावेन तु पुनर्न इन्द्रियसन्निकर्षः सम्भवेत्। तथा हि रूपग्राहिणा रूपवद्ग्राहिणा च चक्षुषा नाभावसन्निकर्षः, अभावस्य रूपाभावात्, अद्रव्यत्वाच्च। नापि त्वक्सन्निकर्षः, स्पर्शाभावात्। नापि घ्राणसन्निकर्षो गन्धाभावात्। नापि रसनासम्बन्धः, रसाभावात्, नापि श्रवणसन्निकर्षः, अशब्दत्वात्। नापि बहिरिन्द्रियनिरपेक्षमनः सन्निकर्षोऽभावस्य, बहिरिन्द्रियं विना ग्रहणासम्भवात्।

१. इन्द्रियसन्निकर्षाभावादभावस्य प्रत्यक्षत्वासम्भवशङ्का

अपि च संयोगः, समवायो वा नात्र सन्निकर्षः सम्भवति, तयोर्भावधर्मत्वात्। न च संयुक्तविशेषणतालक्षणः सन्निकर्षः सम्भवतीति वाच्यम्, विचारासहत्वात्। यतः केनचित् सम्बन्धेन सम्बद्धयोरेव विशेषणविशेष्यभावः सम्भवति। यथा दण्डदेवदत्तयोः संयोगसम्बन्धेन सम्बद्धयोरेव विशेषणविशेष्यभावः, यथा वा समवायसम्बन्धेन सम्बद्धयोः शुक्लपटयोर्विशेषणविशेष्यभावः। अतोऽभावेन यदि केनचित् सम्बन्धेन भूतलादिकं सम्बद्धं स्यात्, तदा तत्सम्बन्धमुपजीव्य विशेष्यभूते भूतले चक्षुःसम्बन्धमादाय चक्षुःसंयुक्तविशेष्यतानिरूपितविशेषणतासन्निकर्षेणाभावस्य चाक्षुषप्रत्यक्षत्वं सम्भवेत्, किन्तु भूतल एव केनचित् सम्बन्धेन अभावः स्थातुं नार्हति। अतः दूरमास्तां तथाविधविशेषतासन्निकर्षः। अतो विशेषणतादिस्वरूपेणाभावो ग्रहीतुं न शक्यते। तथा चोक्तं तत्त्वप्रदीपिकायाम्—'नापि विशेषणविशेष्यभावः, तस्यापि मूलसम्बन्धगर्भतया तन्निवृत्तौ निवृतेः[1]'।

१. पृ० ४३५।

यदि तु विनापि सम्बन्धं विशेषणविशेष्यभावः स्वीक्रियते, तर्हि तथाविध-विशेषणविशेष्यभावो न प्रत्यक्षोपयोगी, सम्बद्धं वर्त्तमानत्वं गृह्यते चक्षुरादिनेति नियमात् ।

२. विशेषणताविशेषः सन्निकर्षो भवितुं नार्हतीति शङ्का

वस्तुतस्तु सविकल्पकप्रत्यक्षस्य सर्वत्रैव विशिष्टवैशिष्ट्यावगाहित्वनियमाद् वैशिष्ट्यस्य च सम्बन्धं विना अनुपपत्तेरसम्बद्धयोः सुतरां वैशिष्ट्यविरहान्न सविकल्पकप्रत्यक्षग्राह्यत्वं सम्भवेत् । न चासम्बद्धस्यापि प्रत्यक्षत्वे को दोष इति वाच्यम्, अतिप्रसङ्गात् । तथा हि—तत्तदिन्द्रियासम्बद्धमपि वस्तु यदि तैस्तैरिन्द्रियैर्गृह्येत, तर्हि चक्षुषापि गन्धग्रहणम्, घ्राणेनापि रूपग्रहणं केन वारयितुं शक्यते । किं बहुना—अतीतानागतानां व्यवहितविप्रकृष्टानां तथा अतीन्द्रियाणां इन्द्रियासम्बन्धत्वेऽपि इन्द्रियग्राह्यत्वं प्रसज्येत । तस्मादकामेनापि इन्द्रियसम्बद्धमेव वस्तु तत्तदिन्द्रियैः प्रत्यक्षीक्रियत इति स्वीकर्त्तव्यम् । अभावस्य च इन्द्रियाग्राह्यत्वमुपपादितमधस्तात् ।

ननु अतीन्द्रियाणामनागतानामतीतानां तथा व्यवहितविप्रकृष्टानां च प्रत्यक्ष-कारणाभावान्न प्रत्यक्षम् । अतस्तत्तत्कारणाभावरूपप्रतिबन्धकसत्त्वात् तेषां तेषां न प्रत्यक्षम् । अतो नैष दोष इति मन्येत, तथाप्यभावस्य चाक्षुषत्वमुपपादयितुं न शक्यते । अभावस्य महत्त्वोद्भूतरूपाद्यसम्भवात् । अतो नाभावः प्रत्यक्षयोग्य इति चेत्, तत्रोच्यते नैयायिकैः—निमीलितनयनस्य भूतलाधिकरणकघटाभावाद्यनुपलम्भात् भूतलादिभिश्चक्षुःसन्निकर्षे सति घटाभावाद्युपलम्भाच्च अन्वयव्यतिरेकबलादभाव-प्रत्यक्षं प्रति इन्द्रियाणां कारणत्वमस्त्येव ।

३. अभावप्रत्यक्षार्थं विशेषणताविशेषस्य प्रत्यासत्तित्वव्यवस्थापनम्

ननु इन्द्रियस्य भावेन सहैव संयोगसन्निकर्षः सम्भवेत्, न तु अभावेनापि । इन्द्रियेण सन्निकृष्टं विना नान्यद् वस्तु गृह्यत इत्येवं नियमः । तस्माद् अभावेन सन्निकर्षाभावात् कथमभावस्य इन्द्रियग्राह्यत्वमिति चेत्, न विशेषणतया प्रत्यासत्तेरिहापि सम्भवात् ।

अत्रायमाशयः—किञ्चिदधिकरणेऽभावोऽनुभूयते । न हि निरधिकरणाभाव-प्रतीतिः सम्भवेत् । तथा च—यस्मिन् देशे अभावः प्रतीयते, तेन देशेन सह विशेषण-विशेष्यभावः सम्बन्धः । तथा च भूतलं घटाभाववदित्युक्तौ भूतलत्वावच्छिन्नविशेष्यतानिरूपितघटाभावत्वावच्छिन्नप्रकारताशाली बोधोऽनुभूयते । एवं विशेष्यविषणता-भावसम्बन्ध एव अभावस्य ग्राहकः । न च विशेष्यविशेषणताभावसम्बन्धोऽपि सम्बन्धा-न्तरमूलकः, यतो विशेष्येण विशेषणस्य सम्बन्धं विना विशेष्यविशेषणभावो नैव सिध्यति । तथा च अभावग्रहणस्थले एवंविधविशेषणविशेष्यभावः केन सम्बन्धेन

सिध्यतीति वाच्यम्। भावस्थल एव विशेष्यविशेषणभावः सम्बन्धान्तरमपेक्षते। एवं भावस्थलेऽपि न केवलं सम्बन्धमात्रेणैव विशेष्यविशेषणभावः सम्पद्यते।

४. विशेषणताविशेषस्य सम्बन्धान्तरघटितत्वाशङ्का, तन्निराकरणं च

यदि तु यत् सम्बद्धम्, तदेव विशेषणं स्यात्, तर्हि पादादिभिः कथञ्चिद् दण्डादिसंस्पर्शे 'दण्डी पुरुषः' इति प्रत्ययोत्पत्तिप्रसङ्गः। एवं यद् विशेषणं तदपि सम्बन्धान्तरसापेक्षमित्यपि न नियमः। अतो यथा प्रतिबध्यप्रतिबन्धकभावसम्बन्धः, यथा वा वाच्यवाचकभावसम्बन्धः, तथैव विशेषणविशेष्यभावोऽपि स्वतन्त्र एव कश्चित् सम्बन्धः, तथैव प्रतीतेः प्रसिद्धत्वात्। तस्माद् विशेषणविशेष्यभाव एव सम्बन्धः। स च भूतलादिना अभावस्य सम्बन्धः।

५. नास्तीति प्रत्यय एव अभावसिद्धौ हेतुः

वस्तुतस्तु अस्तीति प्रतीतेरेव यथा भावः सिध्यति, तथैव नास्तीति प्रतीतेरपि 'अभावः' सिध्यत्येव। सर्वत्रैव च सकलप्राणिसाक्षिकमुपजायमानं संवेदनद्वयं प्रसिद्धम्। इह घटोऽस्ति, तथैव इह घटो नास्तीति। तत्र अस्तिताज्ञान इव नास्तिताज्ञानेऽपि अनुभव एव प्रमाणम्। अनुभवश्च प्रत्यक्षानुमित्युपमितिशाब्दानामन्यतमः। तत्र प्रत्यक्षबलेनैवात्र घटो नास्तीति व्यवहारः सर्वलोकप्रसिद्धः। चक्षुष्मता एव घटोऽस्ति इतिवद् घटो नास्तीति प्रत्यय आपादयितुं शक्यते, अन्धस्य तथा प्रत्ययानुदयात्।

६. अभावस्य प्रतियोगिग्राहकेन्द्रियग्राह्यत्वनियमः

इदमत्र विशेषतो लक्षणीयं यत् प्रतियोगी येन इन्द्रियेण गृह्यते, अभावोऽपि तेनैवेन्द्रियेण गृह्यते। अतोऽनुभवप्रामाण्यानुरोधाद् अभावस्य प्रत्यक्षं कथमपलपितुं शक्यते? अतएव भूतलं घटाभाववद् इत्यादौ भूतलघटाभावयोः सम्बन्धान्तरासम्भवेऽपि व्यवहारौपयिकतया विशेष्यविशेषणभावः सम्बन्धोऽवश्यं स्वीकार्यः।

७. अत्र न्यायमञ्जरीकारमतम्

तथा चोक्तं न्यायमञ्जर्याम्—'क्रियया कर्तृस्थया वा गमनादिकया कर्मस्थया वा भेदनादिकया सह संयोगाद्यभावेऽपि विशेषणविशेष्यभावः सम्बन्धस्तद्वदभावस्यापि भविष्यतीति'[1]। एवं प्रतियोगिना सह विरोधाख्यः सम्बन्धोऽभावस्य।

८. अत्र लीलावतीकारमतम्

न च अभावे गृहीते विशेषणता सिध्यति, विशेषणतासिद्धौ च अभावो गृह्यत इति अन्योन्याश्रय इत्यपि वाच्यम्, विशेषणता नाम स्वरूपसम्बन्धाख्यः पदार्थः। सा चोपलब्धेः पूर्वमपि अस्त्येव। उपलब्ध्या सा गृह्यत इत्येव मात्रम्। तथा चोक्तं न्यायलीलावत्यां कण्ठाभरणटीकायाम्—'तदुपलब्धेस्तु प्रत्ययजननस्वाभाव्यलक्षणाया विशेषणतायाः पूर्वमपि सत्त्वात्[2]'।

१. न्या० म० पृ० ५६। २. न्यायलीलावत्यां, कण्ठाभरणटीकायां-पृ० ५५०।

अपि चेन्द्रियेण अन्वयव्यतिरेकसत्त्वात् तदेव अभावोपलब्धौ करणम् । न चाधिकरणग्रहणेनैवोपक्षीणसामर्थ्यमिन्द्रियम्, तथा सति त्वगिन्द्रियेणोपनीते पीते अन्धस्यापि नीलभेदग्रहापत्तेः ।

अत्रायमाशयः—अभावाधिकरणस्य ग्रहणेनैव यदीन्द्रियाणां सामर्थ्यं क्षीणं स्यात्, तर्हि अभावाधिकरणग्राहिणेन्द्रियेण अभावग्रहणं न सम्भवेत्, इति यदुक्तम् तत्रेदमुच्यते—अभावाधिकरणग्रहणादेवेन्द्रियस्य सामर्थ्यमवसितमिति न अधिकरण-ग्राहिणेन्द्रियेणाभावो गृह्येत, इत्येवमङ्गीकारे सति अभावाधिकरणमगृह्णतेन्द्रियेण अभावग्रहणं न भवेत् । न च तथा स्वीकर्त्तव्यम् । तथा सति अभावाधिकरणस्येन्द्रियेण ग्रहणं विनापि यत्किञ्चिद् वस्तुन उपनयादिसन्निकर्षेण भानेऽपि तत्र अन्धस्य अभाव-ग्रहणं प्रसज्येत ।

एवं च सति अन्धस्य यद्यपि नीलाभावाधिकरणं पीतं न इन्द्रियग्राह्यम्, तथापि उपनीतभाने पीते नीलभेदग्रहणं स्वीकर्त्तव्यं स्यात् । अतो न केवलमिन्द्रियेण अभावा-धिकरणग्रहणमात्रं, स्वीकर्त्तव्यम्, अपि तु अभावग्रहणमपीन्द्रियेणैव स्यादिति अवश्य-मङ्गीकर्त्तव्यम् । न च प्रतियोगिग्राहकेणेन्द्रियेण अभावाधिकरणग्रहणं तन्त्रमित्यपि वाच्यम्, वायौ चक्षुषा रूपाभावानुपलम्भप्रसङ्गात् । तस्मात् प्रतियोगिग्रहणे यथेन्द्रि-यस्य सामर्थ्यम्, तथैव अभावग्रहणेऽपि तत्सामर्थ्यं कल्पनीयम् ।

अत्रेदं पुनस्तत्त्वम्—यदा इन्द्रियैरभावप्रत्यक्षं सम्पादनीयम्, तत्र योग्यानुप-लब्धिः सहकारित्वेन कारणं भवति । अत एव योग्यानुपलब्धिरभावप्रत्यक्षे कारणमिति सिद्धान्तः । तथा चोक्तं—'यदि स्यादुपलभ्येत इत्येवं यत्र प्रसज्यते' इति ।

तथा हि यद्वस्तु चाक्षुषप्रत्यक्षयोग्यम्, तद्वस्तु विहाय प्रत्यक्षकारणकलापे सति अन्यस्य प्रत्यक्षे सत्यपि प्रत्यक्षयोग्यं यद्वस्तु, तत्र नोपलभ्यते, तद्वस्तुन एव अभावश्चक्षुषा प्रत्यक्षीक्रियते । तथा हि यत्र आलोकसंयोगादिसत्त्वेऽपि चक्षुषा घटो नोपलभ्यते, तत्रैवात्र घटो नास्तीति घटाभावप्रत्यक्षं जायते । अत एव प्रतियोग्या-रोपोऽभावप्रत्यक्षे हेतुः । तथा चोक्तं—'भूतलादौ घटादि ज्ञाने जाते घटाभावादिकं न जायते । तेन अभावोपलम्भे प्रतियोग्युपलम्भाभावः कारणम् । तत्र च योग्यतापि अपेक्षिता[१]' इति ।

तथा हि तदिन्द्रियजन्यतत्सम्बन्धावच्छिन्नतदभावप्रत्यक्षं प्रति तदिन्द्रियजन्याना-हार्यतत्संसर्गकतत्प्रकारकोपलम्भाभावः कारणम् । अत एकसंसर्गेण प्रतियोगिप्रकारक-ज्ञानसत्त्वेऽपि अन्यसंसर्गेण अभावप्रत्यक्षोत्पत्तौ न कापि बाधा ।

---

१. न्या० सि० मु० पृ० २६२–२६४ ।

९. अभावप्रत्यक्षं प्रति कारणनिर्णयः

अत एव संयोगेन 'घटवद् भूतलम्' इति ज्ञानसत्त्वेऽपि भूतले समवायेन 'घटो नास्ति' इति प्रत्यक्षमुपपद्यते। एवं प्रतियोगिनः प्रत्यक्षयोग्यतां विना तदभावस्यापि प्रत्यक्षयोग्यता न भवेत्। अत एवातीन्द्रियाणामभावः प्रत्क्षेण ग्रहीतुं न शक्यते। प्रतियोगिनो योग्यता नाम प्रतियोगिसत्त्वप्रसञ्जितप्रतियोगिकत्वरूपा।

अत्रायमर्थः—यस्य घटादेः प्रतियोगिनः सत्त्वप्रसक्त्या प्रसञ्जितः=आपादित इति यावत्। उपलम्भरूपः प्रतियोगी यस्य सः अभावप्रत्यक्षे हेतुः। यथा भूतलादावालोकसंयोगादिसत्त्वे 'यद्यत्र घटः स्यात् तर्हि उपलभ्येत' इत्यापादनं सम्भवति। तत्र घटाभावादेः प्रत्यक्षं भवति।

१०. अभावप्रत्यक्षे योग्यतानिरूपणम्

ननु जलपरमाणौ पृथिवीत्वाभावः कथं न प्रत्यक्षेण गृह्यते ? तथा हि जलादिविशेष्यकप्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितोपलम्भस्य विशेष्यतासम्बन्धेन योऽभावः, तस्याभावस्य जलपरमाण्वादौ सत्त्वेन तत्र पृथिवीत्वाभावस्य प्रत्यक्षत्वापत्तिः। एवं भूतलं यदि समवायेन घटवत् स्यात्, तर्हि तद्वत्तयोपलभ्येत, इत्याकारकोपलम्भाभावस्य घटवत्यपि भूतले सत्त्वेन तत्र विशेष्यतासम्बन्धेन घटाभावप्रत्यक्षापत्तिः।

न च संयोगसम्बन्धेन घटवति भूतले घटाभावे अभावप्रत्यक्षोपयोगिसन्निकर्षाभावादेव नेयमापत्तिः सङ्गच्छत इति वाच्यम्, अधिकरणान्तरान्तर्भावेन घटाभावे तथाविधस्य सन्निकर्षस्य सत्त्वादिति चेत्, तत्रोच्यते—तदधिकरणविषयकाभावप्रत्यक्षे तदधिकरणकतदापादकयोग्यतदुपलम्भस्य विषयतासम्बन्धावच्छिन्नप्रतियोगिताकाभावो हेतुः। उपलम्भे तदधिकरणतदापादकापत्तियोग्यत्वं च तत्प्रतियोगिसत्त्वनिष्ठव्याप्तिनिरूपकम्। तथा हि यत्राधिकरणे यस्य प्रतियोगिनो येन सम्बन्धेन अभावो ग्राह्यः, तेन सम्बन्धेन तदधिकरणे तत्प्रतियोगिसत्त्वमपादनयोग्यं यदि भवेत्, तदैव तदधिकरणे तत्सम्बन्धावच्छिन्नतत्प्रतियोगिकाभावो ग्रहीतुं शक्यते। जलपरमाणौ च समवायसम्बन्धेन पृथिवीत्वं नापादनयोग्यम्, यतोऽधिकरणस्य प्रत्यक्षयोग्यत्वं विना तदधिकरणे प्रत्यक्षेण अन्यस्यापादनं नैव सम्भवेत्।

उक्तं च सिद्धान्तमुक्तावलीव्याख्यानावसरे दिनकरीटीकायाम्—'अत्र च तदापादककापत्तिर्यत्र नोत्पन्ना, तत्र तदभावप्रत्यक्षानुपपत्तिरिति योग्यत्वनिवेशः[१]' इति। तथा च भूतलादौ चक्षुःसंयोगानन्तरमापादनं विनापि 'घटो नास्ति' इति प्रतीतेरानुभविकतयाऽत्र योग्यतानिवेश इति तात्पर्य्यम्।

---

१. दिनकर्य्याम्–पृ० २६४–२६५।

ननु भूतलादौ घटादिसत्त्वेऽपि चक्षुःसंयोगाद्यभावे घटोपलम्भानुदयात् तत्रापि योग्यानुपलब्धिसत्त्वेन घटाभावप्रत्यक्षापत्तिर्भवितुनर्हतीति, उपलम्भे न केवलप्रतियोगिसत्त्वस्य व्यापकता सम्भवेत्। अत उपलम्भे केवलप्रतियोगिसत्त्वस्य व्यापकत्वाऽसम्भवेन कुत्राप्यभावप्रत्यक्षं मा भूत्।

यदि पुनः प्रतियोगिसत्त्वरिक्तप्रतियोग्युपलम्भसामग्रीविशिष्टप्रतियोगिसत्त्वव्यापकता विवक्ष्येत, तदा जलपरमाणौ पृथिवीत्वाभावप्रत्यक्षवारणं न सम्भवेत्, तत्र पृथिवीत्वसत्तातिरिक्तपृथिवीत्वोपलम्भकारणसामग्रीविशिष्टप्रतियोगिसत्त्वव्यापकतायाः सम्भवादिति चेत्, तत्रोच्यते—तत्र योग्यताघटकीभूतव्याप्त्यंशे तदधिकरणकावृत्तिधर्मानवच्छिन्नत्वस्य निवेशः कर्त्तव्यः। तथा हि यदधिकरणविशेष्यकाभावप्रत्यक्षत्वं कार्यतकावच्छेदकं भवेत्, तदधिकरणावृत्तिरित्यर्थः। एवं च सति जलपरमाणौ पृथिवीत्वाभावप्रत्यक्षापत्तिर्न भवेत्। तथा हि अत्र प्रतियोगिसत्त्वनिष्ठपरमाण्ववृत्तिमहत्त्वधर्मानवच्छिन्नव्याप्तिनिरूपकोपलम्भेऽप्रसिद्धः स्यात्। अतः तदभावरूपकारणविरहादेव न जलपरमाणौ पृथिवीत्वाभावप्रत्यक्षत्वापत्तिः। अत एव गन्धवदणुभिन्नत्वस्य जलपरमाणुवृत्तित्वाच्च पुनरपि जलपरमाणौ पृथिवीत्वाभावप्रत्यक्षापत्तिर्न भवेत्।

वस्तुतस्तु प्रतियोगिनिष्ठप्रकारतानिरूपितलौकिकविशेष्यताभावप्रयोजकीभूतो योऽभावः, तस्य प्रतियोगित्वमेव प्रतियोगिग्राहकत्वमिति नियमः। पृथिवीत्वनिष्ठप्रकारतानिरूपितलौकिकविशेष्यताया जलपरमाणावसत्त्वान्न तत्र कोऽपि दोषः।

न चैवं पिशाचाभावप्रत्यक्षं न स्यात्, तत्र पिशाचत्वप्रकारतानिरूपितलौकिकविशेष्यत्वाप्रसिद्ध्या तद्घटितनिरुक्तयोग्यानुपलब्धिविरहादिति वाच्यम्, सर्वत्राभावप्रत्यक्षे निरुक्तयोग्यानुपलम्भस्य हेतुत्वं न विविक्षणीयम्. अपि तु योग्यस्यैवाभावप्रत्यक्षं प्रति निरुक्तयोग्यत्वं कारणम्। अयोग्यपिशाचाद्यभावप्रत्यक्षे तु तदधिकरणीयप्रसञ्जनप्रसञ्जितप्रतियोगिकतदधिकरणीयत्वोपलम्भस्य विषयतासम्बन्धावच्छिन्नाभाव एव तत्र प्रतियोगितिष्ठो हेतुः। अत एव न दोषः।

इदमत्र तात्पर्यम्—तद्विषयकैन्द्रियिकप्रत्यक्षं प्रति यानि यानि कारणानि अन्वयव्यतिरेकनियमसिद्धानि, अभावप्रत्यक्षस्थलेऽपि प्रतियोगिव्यतिरिक्तानि तानि सर्वाणि कारणान्यपेक्ष्यन्ते। अत एव यद्वस्तु प्रत्यक्षायोग्यम्, तदभावोऽपि न प्रत्यक्षः। अत एव गुरुत्वाभावादिकं प्रत्यक्षेण ग्रहीतुं न शक्यते। एवं संसर्गाभावप्रत्यक्षस्थले प्रतियोगिनो योग्यता अपेक्षिता, अन्योन्याभावप्रत्यक्षस्थले चाधिकरणयोग्यता अपेक्षिता। तथा चोक्तं सिद्धान्तमुक्तावल्याम्—'संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्यता अन्योन्याभावप्रत्यक्षे अधिकरणयोग्यता अपेक्षिता'[1] इति।

१. सिद्धान्तमुक्तावल्याम्, प्रत्यक्षखण्डे, पृ. (२७०, २७२ ।

ननु केयं योग्यता नाम ? न तावद् जातिर्योग्यतेति वक्तुं शक्यते, अभावावृत्तित्व-प्रसङ्गात् । नापि प्रत्यक्षप्रयोजकोपाधिरूपा, सप्तातिरिक्तस्य पदार्थस्यानङ्गीकारात् । तत्रोच्यते—'प्रतिबन्धकाभावत्वमेव योग्यत्वम् । अत एव घटादीनां प्रत्यक्षप्रतिबन्धक-त्वाभावाद् योग्यत्वम् गुरुत्वादीनां च तथाविधप्रतिबन्धकत्वादेव न योग्यत्वमिति न्यायमतं समाप्तम् ।

(ख। अभावस्यानुपलब्धिप्रमाणगोचरत्वमङ्गीकुर्वतां भाट्टानां मतम्

केचित् पुनरनुपलब्धिनामकं षष्ठं प्रमाणम् अभावग्राहकं स्वीकुर्वन्ति । तेषाम-यमाशयः—सर्वत्रैव प्रमाणानां प्रमेयनिरूपणपरत्वं प्रसिद्धम् । तत्र किञ्चत् प्रमेयं सद् भावाख्यं किञ्चित् पुनरभावाख्यमिति । तत्र भावाख्यं प्रमेयं भावाख्यैः प्रत्यक्षादिभिः प्रमाणैर्गृहीतं भवति । यत्र च पुनरभावाख्यं प्रमेयम्, तत्र भावग्राहकप्रमाणानां व्यापारा-भावात् सुतरामेव अभावग्राहकं स्वतन्त्रं प्रमाणं स्वीकर्त्तव्यम् ।

११. वेदान्तमतेऽपि अभावस्य अनुपलब्धिप्रमाणगम्यत्वम्

तथा हि इह 'घटो नास्ति' इति यत्र प्रतीयते, तत्र घटं प्रति सदुपलम्भकप्रमाण-वृत्तिर्नास्तीति गम्यते, यतो घटोपलम्भकप्रमाणासत्त्वे घटो नास्तीति प्रत्ययानुत्पत्तेर्घटा-ख्यसदुपलम्भकप्रमाणाभाव एव तत्र घटाभावं निर्धारयति । अत एव तत्र घटविषयक-ज्ञातृव्यापारानुत्पाद एव दृश्यघटाद्यदर्शनाख्यं प्रामाणम्, नास्तीति बुद्धिः फलं च ।

तथा चोक्तं शास्त्रदीपिकायां—'न च तदैन्द्रियकम्, इन्द्रियव्यापाराभावेऽपि तद्ज्ञानोत्पत्तिदर्शनात् । योऽह्नि प्रातःकाले गृहे अवस्थितः, मध्यन्दिनसमये पृच्छ्यते किमस्मिन् गृहे प्रातःकाले माथुरः कश्चित् पुरुषः शुक्लवासा दीर्घतमो लोहितवर्णः समागत इति, स तदानीमेव योग्यस्मरणानुदयात् तस्याभावं प्रातःकालीनमवधारयति विनैव इन्द्रियव्यापारेण[1]' इति ।

एवं श्लोकवार्त्तिकेऽप्युक्तम्—

प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते ।
वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता[2] ।। इति ।

एवं शबरस्वामिनापि भाष्ये उक्तम्—'अभावोऽपि प्रमाणाभावो नास्तीत्यर्थस्य असन्निकृष्टस्य[3]' इति ।

अत्र च प्रमाणाभावः स्वरूपत एव चक्षुरादीन्द्रियवत् प्रमाणम्, न तु ज्ञाय-मानः, ज्ञानद्वारा न अभावहेतुकानुमानस्यापि अनुपलब्धित्वमिति वेदान्तिकानामभि-प्रायः ।

---

१. शास्त्रदीपिकायां—१।१।५; २. श्लो० वा०, अ० प० १;
३. शा० भा० १।१।५ ।

१२. अभावस्य प्रमाणत्वपरीक्षणम्

ननु प्रमाणाभावो न प्रमाणम्, प्रत्यक्षेणैवाभिप्रेतार्थसिद्धिसम्भवात्। दर्शितं च प्रागेव विशेषताविशेष्यसन्निकर्षेणेन्द्रियद्वारा अभावग्रहणमिति चेत्, तत्रोच्यते—सम्बद्धयोर्हि दण्डपुरुषयोः, पटरक्तयोर्वा विशेषणविशेष्यभावः सम्भवेत्। अतो यत्र संयोगसमवायादिसम्बन्धगर्भितविशेष्यविशेषणभावः सम्भवेत्, तत्रैव विशेषणताविशेषाख्यः सन्निकर्षो भवितुमर्हति। अभावस्थले तु विशेषणविशेष्यघटकतत्तसम्बन्धाभावात् सुतरामेव विशेषणविशेष्यभावनिवृत्तौ विशेषणताविशेषाख्यसम्बन्धस्यापि निवृत्तिः।

१३. वृत्तिनियामकसम्बन्धरूपसन्निकर्षाभावस्थले न प्रत्यक्षमित्यत्र वैशेषिकाणां सम्मतिः

अत्रेदं तात्पर्यम्—यद् वस्तु स्वयं केनचित् सम्बन्धेन प्रत्यक्षविषयीभूतं भवेत्, तदेवान्यत्रापि तत्सम्बन्धविशेषबलाद् विशेष्यं वा विशेषणं वा भवितुमर्हति यथा दण्डपुरुषयोः। तत्र दण्डः पुरुषश्च स्वतन्त्रेण संयोगादिसन्निकर्षवशात् प्रत्यक्षविषयीभूतो भवेत्, अत एव तयोर्विशेष्यविशेषणभावोऽपि सङ्गच्छते, अत एव वृत्तिनियामकसम्बन्धेनाधाराधेयभावसिद्धौ तेनैव सम्बन्धेन सम्बद्धानां प्रत्यक्षकालेऽपि स एव सम्बन्धः सन्निकर्षतया व्यवस्थितः स्यात्, एतस्मादेव कारणाद् वैशेषिकनये वृत्तिनियामकसम्बन्धरूपसन्निकर्षाभावात् समवायस्य प्रत्यक्षत्वं नाङ्गीकृतम्।

तथा चोक्तं प्रशस्तपादभाष्ये—'एवम् अविभागिनो वृत्त्यात्मकस्य समवायस्य नान्या वृत्तिरस्ति, तस्मात् स्वात्मवृत्तिः, अत एवातीन्द्रियः, सत्तादीनामिव प्रत्यक्षेषु वृत्त्यभावात्, स्वात्मगतसंवेदनाभावाच्च इति।

व्याख्यातं च कन्दलीकारेण—कृतको हि संयोगस्तस्य वृत्त्यात्मकस्यापि वृत्त्यन्तरमस्ति, कारणसमवायस्य कार्यलक्षणत्वात्, समवायस्य वृत्त्यन्तरं नास्ति, तस्मादस्य स्वात्मना स्वरूपणैव वृत्तिर्न वृत्त्यन्तरेणेत्यर्थः। अत एव अतीन्द्रियः सत्तादीनामिव प्रत्यक्षेषु वृत्त्यभवात्। यथा सत्तादीनां प्रत्यक्षेष्वर्थेषु वृत्तिरस्ति, तेन ते संयुक्तसमवायादिन्द्रियेषु गृह्यन्ते, नैवं समवायस्य वृत्तिसम्भवः। अतोऽतीन्द्रियोऽयम्, संयोगसमवायापेक्षस्यैवेन्द्रियस्य भावग्रहणसामर्थ्योपलम्भात्'[1] इति।

अपि च, अभावो न केनचित् संयोज्यते, अद्रव्यत्वात्। न वा क्वचित् समवेति गुणादिवैलक्षण्यात्। यदि च संयुक्तविशेषणभावसन्निकर्षवशात् चक्षुः अभावं गृह्णाति, तर्हि तदविशेषात् संयुक्तद्रव्यसम्बन्धिनो रसादीनपि गृहणीयात्, तदभावमपि मा

१. न्यायकन्दल्यां—पृ० ७८५।

ग्रहीत्, अयोग्यत्वाविशेषात् । अपि च, यदि योग्यायोग्यत्वकृतग्रहणाग्रहणनियमाङ्गीकारे योग्यतैव सन्निकर्षो भवेत्, किं तर्हि षट्सन्निकर्षप्रख्यापनेन ?, तस्माद् कथमपि न घटाभावज्ञानं चाक्षुषम् ।

१४. सन्निकर्षाभावाद् अभावस्य न प्रत्यक्षमिति पूर्वपक्षोपसंहारः

ननु भूतलप्रदेशं घटाभावं च विस्फारितेन चक्षुषा निरीक्षेत्, निमीलितनयनेन तस्मिन् तयोरन्यतरमपि द्रष्टुं न शक्नुयाज्जनः, तत्र च समाने तद्भावभावित्वे प्रदेशज्ञानं चाक्षुषम्, अभावज्ञानं च न चाक्षुषमिति कुतो विशेषोऽवधार्येत, इति चेत्, उच्यते—प्रत्यक्षस्य सन्निकर्षनियतत्वादसन्निकृष्टं वस्तु चक्षुषाग्रहीतुं नैव शक्येत, अतोऽभावो न प्रत्यक्षेण ग्राह्यः ।

नापि अनुमानयोग्योऽपि अभावः, तत्र लिङ्गानुपपत्तेः । अनुमानं हि लिङ्गज्ञानं विना नैव सम्भवति, लिङ्गं च साध्याव्यभिचारि साध्यमनुमापयेत्, तत्र तु अभावाख्येन साध्येन कस्यापि लिङ्गस्य व्याप्तिर्नैव घटते । तथाहीदं घटाभाववदित्यनुमाने भूप्रदेशादिकं लिङ्गं भवितुं नार्हति, भूप्रदेशेन अभावस्य सम्बन्धग्रहणासम्भवात्, सम्बन्धाग्रहणं च सम्बन्धाभावादेव सम्पद्यते, सम्बन्धाभावश्च प्रागेवोक्तः । अग्रहीत सम्बन्धस्यापि भूप्रदेशस्यानैकान्तिकत्वाद् नाभावसाध्यकानुमानलिङ्गत्वम् ।

१५. भूप्रदेशादेर्लिङ्गत्वानर्हत्वात् कस्यापि लिङ्गस्याभावे अभावसाधकमनुमानं न सम्भवति

न च घटादर्शनमेव लिङ्गमित्यपि वाच्यम्, यतो घटादर्शनं घटवृत्तिर्दर्शनाभावः, स च घटस्यैव धर्मो भवति न तु तदभावस्य, अतः साध्यासम्बद्धतया घटाभावसाधकं लिङ्गं न घटदर्शनाभावः, न च घटाभावप्रतीतिं प्रति घटदर्शनाभावस्य व्याप्रियमाणत्वात् सुतरामेव तल्लिङ्गं भवितुमर्हतीति वाच्यम्, इतरेतराश्रयप्रसङ्गात्, तथा च तद्धर्मत्वे सति लिङ्गप्रतीतिजनकत्वम्, प्रतीतिजन्मनि सति तद्धर्मताज्ञानमदर्शनस्य दुर्घटमेव, सिद्धायां तु प्रतीतौ किं पक्षधर्मताज्ञानेन प्रागेव साध्यप्रतीतेः सिद्धत्वात् ।

१६. घटधर्मत्वाद् घटादर्शनस्य साध्यासम्बद्धतया लिङ्गत्वानुपपत्तिः

तथा ह्युक्तं श्लोकवार्त्तिके—

> गृहीत्वा वस्तुसद्भावं स्मृत्वा च प्रतियोगिनम् ।
> मानसं नास्तिताज्ञानं जायतेऽक्षानपेक्षणात्[1] ॥

---

१. श्लो० वा० अ० प० २७ ।

१७. दृश्यादर्शनासिद्धिप्रदर्शनम्

इदमत्र तात्पर्यम्—दृश्यादर्शनं यदि अदर्शनमात्रम्, तर्हि आश्रयभूतं भूतलादिकमपि तत्र दृश्यतया प्रतीयमानत्वाददर्शनमेव न सिध्यति, यत् आश्रयभूतं भूतलादिकं वस्तु येन गृहीतं स्यात्, तस्यैव घटो नास्तीति प्रतीतिरपि सम्भाव्येत, नान्यस्य। अतो दृश्यादर्शनं नैव सिध्यति। अपि च व्याप्तिग्रहणं साध्यहेतूभयधर्मिग्रहणपूर्वकम्। तत्र व्याप्तिग्रहणवेलायामेव कुतोऽभावाख्यधर्मिग्रहणं सम्भाव्येत? तदपि धर्मिग्रहणं यदि पुनरनुमानपूर्वकम्, तर्हि अनवस्था दुर्वारा। एवम् अदर्शनाख्यलिङ्गमपि दर्शनाभावत्वस्वरूपमिति तत्तत्स्वरूपपरिच्छेदचिन्तायामपि इयमेव पद्धतिः समापतति। तस्माद् दूरमपि गत्वा अभावग्रहणार्थं प्रमाणान्तरं व्यवस्थापयितु नैव शक्नुयात। अतो योग्यानुपलब्धिर्नाम अभावग्राहकं प्रमाणान्तरमस्थेयम्।

१८. योग्यानुपलब्धिप्रमाणान्तरेणैवाभावग्रहणमिति भाट्टसिद्धान्तवर्णनम्

इदमत्र तात्पर्यम्—ये हि मीमांसका अभावस्य अधिकरणात्मकत्वं मन्यन्ते, तेषां भावस्यैवाधिकरणस्य रूपान्तरेण असद्रूपस्यैव अभावपदेन व्यवहारः। तदेवोक्तं श्लोकवार्त्तिके—

स्वरूपपररूपाभ्यां नित्यं सदसदात्मके।
वस्तुनि ज्ञायते कैश्चिद् रूपं किञ्चित् कदाचन[1]॥

एवं चाभावतिरक्तस्य धर्म्यनङ्गीकारेऽपि भाव एव रूपान्तरेण अभावतया अङ्गीक्रियते। तथा च सति भूतलत्वरूपेण चक्षुरिन्द्रिययोग्यस्यापि भूतलस्य घटाभावादिरूपेण तद्योग्यत्वं न भवति। अन्यथा घटवत्त्वदशायामपि घटाभावप्रत्यक्षतापत्त्या सर्वसंकरप्रसङ्गः। तस्माद् अभाववद् भूतलमित्यादौ भूतलाभावयोः सम्बन्धस्य प्रमाणान्तरेण ग्रहणासम्भवाद् अभावप्रमाणग्राह्यत्वमेव सिद्धम्। अतस्तथाविधविशिष्टज्ञानमभावप्रमाणकमेव।

वस्तुतस्तु ज्ञानकरणाजन्यत्वादभावस्यानुभवसिद्धत्वाच्च तत्र प्रत्यक्षासम्भवेनानुपलब्धिप्रमाणं तत्र स्वीकर्त्तव्यम्।

१९. अतीन्द्रियस्यानुपलब्धिगम्यत्वं न वेति विचारः

नन्वभावस्येन्द्रियायोग्यतया तद्ग्राहकमनुपलब्धिनामकं प्रमाणान्तरं यदि अङ्गीक्रियेत, तर्हि अतीन्द्रियाणामनुमानस्थलेऽपि अनुपलब्धिनामकं प्रमाणान्तरमेव स्वीकर्त्तव्यमिति चेत्, तत्रोच्यते—व्याप्तिज्ञानादिसम्भवस्थलेऽनुभवसिद्धस्यातीन्द्रियस्य ग्राहकमनुमानं यद्यपि सम्भवेत्, तथापि ज्ञानकरणाजन्यत्वेनैव अभावग्रहणस्थलेऽनुपलब्धिनामकं प्रमाणं विलक्षणमेव स्वीकर्त्तव्यम्, व्याप्तिग्रहणादेरसम्भवात्। अत एव

१. श्लो० वा० अ० प०-२२।

'ज्ञानकरणाजन्याभावानुभवासाधारणकारणमनुपलब्धिरूपं प्रमाणम्' इत्युक्तं वेदान्त-परिभाषाग्रन्थे[1]।

२०. अनुपलब्धिगम्यस्याभावस्यानुभवविषयत्वव्यवस्थापनम्

अत्रेद तात्पर्यम् यथा घटानुभवजन्यं घटज्ञानमनुभवात्मकम्, एवं घटानुपलम्भ-जन्यं घटाभावज्ञानमपि अनुभवात्मकमेव। तथा हि यदा क्वचिज्जनस्तत्र व्याघ्रादिकम-दृष्ट्वा तदस्मरणाच्च तदभावमगृहीत्वैव तद्देशमात्रं दृष्ट्वा देशान्तरं गतः केनचित् पृष्टः—भवद्दृष्टे तस्मिन् देशे कश्चित् व्याघ्रः समागतः किम्? स तदा तं देशं स्मरन्नपि तत्र व्याघ्रादीनामभावं प्राग् गृहीतम्, तदैव गृह्णाति। तत्र च न मध्यन्दिने प्रातःकालिकस्याभावस्येन्द्रियसन्निकृष्टस्य प्रत्यक्षेण ग्रहणं सम्भवति, तत्र च मध्यन्दिनसमयजातं व्याघ्रादिस्मरणाभावजन्यज्ञानमनुभवात्मकमेव स्वीकर्त्तव्यम्, न तु स्मरणात्मकम्, व्याघ्राभावसंस्कारादीनां पूर्वमसत्त्वात्। एवं च तस्य ज्ञानस्य प्रमात्मकतया स्मृत्यन्यत्वौचित्यात्। प्रमालक्षणे अनधिगतार्थकेति विशेषणात्। अत एवाभावस्मरणासाधारणहेतुभूते संस्कारे अतिव्याप्तिवारणार्थमनुपलब्धिलक्षणेऽनुभवेति पदमपि उपात्तम्।

(ग) प्रत्यक्षादिप्रमाणपञ्चकैर्नाभावोपलब्धिरिति वैशद्येन भाट्ट-सम्मतयुक्तिप्रदर्शनम्

वस्तुतस्तु प्रमाणपञ्चकाभावोऽनुपलब्धिः। तथा चोक्तं श्लोकवार्त्तिके—

प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते।
वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता[2] ॥ इति।

२१. अनुपलब्धेः षष्ठप्रमाणत्वव्यवस्थापनम्

तथा च प्रमाणपञ्चकाभावस्य प्रमाणाभावपदार्थत्वकथनादनुपलब्धिप्रमाण-स्यापि प्रमाणत्वेन ग्रहणे न दोषः। एवं च सति यस्य प्रतियोगिनो यत्प्रमाणविषयत्व-योग्यता तादृशप्रमाणाभावेनापि तज्जातीयतदभावानुभवो जायते। एवं च अनु-मानादिप्रमाणाभावेन यद्यपि प्रथमतो धर्माभावादिज्ञानम्, तथापि धर्माभावाद्यनु-मितिरपि न दोषाय। तदुक्तं श्लोकवार्त्तिके—

न चात्राप्यनुमेयत्वं लिङ्गाभावात् प्रतीयते।
काव्यस्य स्यात् प्रमाणत्वं लिङ्गत्वेन विना ध्रुवम्[3] ॥

---

१. वेदान्तपरिभाषायां—पृ० २४३। २. श्लो० वा० अ० प० १।
३. तदेव—२९,४२।

नन्वेवं चेत् स्यात् प्रमाणाभावजन्यातीन्द्रियाभावानुमितिस्थलेऽपि अनुपलब्ध्या एव अभावो गृह्यतामिति चेत्, उच्यते—योग्यानुपलब्धिरेवाभावग्राहिका। सुतरां धर्माधर्मादीनां योग्यत्वाभावादेव न तत्रानुपलब्धिप्रसंगः। तत्र अनुपलब्धेर्योग्यत्वं नाम तर्कितप्रतियोगिसत्त्वप्रसञ्जितप्रतियोगिकत्वम्। तथा हि तर्कितेन प्रतियोगिसत्त्वेन प्रसञ्जितस्तर्कित उपलब्धिरूपप्रतियोगी यस्याः सैव योग्यानुपलब्धिः।

२२. योग्यानुपलब्धेः स्वरूपनिरूपणम्

तथा हि—अत्र भूतले यदि घटः स्यात् तर्हि घटवत्तया उपलभ्येत। एवं यत्र प्रतीतिस्तत्रैव अनुपलब्ध्या घटाभावो गृह्यते। एतेनैतदपि सिद्धं यच्चाक्षुषप्रत्यक्षोपयोगिनाम् आलोकसंयोगादीनां वर्त्तमानतायामेव तर्कितस्य प्रतियोगिनः सत्त्वमापादयितुं सम्भाव्येत। न हि अन्धकारे स्थितानापि घटानामुपलब्धिर्जायते। अतः प्रतियोग्युपलब्धि प्रति यानि यानि कारणानि, प्रतियोगिनं विहाय तेषां तेषां कारणानां वस्त्वन्तरप्रत्यक्षेण प्रमाणितानां विद्यमानतायामेव प्रतियोगिनः सत्त्वमापादयितुं शक्नुयात्। तस्माद् अन्धकारादौ नानुपलब्ध्या घटाभावादिग्रहः। तथा च प्रतियोगितद्व्याप्येतरयावत्प्रतियोग्युपलम्भकसमवहितत्वमेवानुपलब्धेर्योग्यत्वम्।

अथवा योग्ये अधिकरणे प्रतियोग्यनुपलब्धिर्योग्यानुपलब्धिः। तत्रैव योग्यत्वं नाम प्रतियोगिसत्त्वप्रसञ्जनप्रयोज्यप्रतियोग्युपलब्धिप्रसञ्जनविषययोग्यत्वम्, योग्यतावच्छेदकं चात्र अधिकरणस्य तादृशप्रतियोग्युपलम्भकसमवधानम्, तेन अन्धकारे घटाभावः, आत्मनि धर्माद्यभावश्च नानुपलब्धिगम्यः। अत एव स्तम्भे तादात्म्येन पिशाचसत्त्वे तत्र सम्भवत्प्रत्यक्षतापत्त्या तदभावोऽनुपलब्धिगम्य इति वेदान्तपरिभाषोक्तमपि सङ्गच्छते।

ननु यदि प्रतियोग्युपलम्भकनिखिलकारणसमवधानदशायामेव घटादिप्रतियोगिनोऽभावोऽनुपलब्धिगम्यः, तर्हि अनुपलब्धेः प्रमाणान्तरत्वाङ्गीकारो निष्फल एव, क्लिप्तेन इन्द्रियेणैव संयुक्तविशेषणतादिसन्निकर्षादभावस्य ग्रहणसम्भवात्। घटवत्त्वदशायां च तत्र घटस्यैव ग्रहाद् घटाभावग्राहकसन्निकर्षाभावाच्च न घटाभावग्रहणम्, यतो घटासमानकालीनतत्तद्भूतलादिकमेव घटाभावग्राहकसन्निकर्षत्वेन विवक्षितम्। अतोऽधिकरणेन्द्रियसन्निकर्षस्थलेऽनुपलब्धिप्रमाणस्य स्वीकारात् क्लिप्तेनेन्द्रियादिनैव तत्र अभावग्रहणं युक्तम्, इन्द्रियान्वयव्यतिरेकसत्त्वादिति चेत्, तत्रोच्यते वैदान्तिकैः—प्रतियोग्यनुपलब्धेरपि अभावग्राहककारणशरीरे निवेशादिन्द्रियजन्यभावप्रत्यक्षस्थले च तथात्वाभावाद् न ऐन्द्रियिकज्ञानमनुपलब्धिग्राह्यम्। इन्द्रियान्वयव्यतिरेकयोरधिकरणज्ञानार्थमेवावश्यकतया न तत्र अभावज्ञानार्थमपीन्द्रियस्य कारणत्वम्।

२३. इन्द्रियेणान्वयव्यतिरेकसत्त्वाद् भूतलादिकस्य च सन्निकर्षत्वादभावस्य नानुपलब्धिप्रमाणान्तरगम्यत्वमिति अनुपलब्धिप्रमाणान्तरत्वखंण्डनम्

ननु अभावस्याधिकरणस्वरूपत्वाङ्गीकारपक्ष एवानुपलब्धेः प्रमाणान्तरत्वेन स्वीकारात्, तत्राधिकरणस्य चाक्षुषत्वाङ्गीकारे सुतरामेव तदात्मकस्याभावस्यापि चाक्षुषत्वमेव सिद्धम्। अतः फलीभूतस्याभावज्ञानस्य चाक्षुषत्वानपायात् सुतरां तत्करणतयाऽनुपलब्धेरपि प्रत्यक्षकरणान्तर्भाव एव समुचितः। अतोऽनुपलब्धेः प्रमाणान्तरत्वं न सिध्यति, इति चेत्, तत्रोच्यते वैदान्तिकैः—करणवैजात्येनैव अभावज्ञानवैजात्यं सिध्यति। अभावस्य इन्द्रियग्राह्यत्वाऽसम्भवात् तत्र अनुपलब्धिप्रयोजनमवश्यं स्वीकर्त्तव्यम्। अत एव फलीभूतज्ञानस्य प्रत्यक्षत्वेऽपि सर्वत्र करणस्यापि प्रत्यक्षप्रमाणत्वमिति न सिध्यति।

२४. तत्रैव वैदान्तिकमतप्रदर्शनम्

वेदान्तनये 'दशमस्त्वमसि' इत्याद्यनुरोधेन शब्दजन्यस्यापि प्रत्यक्षज्ञानस्य स्वीकारात्। अतोऽनुपलब्धाभावस्य वस्तुत इन्द्रियग्रहणायोग्यत्वाद् अभावज्ञानमिन्द्रियग्राह्यप्रत्यक्षज्ञानाद् विलक्षणमेव। अधिकरणस्य अभावस्वरूपत्वेऽपि अभावत्वेन रूपेण यद्ज्ञानं जायते, तत्तु अधिकरणज्ञानाद् विलक्षणमेव। तथा हि 'भूतलं घटाभाववत्' इत्यत्र भूतलत्वावच्छिन्नविषेष्यकघटत्वावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नप्रकारकं यद्ज्ञानं सम्पद्यते, तत्तु भूतलत्वप्रकारकज्ञानाद् भिन्नमेव। अतः फलीभूतज्ञानस्यापि अधिकरणज्ञानविलक्षणतया तज्ज्ञानकरणत्वेनानुपलब्धेः प्रमाणान्तरत्वं सिध्यतीति अनुपलब्धेः प्रमाणान्तरत्ववादिनामाशयः।

(घ) न्यायमतमाश्रित्य अनुपलब्धेः प्रमाणान्तरत्वखण्डनम्

अत्रेदमुच्यते नैयायिकैः—अनुपलब्धिशब्दार्थविचारेण कस्तावदर्थो लभ्यते, तदेवादौ विचारणीयम्। तत्र विचारितानामर्थानां मध्ये न कस्यापि भवदभिमतप्रमाणान्तरमिह सिध्यति। तथा हि उपलब्धेरभावोऽनुपलब्धिरित्यत्र कोऽयमभावः? न तावत् उपलब्धेः प्रागभाव एव अनुपलब्धिशब्दार्थः, तथाविधेन अर्थेन यदि सर्वत्रैवाभावग्रहणमिष्येत तर्हि घटोपलब्धिप्रध्वंससमयेऽभावप्रमितिर्न सम्भवेत्, तत्र उपलब्धिप्रागभावस्यासत्त्वात्। भवति च पुनः घटोपलब्धिप्रध्वंसकाले घटोपलब्धेरभावज्ञानम्।

अथ यद्युपलब्धेः प्रध्वंस एव अनुपलब्धिशब्दार्थः स्यात्, तर्हि घटप्रागभावस्य घटात्यन्ताभावस्य च प्रमितिर्नैव सम्भाव्येत, यतो यस्य घटस्य प्रागभावस्तत्र वर्त्तते, स घटः कदाचिदपि नैवोपलब्धः। अतस्तस्या उपलब्धेः प्रध्वंसः कथं सम्भाव्येत? न हि बन्ध्यापुत्रस्य मरणं विद्यते। अथ यदि उपलब्धेरन्योन्याभाव एव अनुपलब्धिशब्दार्थः स्यात्, तर्हि घटोपलब्धिकालेऽपि तदभावप्रतीतिर्दुर्वारा। अथ यदि उपलब्धेर-

त्यन्ताभाव एवानुपलब्धिशब्दार्थः स्यात्, तत्रापि न निस्तारः, अत्यन्ताभावस्य त्रैकालिकत्वेनोपलब्धिदशायामपि तदत्यन्ताभावसत्त्वात् पूर्ववदेव घटोपलब्धिदशायामपि घटाभावोपलब्धिप्रसङ्गात्।

२५. 'अनुपलब्धि' शब्दान्तर्गतनञर्थविचारेण तत्र चतुर्विधाभावानुपपत्तिप्रदर्शनम्

न च यद्देशे यत्काले येन सम्बन्धेन घट उपलभ्यते, तद्देशे तत्काले तत्सम्बन्धावच्छिन्नघटात्यन्ताभावस्य ग्रहणं भवन्मतेऽपि सम्भवत्येव। अत्यन्ताभावस्य नित्यत्वाङ्गीकारात्। अत एव तत्र घटासमानकालीनतत्तद्देशादिकं घटाभावग्राहकसन्निकर्षरूपेण भवताङ्गीकृतम्। तत एव नित्यस्यापि घटाभावस्य घटवति भूतले स्थितस्यापि ग्रहणं न भवेत्।

एवं वैदान्तिकमतेऽपि उपलब्धेरत्यन्ताभावस्यानुपलब्धिस्वरूपत्वे प्रतियोग्यारोपेण तत्र प्रयोजनं वर्त्तते। अतो घटवति भूतले यद्यत्र घटः स्यादित्यादिप्रतियोग्यारोपासम्भवेन न घटाभावज्ञानमिति चेत्, अत्रोच्यते—तथापि अनुपलब्धेः करणत्वासम्भवात् प्रमाणत्वं नैव सिध्यति। तथा हि व्यापारवत् कारणमेव करणमिति सर्वप्रसिद्धम्। अत्र चानुपलब्धिकरणत्वपक्षे कस्तावद् व्यापार इत्येवादौ विचारणीयम्।

२६. व्यापाराभावादनुपलब्धेर्न करणत्वम्

न च 'अत्र यदि घटः स्यादित्यनेन यद्घटस्मरणं भूतलाद्यधिकरणग्रहणं वा स एव व्यापारः' इत्यपि वाच्यम्, तत्र व्यापारलक्षणासमन्वयात्। तथा हि तज्जन्यत्वे सति तज्जन्यजनको हि व्यापारः। अत्र चानुपलब्धिजन्यत्वे सति अनुपलब्धिजन्यस्याभावज्ञानस्य जनक एव व्यापारो भवितुं युक्तः। तत्र प्रतियोगिस्मरणस्याधिकरणज्ञानस्य वाऽनुपलब्धिजन्यत्वाभावात् सुतरामनुपलब्धेर्व्यापारत्वं तयोर्नैव स्यात्।

ननु न केवलमनुपलब्धिमात्रमेवाभावग्राहकं प्रमाणम्, अपि तु योग्यताविशिष्टानुपलब्धिरेव प्रमाणम्। अनुपलब्धिगता योग्यता च अभावप्रतियोगिभूतं यत् किञ्चिद् वस्तु, तथा तद्वस्त्विन्द्रियसन्निकर्षं च विहायान्यानि भूतलादीनि यावन्ति कारणानि तानि योग्यतापदेन ग्राह्यानि। अत एवम्भूतयोग्यतान्तर्गततया तद्भूतलाद्यविनाभूतेन्द्रियसन्निकर्षस्यापि तत्रान्तर्भुक्ततया तज्जनकत्वादनुपलब्धेस्तज्जन्यत्वमपि सुतरां सिध्यति। अतो व्यापारलक्षणसमन्वयः स्यादेवेति चेत्, तत्रोच्यते—ग्राह्येन्द्रियसन्निकर्षस्यैव ग्राह्यज्ञानजनकतयाऽधिष्ठानात्मकभूतलादिसन्निकर्षेण अभाववत्त्वावच्छिन्नाभावज्ञानं नैव सम्भवति। व्यापारलक्षणान्तर्गतसन्निकर्षमादाय यद्यभावस्यानुपलब्धेः करणत्वमभिप्रेतं स्यात्, तर्हि ग्राह्यतावच्छेदकावच्छिन्नविषयानुयोगिकचक्षुःप्रतियोगिकसन्निकर्षस्यैव तत्र चक्षुर्जन्यप्रत्यक्षज्ञानजनकत्वेन ग्रहणं समुचितम्, अन्यथा

व्यापारलक्षणायोगात् । अत्र योग्यताघटकीभूततत्तदधिकरणादिसन्निकर्षस्य तथाविधाधिकरणादिज्ञानजनकत्वमेव, न त्वभावज्ञानजनकत्वम् । अतोऽभावज्ञानकरणशरीरे अभावानुयोगिकसन्निकर्षस्य व्यापारत्वेन ग्रहणौचित्याद् अधिकरणसन्निकर्षेण अभावज्ञानकरणत्वं प्रत्यक्षस्यैव भवति, न तु अनुपलब्धेः ।

२७. अनुपलब्धिप्रमाणत्वखण्डनम्

अपि तु 'कुण्डे दधि' इति वदिह 'भूतले घटो नास्ति' इत्यत्रापि व्यापारेऽनुपरतेन्द्रियस्यैव भवति । तत्र च भूतलत्वावच्छिन्नविशेष्यतानिरूपितघटाभावत्वावच्छिन्नप्रकारताशालिन्येकस्मिन् ज्ञाने विशेष्यांशस्य चाक्षुषम्, विशेषणांशस्य प्रमाणान्तरजनितं ज्ञानमिति कथमुच्येत ?

न चानुमानस्थले प्रत्यक्षदृष्टेन धूमेन अदृष्टस्य वह्नेर्ज्ञानं यथा भवति, तथैवात्रापीन्द्रियसन्निकृष्टेन भूतलेन प्रतियोग्यनुपलम्भसहकृतेन यद्ज्ञानम्, तत्तु प्रत्यक्षाद् भिन्नमित्यपि वाच्यम्, तत्र धूमेन वह्नेरनुमानस्थले धूमदर्शनेन व्याप्तिबलात् वह्नेर्ज्ञानं सम्पद्यते । अत्र चाधिकरणदर्शनेनाभावज्ञानं न तथाविधनियमबलसिद्धम् । न हि सर्वत्रैव भूतलाद्यधिकरणज्ञानेऽपि तद्वृत्तिघटाभावादिज्ञानमपि समुपजायते । अतो भूतलाद्यधिकरणेन सह घटाभावादेः अविनाभावसम्बन्धग्रहणासम्भवादनुमानवदत्रापि ज्ञानं न सम्भाव्यते । अत एकेनैवेन्द्रियेण युगपद् धर्मधर्मिभावापन्नयोर्भूतलघटाभावयोर्द्वयोरेव ज्ञानं सम्भवेदित्यनुपलब्धेः प्रमाणान्तरत्वं नास्त्येव ।

वस्तुतस्तु अनुमितिस्थले पक्षेन्द्रियसन्निकर्षे सत्यपि तत्रावस्थितं साध्यमप्रत्यक्षमेव तिष्ठति । न हि पर्वतेन्द्रियसन्निकर्षेण पर्वते स्थितस्यापि वह्नेः प्रत्यक्षं भवेत् । अभावप्रत्यक्षस्थलेत्वधिकरणेन द्रष्टुरबाधितचक्षुःसंयोगं विना ज्ञानं नोत्पद्यते इति वादिभिरपि स्वीकृतमेव । एवं च सति भूतलाद्यधिकरणेन चक्षुःसन्निकर्षे सति तद्वृत्तिघटाभावादीनामप्रत्यक्षतयाऽवस्थानं नैव सम्भवेत् । तस्मादधिकरणप्रत्यक्षकाल एव तद्वत्यभावप्रत्यक्षोदयाद् अभावज्ञानं प्रत्यक्षात्मकमेव ।

न चाभावज्ञानस्थलेऽपि अधिकरणप्रत्यक्षानन्तरमेव प्रतियोग्यनुपलम्भवशात् तदभावप्रतीतिरपि नाधिकरणाभावयोर्युगपद् ज्ञानमित्यपि वाच्यम्, अधिकरणप्रत्यक्षानन्तरक्षणे यदि पृथगेव अभावज्ञानमभ्युपेतव्यं स्यात्, तर्ह्यभावज्ञानं प्रति चक्षुरादीन्द्रियाणामन्वयव्यतिरेकौ न सिध्यतः । भवतापि च पुनस्तत्रान्वयव्यतिरेकौ चक्षुरादीनामभावज्ञाने स्वीकृतौ । तस्मादिन्द्रियान्वयव्यतिरेकानुविधायित्वादभावज्ञानं चाक्षुषमेव इति वाच्यम् ।

ननु नीरूपस्य चक्षुषा सम्बन्धासम्भवाच्चक्षुरसम्बद्धविषयत्वेनाभावज्ञानं चाक्षुषमिति कथमुच्यते, इति चेत्, उच्यते--न हि सर्वत्र रूपवतां चाक्षुषत्वमिति नियमः ।

रूपवतामपि परमाणूनामचाक्षुषत्वात्। अतश्चक्षुर्जनितस्याभावज्ञानस्य न रूपवत्त्वेन चाक्षुषत्वम्, अपि तु चक्षुर्जनितज्ञानविषयत्वाच्चाक्षुषत्वम्। एवं चक्षुःसम्बद्धमपि सर्वत्र न चाक्षुषम्। आकाशस्य विभुत्वेन तत्रापि चक्षुःसम्बन्धः अस्त्येव, विभुत्वादाकाशस्य। सर्वमूर्त्तसंयोगानुयोगित्वमेव विभुत्वम्।

२८. चक्षुषाऽसम्बद्धस्याप्यभावस्य चाक्षुषत्वव्यवस्थापनम्

ननु चक्षुषाऽसम्बद्धस्यापि अभावस्य चक्षुर्ग्राह्यत्वाङ्गीकारे दूरव्यवहितानामपि विषयाणां चक्षुषा ग्रहणमस्तु इति चेत्, अत्रोच्यते—भावे खल्वयं नियमो यद् असम्बद्धं चक्षुषा न गृह्यते। अभावस्थले तु नायं नियमः। फलबलवशादेव एवं विधो नियमोऽङ्गीकर्त्तव्यः।

तथा चोक्तं जयन्तभट्टपादैः—'भावे खल्वयं नियमः—यदसम्बद्धस्य चक्षुषाऽग्रहणम्। अभावस्तु असम्बद्धोऽपि चक्षुषा ग्रहीष्यते[1]' इति।

अत एव षड्विधानां लौकिकसन्निकर्षाणां वर्णनमपि भावाभिप्रायिकमेव। तथा हि सम्बद्धं यच्चक्षुषा गृह्यते, तत्रैव षण्णां सन्निकर्षाणामन्यतमेन वर्त्तितव्यम्। एवमिन्द्रियाणां प्राप्यकारित्वस्वीकरणमपि भावाभिप्रायिकमेव। तस्माद् अवस्तुत्वादभावस्य तेन सन्निकर्षमलभमानमपि चक्षुःअभावविषयज्ञानं जनयतीत्येवं सिद्धम्।

२९. चक्षुरसम्बद्धस्यापि व्यवहिताभावस्याप्रत्यक्षत्वोपपादनम्

इदमत्र तात्पर्यम्—'इन्द्रियाणां प्राप्यकारित्वं भावपदार्थे पक्ष एव युज्यम्। अभावानां च भावभिन्नत्वात् तत्रेन्द्रियाणां प्राप्यकारित्वं नैव समादरणीयम्। तस्माच्चक्षुषा अभाव .त्यक्षं न दोषाय।

नन्वेवमसम्बद्धस्यापि चक्षुषा ग्रहणाद् देशान्तरस्थितानामप्यभावानां चक्षुषा ग्रहणं भवतु अविशेषादिति चेत्, तत्रोच्यते—अधिकरणग्रहणसापेक्षत्वादभावप्रतीतेः। आश्रयस्य च सन्निहितस्यैव चक्षुषा ग्रहणसम्भवाद् दूरस्थानामधिकरणानां प्रत्यक्षासम्भवेन सुतरां तदधिकरणकाभावप्रत्यक्षोऽपि न भवेत्। संयुक्तविशेषणतासन्निकर्षेण वा अभावस्य प्रत्यक्षत्वं यथा प्रागेव प्रतिपादितम्, अत्रापि तदेव ग्राह्यम्।

३०. तत्तदिन्द्रियजन्यप्रत्यक्षं प्रति तत्तदिन्द्रियसंयोगस्य विशेषतो हेतुत्वम्

वस्तुतस्त्वभावेन भूतलाद्यधिकरणानां संयोगसमवाययोः सम्बन्धयोरसम्भवेऽपि तत्र विशेष्यविशेषणताभावाख्यसम्बन्ध एव अभावग्राहकः। न च संयुक्तविशेषणताख्यसन्निकर्षो यथा रूपाभावे वर्त्तते, तथा रसाभावेऽपि तुल्य एव वर्त्तते। अतश्चक्षुषापि

१. न्या० म० प्र० प्र० पृ० ४८।

रूपाभावाद् रूपाभावप्रत्यक्षं भवतु इत्याशङ्का जायेत, साऽपि चक्षुःसंयुक्तसंमवाय-सन्निकर्षस्थलेऽपि तुल्यैव वर्तते। तथा हि चक्षुःसंयुक्तं द्रव्यं तत्समवायो रूपे यथा वर्त्तते, तथैव चक्षुःसंयुक्ते द्रव्ये समवेतो यो रसः तत्रापि चक्षुःसंयुक्तसमवायस्तुल्य एव इत्यहो भावप्रत्यक्षस्थलेऽपि अयं दोष आपद्यते। तत्र च येनोपायेन स दोषः परिहर्त्तव्यः, अत्रापि स एवोपायः समुद्भावनीयः[1]। तथा हि द्रव्यप्रत्यक्षं प्रति इन्द्रिय-सन्निकर्षत्वेन हेतुत्वे त्वक्प्रभासंयोगात् चाक्षुषत्वापत्तिः स्यात्।

एवमन्धकारे घटचक्षुःसंयोगाद् घटस्पार्शनप्रत्यक्षापत्तिः। अत एव तत्तदिन्द्रि-येण विशिष्यैव कार्यकारणभावो ग्राह्यः। तथा च द्रव्यचाक्षुषं प्रति चक्षुःसंयोगः कारणम्। द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायः कारणमिति, अनया रीत्या कार्यकारणभावो वाच्यः। तेन द्रव्यचाक्षुषत्वावच्छिन्नं प्रत्येव चक्षुःसंयोगस्य कारण-त्वाच्चक्षुःसंयुक्तसमवायसन्निकर्षेण चक्षुर्ग्रहणयोग्यस्यैव प्रत्यक्षं भवति, न त्वयोग्य-स्यापि। अत एव सन्निकर्षस्थले तत्तदिन्द्रियग्रहणयोग्यतापि वस्तुनिष्ठा स्वीकर्त्तव्या। तथा चोक्तं न्यायमञ्जर्याम्—'तस्मात् षट्प्रकारा सन्निकर्षानुगामिनी योग्यता वक्तव्या'[2] इति। तस्माद् रसादीनां चक्षुरयोग्यत्वान्न चक्षुषा रसग्रहणम्।

इदमत्र तात्पर्यम्—यत्र योग्यता वर्त्तते, तत्रैव सन्निकर्षः स्वीकर्त्तव्यः। न तु सन्निकर्षवशादेव योग्यता स्वीकर्त्तव्या। अत एव न चक्षुषा रसग्रहणाशङ्का। तथा चोक्तं जयन्तभट्टेन—'यत्र योग्यता, तत्र सन्निकर्षोऽप्यस्ति, न तु यत्र सन्निकर्षोऽस्ति, तत्रावश्यं योग्यता'[3] इति।

३१. अभावप्रत्यक्षस्थलेऽपि सन्निकर्षोपपत्तिप्रतिपादनम्

अत एव चाभावस्यापि चक्षुर्ग्रहणयोग्यत्वात् तत्र सन्निकर्षस्तद्बलादेव स्वीकर्त्तव्यः। न च योग्यत्वं भावनिष्ठमित्यपि वाच्यम्, यतोऽभावस्यापि प्रमेयत्वमभि-

---

१. न केवलं सन्निकर्षमात्रेणैव प्रत्यक्षम्, अपि तु नियतेन्द्रियनिमित्तं प्रत्यक्षम्। अत एव तत्र रसग्राहकेण रसनेन्द्रियेणैव रसो ग्राह्यः, न तु चक्षुषा। तथा चोक्तं प्रशस्तपादभाष्ये – 'रूपरसगन्धस्पर्शेषु अनेकद्रव्यसमवायात् स्वगतविशेषात् स्वाश्रयसन्निकर्षाद् नियतेन्द्रिय-निमित्तमुत्पद्यते'। तत्रैव न्यायकन्दलीकारेणाप्युक्तम्—'स्वाश्रयसन्निकर्षाद् रूपादीनां य आश्रयः, तस्य ग्राहकैरिन्द्रियैः सन्निकर्षाद् नियतेन्द्रियनिमित्तं चक्षुर्निमित्तं रूपे, रसन-निमित्तं रसे, घ्राणनिमित्तं गन्धे, त्वगिन्द्रियनिमित्तं स्पर्शे ज्ञानम् उत्पद्यते' (न्या० क० प्रत्यक्षपरिच्छेदे—पृ० ४५९)।

२. न्या० म० प्र० प्र० पृ० ४९; ३. तदेव—पृ० ४९।

ध्येयत्वं वाच्यत्वं चेति भावनिष्ठानां धर्माणां स्वीकारात् तत्र योग्यतायाः सत्त्वे का हानिः ? अतः प्रतियोगिग्राहकेणैवेन्द्रियेणाभावप्रत्यक्षनियमाद् रसादेश्चक्षुर्ग्रहणायोग्यत्वेन तदभावोऽपि सुतरां चक्षुरगोचर एवेति स्थितम् ।

३२. अतीतकालीनाभावस्मरणमपि न अनुपलब्धिप्रमाणकम्

यद्युक्तं वर्त्तमानकालीनमस्मरणमतीतकालीनस्य असन्निकृष्टदेशविशेषगतस्य च व्याघ्रादेरभावः प्रतिपाद्यते इति अभावोऽनुपलब्धिप्रमाणकः, तदपि न युक्तिसहम्, यतः वस्तुविशेषशून्यानां तत्तद्देशविशेषाणां स्वरूपप्रत्यक्षकाल एव तत्रानवस्थितानां वस्तूनामभावोऽपि प्रत्यक्षेण गृहीत एव । दृश्यते चालोकसामान्याभावरूपस्य तमसोऽनुभवकाले तत्रानवस्थितानामन्येषामालोकानामपि अभावः प्रत्यक्षगोचरः स्यात् । अत एवासावालोक आसीन्न वेति पृष्टस्तथाविधतमःप्रत्यक्षकारी जनस्तत्तदालोकविशेषाणामभावस्य स्मरति । इयमेव हि मेचकवुद्धिरिति प्रसिद्धं लोके । अत एव साम्प्रतं तस्मिन् पत्तने तदानीमनवस्थितस्य देवदत्तस्य तदभावस्मरणम्, तस्याभावस्य परोक्षत्वादेव न प्रत्यक्षविषयत्वम् ।

तथा हि तत्र तदानीं देवदत्तो नासीदिति केवलमेतदेव जिज्ञासितो जनः स्मरति । अत एव साम्प्रतं तत्र देवदत्तो वर्त्तते न वेति तत्र संशय एव जिज्ञासितस्यापि तस्य जनस्य वर्त्तते । तथा चोक्तं न्यायमञ्जर्याम्—'वस्त्वन्तरविविक्तगौरमूलकस्वरूपग्रहणसमय एव तत्र असन्निहितसकलपदार्थाभावग्रहणस्य मेचकवुद्ध्या सिद्धत्वाद् इदानीं तद्गतगर्गाभावस्मरणं न तस्य परोक्षस्य अनुभवः'[१] इति ।

न च तत्रान्धकारबुद्ध्या सकलाभावग्रहणे सहसैव सकलाभावस्मरणं जायतामिति वाच्यम्, यत्रैव प्रश्नादिस्मरणकारणमस्य समुपस्थितं स्यात्, तदैव स्मरति । न तु केवलमविद्यमानत्वं स्मरणनिमित्तम् । अत एव सर्वेषां स्मरणं न भवेत्, प्रश्नादिकारणाभावात् ।

३३. आप्तवाक्यादपि अभावनिश्चयः

अपि च आप्तवाक्यादपि क्वचिदभावनिश्चयो भवेत् । यथा घनान्धकारे विविक्तेन यथा गच्छन् केनचिदाप्तेन नास्त्यस्मिन् देशे व्याघ्र इत्युक्तो व्याघ्राभावं तद्देशे निश्चिनोति ।

३४. अभावज्ञानं सम्बद्धमेव जायते

वस्तुतस्तु यत्र अभावप्रतीतिस्तत्र तु स्वातन्त्र्येणैव अभावो नानुभूयते, किन्तु घटाभावादिवद् देशकालप्रतियोग्यादिभिर्विशिष्ट एव प्रत्यक्षगोचरः स्यात् । तथा हि

---

१. न्या० म० प्र० प्र०-पृ० ५० ।

'इह इदानीं घटो नास्ति' इत्येवमभावप्रतीतिः। न चैवम् इत्थमवगम्यमानोऽपि अभावो देशकालादिभिर्यदि सम्बद्धः, तदैव देशकालादिविशिष्टरूपेणाभावः प्रतीयते। वस्तुतस्तु देशेन कालेन प्रतियोगिना वा नास्य सम्बन्धो-वर्त्तते, इति चेत्, एतत्तु प्रागेवलोचितम्। यतो विशेषणविशेष्याख्यसम्बन्धस्तत्र वर्त्तत एव। अपि च प्रतियोगितासम्बन्धेन प्रतियोगिविशिष्टोऽभावः। अत एव घटाभावपटाभावादिवैलक्षण्यं सिध्यति। तथा हि प्रतियोगितासम्बन्धेन घटविशिटोऽभावो घटाभावः। देशकालादिभिरपि प्रतियोग्य-समानकालीनतत्तद्देशादिस्वरूपसम्बन्धो घटत एव।

३५. बौद्धमतेऽभावस्य सम्बद्धित्वनिरसनम्

अत्राहुर्बौद्धाः—यद्यभावः स्वातन्त्र्येण प्रतीयमानः स्यात्, तदैव तद्ग्राहकं प्रमाणं चिन्तनीयम्। वस्तुतस्त्वभावस्य स्वातन्त्र्येण प्रतीतियोग्यतैव नास्ति, यतो देशकालप्रतियोगिविशिष्टत्वेनैव तस्य प्रतीतिर्भवद्भिरपि अङ्गीकृता। 'इदम् इदानीं नास्ति' 'इदम् इह नास्ति' इत्यादिप्रकारेण प्रतीयमानोऽभावो यदि देशकालादिभिः सम्बद्धः स्यात्, तदैव देशकालातिरिक्ततया विशेषणीभूतस्याभावस्य ग्रहणं सम्भाव्येत।

वस्तुतस्तु देशेन कालेन प्रतियोगिना वा अभावस्य कश्चित् सम्बन्धो नैव सिध्यति। न च विशेषणविशेष्यभावसम्बन्धोऽभावस्य पूर्वं प्रतिपादित इत्यपि वाच्यम्, भूतले कश्चित् सम्बन्धो यदि विद्यते, तदैव तेन सम्बन्धेनानुयोगिप्रतियोगि-विधया सम्बद्धयोर्विशेष्यविशेषणभावः सङ्गच्छते, न त्वभावस्य तथाविधः कश्चित् सम्बन्धो विद्यते।

वस्तुतस्तु विशेषणविशेष्यभावः सम्बन्धः स्वतन्त्रो न कश्चिद् विद्यते; किन्तु पुरुषेच्छया विशेषणविशेष्यभावो घटते। तथा हि विशेषणमपि विशेष्यीभवति। यथा वह्निमत्पर्वतबोधेच्छया 'वह्निः पर्वते' इत्यत्र पर्वते विशेषणीभूतस्यापि वह्नेः विशेष्यतया प्रतीतिः, विशेष्यस्य पर्वतस्य चाधेयत्वसम्बन्धेन विशेषणतया भानम्। अतः काल्पनिक एव विशेषणविशेष्यभावः, न तु वस्तुधर्मः। प्रतियोगिना सार्धमप्य-भावस्य सम्बन्धो नैव घटते, अतुल्यदेशकालत्वात्। न हि यद्देशे यत्काले वा प्रतियोगी तिष्ठति, तस्मिन् देशे तस्मिन्नेव च काले अभावोऽपि तिष्ठति। अतोऽसमानदेशकाल-त्वात् प्रतियोगितदभावयोः कथं सम्बन्धः ? न च विरोधाख्यः सम्बन्धस्तत्र कल्पनीय इत्यपि वाच्यम्, विरोधपदार्थस्यैवात्रावधारणासम्भवात्। तथा हि घटाभावो यदि पूर्वं सिद्ध एव, तर्हि देशान्तरादागत्य घटं विरुन्ध्यात्। तथा सति यथा मुद्गरादीनां घटविरोधित्वम् तथैव घटाभावस्यापि घटविरोधित्वं कल्पयितुं शक्यम्।

वस्तुतस्तु असमानदेशकालत्वाद् घटतदभावयोर्मुद्गरादिवद् घटविरोधित्वं न सम्भवति। अपि च घटाभावो घटस्य किञ्चित् करोति न वा ? न करोति चेत् तस्य घटविरोधित्वं न सिध्यति। न हि अकिञ्चित्करत्वेऽपि विरोधित्वं सम्भवति। तथा सति सर्वैः सर्वं विरुध्येत। असमानदेशकालत्वाद् अभाव प्रतियोगिनः किञ्चित् कर्त्तुं न शक्नुयात्।

न च मुद्गारादिभिर्नाशकैर्घटविनाशे कृते घटाभावः सिध्यतीति घटतदभावयोः सहानवस्थायित्वरूपं विरोधित्वं सिध्यतीत्यपि वाच्यम्, सर्वेषां भावनां जन्यत्वेन स्वतो विनाशशीलत्वात् तत्र विनाशहेत्वन्तराभावात्। तथा चोक्तं तत्त्वसङ्ग्रहे—

तत्र ये कृतका भावास्ते सर्वे क्षणभङ्गिनः।
विनाशं प्रति सर्वेषामनपेक्षतया स्थितेः॥
यद्भावं प्रति यन्नैव हेत्वन्तरमपेक्षते।
तत् तत्र नियतं ज्ञेयं स्वहेतुभ्यस्तथोदयात्[1]॥

अत्रेदं तात्पर्यम्—जन्यानां भावानां विनाशशीलत्वमस्ति, नास्ति वा ? अस्ति चेत् स्वत एव विनाशशीलानां भावानां विनाशस्वाभाव्याद् विनाशार्थं हेत्वन्तरं नैवावश्यकम्। अथ यदि विनाशशीलत्वं नास्ति, तर्ह्यविनाशित्वाद् विनाशहेतुरनुपपन्नः।

३६. विनाशस्य प्रतियोग्येककारणत्वम्

यत्र तु मुद्गरादिप्रहारेण घटो विनश्यतीति प्रतीतिः, तत्र तु केवलं कपालादीनि जायन्ते मुद्गरादिभ्यः, न तु घटाभावः। यतो भावानां विनाशस्वाभाव्यात् स्वभावस्य निर्हेतुकतया तत्र मुद्गरादीनां व्यापाराभावाद् न नाशकत्वं तेषाम्। यदि तु विनाशस्य स्वाभाविकत्वं नानुमन्यते, तर्ह्यविनाशिनां तेषां भावानां नित्यत्वेन तत्रापि मुद्गारादीनां न किञ्चित् करणीयमस्ति। तस्मात् मुद्गरादीनां कार्यकारित्वमङ्गीक्रियते चेत् कपालादिसृष्टावेव तेषामुपयोगित्वम्, न त्वभावपक्षे किञ्चित् कारित्वमस्ति। यदि तु मुद्गरादीनां वस्त्वन्तरोत्पादकसामग्रयन्तर्गतत्वम्, तदाऽभावं विना प्रकारान्तराणामेव वस्तूनां समुत्पत्तिः सम्भाव्येत।

न तु अभावोत्पत्तिरपि कल्पनीया, शशविषाणादिवदवस्तुत्वेनाभावस्योत्पत्तेरसम्भवात्।

न च मुद्गरेण यानि कपालादीनि जायन्ते, तान्येव घटाभावत्वेन गृह्यन्तामिति वाच्यम्, कपालभङ्गेऽपि कपालात्मकस्य घटाभावस्यापि नाशात् पुनः घटादीनामा-

---

१. तत्त्वसङ्ग्रहे-का० ३५३–३५४।

विर्भावप्रसङ्गः। अपि च, यदि अकिञ्चित्कुर्वाणानां कपालादीनां घटाभावत्वम्, तर्हि तेषां पटाभावत्वं वा कथं न स्यात्? अपि च, कपालादीन्यपि स्वभावतो जायन्ते न वा? जायन्ते चेत् तत्रापि मुद्गरादीनामकिञ्चित्करत्वम्, स्वभावस्य कारणानपेक्षणात्। अथ यद्यनुत्पत्तिस्वभावाः कपालादयः स्युः, तदा मुद्गरादिभिः प्रयत्नसहस्रैरपि तेषामुत्पादं कर्त्तुं न शक्यते। अपि च, अभावस्योत्पत्तिः स्वीक्रियते न वा स्वीक्रियते चेदुत्पत्तिमत्त्वादभावस्यापि शशविषाणादिवैलक्षण्येन घटादिवद् भावत्वप्रसङ्गः। अथ यदि उत्पत्तिर्नाङ्गीक्रियते, अभावस्य अस्तित्वं च पुनः इष्टम्, तदा अनुत्पन्नभावानां नित्यत्वनियमादभावस्यापि नित्यत्वमेवेति तत्र मुद्गरादिभिः किं क्रियते?

३७. प्रकारान्तरेणाभावस्य सकारणत्वनिरसनम्

अपि च, योऽयमभावो भवद्भिरङ्गीकृतः, स एकपदार्थसम्बन्धी, अनेकपदार्थसम्बन्धी वा? तत्र यदि एकभावपदार्थसम्बन्धी अभावः स्वीक्रियते, तदा यस्य नियतकारणं किञ्चिद् भवितुं नार्हति, यतः स्वभावत एवैकपदार्थसम्बन्धिनोऽभावस्यैकपदार्थसम्बन्धित्वे स्वभावं विना किञ्चित् कारणं नास्तीत्येवमङ्गीकर्त्तव्यम्। तथा च सति घटाभावः स्वभावत एव येन केनचिदेकेन वस्तुना नियतसम्बन्धो वर्त्तत एव, अतस्तस्य कारणं किञ्चिन्नैव सिध्यति।

अपि च, यदि घटाभावो नियतैकपदार्थसम्बन्धो भवेत्, तर्हि स पदार्थो घटो वा अन्यो वा? यदि घट एव घटाभावेन नियतं सम्बध्यते, तर्हि यत्र घटस्तिष्ठति, तत्र तन्नियतसम्बन्धी घटाभावोऽपि अवश्यं वर्त्तत इति स्वीकर्त्तव्यम्। तथा च सति 'अत्र घटो नास्ति' इति व्यवहारदशायां घटोऽस्तीत्यपि व्यवहारः प्रसज्येत। एकसम्बन्धिसत्त्वे तन्नियतसम्बन्धिनोऽपरस्यापि विद्यमानत्वध्रौव्यात्। अथ यद्यभावः सर्वपदार्थसम्बन्धी स्यात्, तर्हि सर्वदैव जगति सर्वैः पदार्थैः सम्बद्ध अभावोऽपि तिष्ठतीति सर्वं जगद् अभावमयं स्यात्। एवमभावस्य तथात्वेन नित्यतया कदाचित् किञ्चित् प्रतियोगिकत्वमपि न सिध्यति। अपि तु सर्वप्रतियोगिकत्वमभावस्य सिद्धं भवेत्। अपि च, सर्वप्रतियोगिकत्वेऽभावस्य सर्वपदार्थप्रातिकूल्येन नित्यतया च नित्यानित्यानां भावानामस्तित्वमवलुप्येत, तथा चोक्तं तत्त्वसङ्ग्रहे—

असत्त्वे सर्वभावानां नित्यत्वं स्यादनाशतः।
सर्वसंस्कारनाशित्वप्रत्ययश्चानिमित्तकः[1] ॥ इति।

---

१. तत्त्वसङ्ग्रहे—का० ३७२;

३८. सौगतनये अभावानभ्युपगमेऽपि भेदव्यवहारोपपत्तिप्रदर्शनम्

ननु यद्यभावो नाङ्गीक्रियेत तर्हि अभावरूपस्य भेदस्याप्यनङ्गीकारः समापतेत्, एवं च सति भेदाभावेन व्यवहारवैलक्षण्यं विलुप्येत, तथा ह्ययं घटः; अयं पट इत्यादि-व्यवहारो घट-पटयोः पारस्परिकभेदप्रयुक्तः। तत्र भेदस्यानस्तित्वे प्रयोजकाभावात् तत्प्रयोज्यस्य विलक्षणव्यवहारस्यापि असङ्गतिर्दुर्निवारा।

तथा हि न्यायमञ्जर्यां श्लोकवार्तिकीयः श्लोकः—

क्षीरे दधि भवेदेवं दध्नि क्षीरं घटे पटः।
शशे शृङ्गं पृथिव्यादौ चैतन्यं मूर्त्तिरात्मनि[1]॥ इति।

अभावाभ्युपगमे तु भावानामितरेतराभावादसङ्कीर्णस्वभावत्वात् परस्पर-वैलक्षण्यं सिध्यतीति चेत्, तत्रोच्यते—अभावानङ्गीकर्तृभिर्यदित्वभावेनैव भावानां परस्परवैलक्षण्यं साधनीयं स्यात्, तर्हि येन भावाख्येनाभावेन वस्तुनिष्ठेन अपरवैलक्षण्यं भावानामिष्टम्, तस्य भेदस्यापि भाववैलक्षण्यं केनचिद् अभावान्तरेणैव कल्पनीयं स्यात्। एवं तत्रापि तुल्ययुक्त्याऽभावान्तरकल्पनप्रसक्तिर्वारयितुं न शक्येत, इति अनवस्था। अतो भावानां परस्परवैलक्षण्यं स्वत एव अन्यनिरपेक्षमिति स्वीकारे न कोऽप्यपराधः।

अपि च, यदि अभावेनैव भावानां पृथक्स्वभावः स्वीक्रियेत, तर्हि, तत्र पृथक् स्वभाव एव नोपपद्यते, यतो घटात् पटस्य पृथक् स्वभावत्वोपपत्तये घटगतपटभेदस्यैव तत्प्रयोजकत्वं वाच्यम्। एवं च सति तत्र योऽयं घटगतः पटभेदः, तस्य घटस्वरूपत्वे-नाभावस्य पृथक्स्वभावप्रयोजकत्वं सिध्यति। घटस्वरूपानतिरिक्तस्य पटभेदस्य घटवदेव भावत्वात्। यदि पुनः घटगतपटभेदो घटादपि भिन्न एव, तर्हि पूर्ववदत्रान-वस्था दुष्परिहारा।

ननु यद्यभावोनाङ्गीक्रियेत, तर्हि 'घटो नास्ति', 'घटो न' इत्यादिस्थले नञः कोऽर्थः स्यात्? शब्दस्य वाच्यार्थनियतत्वाद् नञोऽपि केनचिदर्थेन भवितव्यम्। स चार्थो भावात्मकाद् घटाद् भिन्नजातीय एव कल्पनीयः। स एव अभावः।

३९. नञो वाच्यार्थतयाऽभावः स्वीकर्त्तव्य इति नैयायिकप्रश्नस्य वाच्यवाचकभाव-खण्डनमुखेन सौगतैर्निरसनम्

अत्रोच्यते सौगतैः—न हि शब्दस्य वाच्यार्थनियतत्वे किञ्चित् मानमस्ति, यतोऽर्थेन यदि शब्दस्य कश्चित् स्वाभाविकः सम्बन्धः स्यात्, तदैव शब्दो वाच्यार्थ-नियतो भवेत्।

---

१. न्यायमञ्जर्याम् – पृ० ५२।

न च पुनः विद्यते कश्चित् सम्बन्धः। तथा हि तादात्म्यं जन्यजनकभावश्चेति द्वावेव सम्बन्धौ युक्तिसिद्धौ वर्त्तेते। तत्र शब्देनार्थस्य तादात्म्यसम्बन्धो नास्ति। न हि य एव शब्दः, स एव तदर्थ इति वक्तुं शक्यते। तथा सति वह्नितदर्थयोरैक्याद् वह्निशब्दोच्चारणे मुखदाहः कथं न स्यात्? न वा जन्यजनकभावसम्बन्धोऽपि तत्र कल्पयितुं शक्यः। तथा सति शब्दस्यार्थजनकत्वात् सिंहशब्द उच्चार्यमाण एव सिंहं जनयतु। तत्तु नास्ति, तस्माद् न हि शब्देनार्थस्य नियतः कश्चित् सम्बन्धः, अपि तु परत्र स्वबोधसंक्रान्तये अर्थेन शब्दस्य कश्चित् सम्बन्धः कल्पित एव।

४०. प्रतिषेधेनैवाभावसिद्धिरिति न्यायमतम्

नैयायिकैरत्रोच्यते—अभावो यदि नाङ्गीक्रियते, तर्हि प्रतिषेधसिद्धिः कथङ्कारं सम्भाव्येत? यतोऽत्र 'घटो नास्ति' इति प्रतिषेधव्यवहारो भवद्भिरपि स्वीक्रियेत। तत्र चानुपलब्धेरेव प्रतिषेधसिद्धिः बौद्धैरिष्टा। तथा च सूत्रम्—'प्रतिषेधसिद्धिरपि यथोक्ताया एव अनुपलब्धेः[1]' इति। अतो दृश्यानुपलब्धिवशात् प्रतिषेधव्यवहारः स्वीकृत एवेति प्रतिषिद्धस्याभावस्य अस्तित्वं बलादापतितम्, असतो व्यवहारायोगात्।

४१. बौद्धाभिमतस्यैकादशधा अनुपलब्धिप्रकारस्याभावं विना नोपपत्तिरिति न्यायमतम्, तत्र बौद्धाभिमता स्वभावानुपलब्धिः

अत एवायं प्रदेशो घटाभाववान् घटानुपलब्धेरिति अनुमानं स्वीकृतम्। तत्र यदि प्रतिषेध्यं घटादिकं स्यात्, तर्हि प्रतिषेधासम्भवात् प्रतिषेध्यप्रतियोगिकोऽभावोऽनुपलब्धिहेतुकः साध्यो वा कथं भवेत्?

तथा चोक्तम्—'सति वस्तुनि तस्यासम्भवात्[2]' इति। सत्यपि वस्तुनि अनुपलब्धिलक्षणाऽप्राप्तिः। अतोऽभावः स्वीकर्त्तव्यः।

एवमनुपलब्धिरपि एकादशविधा भवद्भिरिष्टा[3]। तथा हि स्वभावानु-

---

१. न्या० बि० २।२५। २. न्यायबिन्दौ–२।२६।

३. तथा च सूत्रम्—'सा च प्रयोगभेदादेकादशप्रकारा' (न्यायबिन्दौ–२।३०)।
प्रकारभेदान् आह—
(क) स्वभावानुपलब्धिर्यथा—'नात्रधूमोपलब्धिलक्षणप्राप्तस्य अनुपलब्धेरिति'
(न्या० बि०–२।३२)
(ख) कार्यानुपलब्धिर्यथा—'नेहाप्रतिबद्धसामर्थ्यानि धूमकारणानि सन्ति धूमाभावादिति'
(न्या० बि०–२।३२)

पलब्धिः, यथा अत्र न घटः, अनुपलब्धेरिति। सूत्रम्—'नात्र धूमोपलब्धिलक्षण-प्राप्तस्यानुपलब्धेरिति[1]।

४२. कार्यानुपलब्धिः

यत्र च कार्यस्यानुपलब्ध्या तदविनाभावसम्बद्धस्य कारणस्याभावोऽनुमीयते, तत्र कार्यानुपलब्धिः। तथा हि अयं देशो धूमविशेषासम्बद्धः, वह्न्यभाववान् धूमाभावात्। सूत्रं यथा—'नेहाप्रतिबद्धसामर्थ्यानि धूमकारणानि सन्ति, धूमाभावात्[2]' इति।

अत्रेदं बौद्धैरभिप्रेतं यत् कारणानि सर्वत्रैवावश्यं कार्यवन्ति न भवेयुः। सत्यपि सामन्यकारणे विशेषकार्यानुत्पत्तिदर्शनात्। अतो येन कार्येण यस्य कारणस्याविनाभावसम्बन्धो नास्ति तस्य कारणस्य अभावोऽनुमातुं न शक्यते। तथा चोक्तं धर्मोत्तरटीकायाम्—'कारणानि च नावश्यं कार्यवन्ति भवन्तीति कार्यादर्शनात् अप्रतिबद्धसामर्थ्यानामेव अभावः साध्यः। न तु अन्येषाम्[3]'। तथा हि यत्र कारणमदृश्यम्, तत्रैव कार्यानुपलब्धिः प्रवर्त्तते, यत्र तु दृश्यं कारणम्, तत्र दृश्यानुपलब्धिरेवाभावसाधिका।

४३. व्यापकानुपलब्धिः

यत्र च व्यापकस्याभावेन व्याप्याभावः साध्यते, तत्र व्यापकानुपलब्धिः। यथा—नात्र वटः, वृक्षाभावात्। सूत्रं यथा—'नात्र शिंशपा, वृक्षाभावात्[4]', अत्रापि

(ग) व्यापकानुलब्धिर्यथा—'नात्र शिंशपा वृक्षाभावात्' इति (न्या० बि०-२।३२)

(घ) स्वभावविरुद्धोपलब्धिर्यथा—'नात्र शीतस्पर्शः अग्नेः' इति (न्या० बि० २।३४)

(ङ) विरुद्धकार्योपलब्धिर्यथा—'नात्र शीतस्पर्शः धूमात्' इति (न्या० बि०—२।३५)

(च) विरुद्धव्याप्तोपलब्धिर्यथा—'न ध्रुवाभावी भूतस्यापि भावस्य विनाशो हेत्वन्तरापेक्षणात्' इति (न्या० बि०—२।३६)

(छ) कार्यविरुद्धोपलब्धिर्यथा—'नेहाप्रतिबद्धसामर्थ्यानि शीतकारणानि सन्ति अग्नेः' इति (न्या० बि०—२।३७)

(ज) व्यापकविरुद्धोपलब्धिर्यथा—'नात्र तुषारस्पर्शो वह्नेः' इति (न्या० बि०—२।३८)

(झ) कारणानुपलब्धिर्यथा—'नात्र धूमोऽग्नयभावात्' इति (न्या० बि०—२।३९)

(ञ) कारणविरुद्धकार्योपलब्धिर्यथा—'न रोमहर्षादिविशेषयुक्तपुरुषवान् अयं प्रदेशो धूमात्' इति (न्या० बि०—२।४०)

(ट) कारणविरुद्धोपलब्धिर्यथा—'नास्य रोमहर्षादिविशेषाः' इति (न्या० बि०—२।४१)

१. न्या० बि० २।३१। २. न्या० बि० २।३२।
३. तदेव—धर्मोत्तरटीकायाम्–२।३२। ४. तदेव–२।३३।

व्याप्यस्यादृश्यत्वे एवेयमुपलब्धिः प्रयुज्यते। दृश्ये तु व्याप्ये दृश्यानुपलब्धिरेव साधिका भवेत्।

४४. स्वभावविरुद्धोपलब्धिः

स्वभावविरुद्धोपलब्धिर्यथा—नात्र शीतस्पर्शो वह्निमत्त्वात्।

४५. विरुद्धकार्योपलब्धिः

विरुद्धकार्योपलब्धिर्यथा—नात्र शीतस्पर्शो धूमोपलब्धेः।

४६. विरुद्धव्याप्तोपलब्धिः

विरुद्धव्याप्तोपलब्धिर्यथा—न अध्रुवभावी भूतस्यापि भावस्य विनाशः, हेत्वन्तरापेक्षणात्।

अत्रेदं बोध्यम्—उत्पत्तिमतां भावानां हेत्वन्तरसापेक्षत्वात् तेषां विनाशोऽपि अवश्यम्भावी। अत एव हेत्वन्तरनिरपेक्षाणां नित्यानामलीकानां वा विनाशो नास्ति। अतो जन्यानां भावानां हेत्वन्तरसापेक्षतया विनाशशीलत्वध्रौव्याद् हेत्वन्तरसापेक्षत्वं विनाशशीलत्वव्याप्तम् अतो विनाशशीलत्वोपलब्धौ तद्विरुद्धाविनाशशीलत्वाभावो निर्णीतो भवेत्। तथा चोक्तं धर्मोत्तरटीकायाम्—'विनाशश्च विनश्वरस्वभावात्मा हेत्वन्तरापेक्ष इष्टः। ततो विरुद्धव्याप्तहेत्वन्तरापेक्षणदर्शनाद् ध्रुवभावित्वनिषेधः'[1]।

४७. कार्यविरुद्धोपलब्धिः

कार्यविरुद्धोपलब्धिर्यथा—प्रतिषेधस्य यत् कार्यम्, तस्य यद् विरुद्धम्, तस्योपलब्धिरित्यर्थः। यथा—अत्र न शीतकारणम्, वह्न्युपलब्धेः।

४८. व्यापकविरुद्धोपलब्धिः

व्यापकविरुद्धोपलब्धिर्यथा—प्रतिषेध्यस्य यत् व्यापकम्, तेन यद् विरुद्धम् तस्योपलब्धिरित्यर्थः। यथा नात्र शीतस्पर्शः, वह्निदर्शनात्।

४९. कारणानुपलब्धिः

कारणानुपलब्धिर्यथा—प्रतिषेध्यस्य यत् कारणम् तेन यद् विरुद्धम् तस्योपलब्धिरित्यर्थः। यथा—नेत्रस्य रोमहर्षादयः सन्ति, सन्निहितवह्निमत्त्वात्।

५०. कारणविरुद्धकार्योपलब्धिः

कारणविरुद्धकार्योपलब्धिर्यथा—यत्र प्रतिषेधस्य कारणेन विरुद्धम्, यत् तस्य यत् कार्यम्, तदनुपलब्धिः। प्रवृत्तदण्डवीणादिविशेषपुरुषाधिष्ठित एष देशो न भवति धूनात्।

---

१. न्या० बि० धर्मोत्तरटीकायाम्–२।३६।

५१. कारणविरुद्धोपलब्धिः

कारणविरुद्धोपलब्धिर्यथा—नास्य रोमहर्षादिविशेषाः सन्निहितदहनविशेषत्वात्। सूत्रं यथा—'नास्य रोमहर्षादिविशेषा[1]' इति।

तथा चैवंभूतैरेकादशप्रकारैरनुपलब्धिलिङ्गैरभावानुमानं स्वीक्रियते बौद्धैः। तथा चानुपलब्धिविषयतया अभावस्य स्वीकरणमावश्यकमेव।

५२. अत्र बौद्धानां प्रत्युत्तरम्

तत्कथं नाभावोऽङ्गीक्रियत इति चेत् तत्र प्रत्युच्यते सौगतैः—यद्यपि अस्मन्मतेऽनुपलब्धिहेतुरङ्गीकृतः, तथापि नायमभावसाधको हेतुः। अपि तु नास्तीति व्यवहारसाधकत्वमेवैतेषां हेतूनाम्। तथा चोक्तं धर्मकीर्तिना—'सर्वत्र चास्यामभावव्यवहारसाधन्यामनुपलब्धौ येषां स्वभावविरुद्धादीनामुपलब्ध्या कारणादीनामनुपलब्ध्या च प्रतिषेध उक्तः, तेषामुपलब्धिलक्षणप्राप्तानामेवोपलब्धिरनुपलब्धिश्च वेदितव्या[2]' इति।

न हि नास्तीति व्यवहारस्याभावसाधकत्वम्, किन्तु घट एव पटादिरूपेण नास्तीति व्यवह्रियते। उक्तं च तत्त्वसङ्ग्रहे—

अन्यवस्तुनि विज्ञाने वृत्ते सर्वस्य नास्तिता।
अदृश्यस्यापि गम्येत द्वितीयाभावसंश्रये[3]॥ इति।

वस्तुतो बौद्धमते अर्थक्रियाकारित्वमेव सत्त्वम्। तस्माद् यद् अर्थक्रियाकारि न भवेत्, तन्न सत्। अतो यस्य कस्यचिद् वस्तुनोऽर्थक्रियाकारित्वेन यदा सत्त्वम्, तदैव तत्रास्तीति व्यवहारः। यत्र त्वर्थक्रियाकारित्वं नोपलभ्यते, तत्रैव नास्तीति व्यवहारः। न तु तेनैवाभावस्य वस्तुत्वं सिध्यति। तथा चोक्तं तत्त्वसङ्ग्रहे—

अर्थक्रियासमर्थं च सदन्यदसदुच्यते।
समावेशो न चैकत्र तयोर्युक्तविरोधतः[4]॥ इति।

अत्र प्रत्युच्यते नैयायिकैः—भवन्मते द्विविधो हि हेतुः। स्वभावहेतुः, जन्यजनकभावलक्षणो हेतुश्च। तत्रानुपलब्धिलक्षणहेतुः स्वभावहेतोरन्तर्भुक्तः। तथा च सूत्रद्वयम्—'वस्तुतस्तादात्म्याद् उत्पत्तेस्तदुत्पत्तेश्च', 'इमे सर्वे कार्यानुपलब्ध्यादयो दशानुपलब्धिप्रयोगाः स्वभावानुपलब्धौ संग्रहमुपयान्ति[5]' इति। स्वभावहेतुस्तादात्म्यत्वेनाभिप्रेतः। यथा—अयं वृक्षः शिंशपाया इति। सूत्रं यथा—'वृक्षोऽयं शिंशपात्वात्[6]' इति।

---

१. न्या० बि० २।४०। २. तदेव–२।४५। ३. तत्त्वसङ्ग्रहे–१६६५।
४. तत्त्वसंग्रहे–का० १६७५। ५. न्यायबिन्दौ–२।४२। ६. तदेव–२।२६।

५३. अभावानङ्गीकारेऽनुपलब्धेर्हेतुत्वं नोपपद्यत इति न्यायमतम्

एवं च सति नास्तीति व्यवहारस्यानुपलब्धिहेतुत्वेनाभिप्रेतत्वाद् भेदः स्वीकर्त्तव्यः, अन्यथा हेतोः सत्त्वेन नास्तीति व्यवहारसिद्धस्य साध्यस्यापि हेतोरभिन्नतया सत्त्वं प्रसज्येत। तस्मान्नास्तीति व्यवहारसाधकज्ञानादनुपलब्धिहेतोर्भेद एव स्वीकर्त्तव्य इति स्वभावहेतुत्वं कथं सम्भवेत् ?

५४. नास्तीति व्यवहारस्यासद्व्यवहारयोग्यत्वमात्रम्, नत्वभावास्तित्वसाधकमिति बौद्धाभिप्रायः

अत्रोच्यते बौद्धैः—नास्तीति व्यवहारोऽनुपलब्ध्या साधितो न भवति, किन्तु असद्-व्यवहारयोग्यता तत्र साध्यते। योग्यता च नार्थान्तरमिति स्वभावहेतुत्वं सिद्धमेव। ननु योग्यताया अपि भावरूपतयाऽनुपलब्धेश्चाभावस्वरूपत्वात् तयोस्तादात्म्यं कथमिति चेत्, तत्रोच्यते—उपलब्धिप्रतिषेधमात्रस्यानुपलब्धिपदार्थतया नाभावत्वमनुपलब्धेः। अपि तु प्रतिषेधपर्युदस्तवस्त्वन्तरोपलब्धिमेव तत्रानुपलब्धिमाहुः। यथा 'रात्रौ श्राद्धं न कुर्वीत' इत्यनेन पर्युदस्तकालत्वेन रात्रिः श्राद्धपक्षे प्रतिषिद्धा, न तु तत्राभावः कश्चिद् गम्यते। तस्माद् अनुपलब्धेः न अभावत्वम्।

न चानुपलब्धेरसद्व्यवहारसिद्धावदृष्टानामपि वस्तूनां केनचित् कारणेनानुपलब्धानामसत्त्वमेवास्तु, इत्यपि वाच्यम्, तत्र दृश्यत्वयोग्यानामेव वस्तूनां तदानीमनुपलब्धौ नास्तीति व्यवहारविषयता, न तु दृश्यत्वायोग्यानामपि नास्तीति व्यवहारविषयत्वम्। अत एवाकाशकुसुममसदित्येवं प्रयोगः, न त्वत्राकाशकुसुमं नास्तीत्यपि प्रयोगो भवितुमर्हति।

अत्रायमाशयः—दृश्यत्वेन प्रसिद्धानां पूर्वनिश्चितानां घटादीनामनुपलब्ध्या तत्रैव नास्तीति व्यवहारः संगच्छते। यच्च पुनः कदाचित् केनचिन्नोपलभ्यते, तस्य दृश्यत्वयोग्यत्वाभावान्नानुपलब्धिमात्रेण प्रतिषेधः सम्भवेत्। अत एवाकाशकुसुमादीनां दृश्यत्वयोग्यत्वाभावादनुपलब्धिमात्रेण नास्तीति व्यवहारो न सिध्यति। अतीन्द्रियाणाद्यार्थानामर्थक्रियाकारित्वेन सत्त्वसिद्धावुपलब्धिप्रतिबन्धकवशादेव नोपलब्धिः। अतो न तेषामनुपलब्धिमात्रेणाभावः सिध्यति।

तथा हि यत्र नास्तीति व्यवहारः स्यात्, तत्र निषेधप्रतियोगिपदार्थस्य दृश्यत्व योग्यत्वमपेक्षितम्। अत एवाकाशकुसुमं नास्तीति व्यवहारो न भवेत्। घटः पटो न भवतीत्यादिभेदप्रतीतिस्थले तु प्रतियोगियोग्यत्वं नापेक्ष्यते, अपि तु यदधिकरणे भेदः प्रतीयते, तदधिकरणस्य प्रत्यक्षयोग्यत्वमावश्यकम्। अत एव स्तम्भादौ पिशाचभेदः प्रत्यक्षेण गृह्यते। तस्मादनुपलब्धिमात्रेण सर्वत्र नाभावव्यवहारः, अपि तु दृश्यानुपलब्धिमात्रमेव नास्तीति व्यवहारप्रयोजकम्। अन्योन्याभावप्रयोजकं चानुयोगियोग्य-

त्वम् । तस्मादनुपलब्धिवशादेव नास्तीति व्यवहारसिद्धौ तदर्थं पदार्थत्वेनाभावस्वीकरणं नावश्यकम् ।

५५. पूर्वोक्तबौद्धमतखण्डनार्थं नैयायिकानामुत्तरम्

अत्र प्रत्युच्यते नैयायिकैः--सर्वत्रैवानुभवसाक्षिकतया वस्तु सिध्यति । अत एव यन्नानुभूयते, तन्न वस्तु । प्रसिद्धश्चायं व्यवहारो लोकेषु 'इह घटोऽस्ति', 'इह घटो नास्ति' इति । तत्र यद्यभावो वस्तुभूतो न भवेत्, तर्हि 'इह घटो नास्ति' इति व्यवहारः सर्वजनानुभवसिद्धो नैव सिध्येत् । तस्मान्नास्तीति व्यवहारबलादभावस्य स्वीकरणमावश्यकम् । तथा चोक्तं न्यायमञ्जर्याम्—'अत्राभिधीयते—इदं तावत् सकलप्राणिसाक्षिकं संवेदनद्वयमुपजायमानं दृष्टम् 'इह घटोऽस्ति', 'इह घटो नास्ति' इति । तत्र विकल्पमात्रसंवेदनमनालम्बनमात्मांशावलम्बनं वा इत्यादि यदभिलप्यते, तन्नास्तिताज्ञाने इव अस्तित्वज्ञानेऽपि समानम् । अतो द्वयोरपि प्रामाण्यं भवतु । द्वयोरपि वा मा भूत् । यत्तु अस्तीतिज्ञानं प्रमाणम्, इतरदप्रमाणमिति कथ्यते, तदिच्छामात्रम्. अस्तीति ज्ञानसमानयोगक्षेमत्वे च नास्तीति ज्ञानस्य विषयश्चिन्तनीयः' इति ।

अत्रायमाशयः—वस्तुतत्त्वनिर्णये प्रेक्षावत्सिद्धव्यवहारस्य प्राधान्यं स्वीकर्तव्यम् । अन्यथा स्वेच्छातन्त्रतया वस्तुतत्त्वनिर्धारणं स्वाभिप्रायानुरूपमापद्यते । तथा च सति कदाचिदाकाशकुसुमादीनामपि लोकानुभवविरुद्धानां तात्त्विकत्वं स्वीकर्तव्यं स्यात् । तस्माद् विरुद्धार्थप्रतिपादनानौचित्यादकामेनापि भवता लोकानुभवसिद्धव्यवहारस्यैव वस्तुतत्त्वविषये प्रामाण्यमङ्गीकर्तव्यम् ।

एवं च सति अस्तिताप्रत्ययवद् नास्तित्वप्रत्ययस्यापि सर्वलोकसिद्धतया नास्त्यर्थत्वेनाभावो वस्तुभूतः स्वीकर्त्तव्यः । अन्यथा अस्तिताप्रत्ययस्यापि वस्तुसाधकत्वं नैव स्यात्, द्वयोरपि प्रत्यययोस्तुल्यबलशालित्वात् । अतोऽस्तीति व्यवहारवन्नास्तीति व्यवहारस्यापि प्रामाणिकत्वाभ्युपगमे तज्ज्ञानविषयतया किञ्चिद् वस्तु सिध्यत्येव ।

ननूक्तमेव यद् घटादिशून्यभूतलादौ दृश्यत्वेन प्रसिद्धानां तेषां घटादीनामनुपलब्धेः केवलं भूतलोपलब्धिरेव घटो नास्तीत्यादिव्यवहारसाधिकेति चेत्, तत्रोच्यते—घटशून्यभूतलादावित्यत्र का नाम घटशून्यता ? तच्च यदि केवलं भूतलस्वरूपमेव घटशून्यत्वमिष्येत तर्हि घटवत्यपि भूतले भूतलस्वरूपस्यानपायाद् घटानुपलब्धिप्रसङ्गेन घटो नास्तीति व्यवहारः सुतरामापद्यते. अथ यदि भूतलविशेषणीभूतं सुतरामेव भूतलातिरिक्तं घटशून्यत्वमुच्येत, तर्हि अङ्ग तदेवाभावतया प्रगृह्यताम् ।

५६. नास्तीतिप्रमात्मकव्यवहारविषयतया अभावसिद्धिः

अपि च, घटशून्यत्वं घटादभिन्नं भिन्नं वा ? यदि प्रथमः कल्पस्तर्हि घटशून्यत्वयोरेकत्वाद् घटवदपि भूतलं घटशून्यमिति प्रमात्मकव्यवहारप्रसक्तिः। अथ यदि घटाद् भिन्नमेव घटशून्यत्वम्, तर्हि घटाभाव एव सम्पद्येत, तस्माद् 'इह घटो नास्ति' इति प्रतीतेर्घटशून्यभूतलविषयकत्वाङ्गीकारेण तत्र घटाभावः सिध्यत्येव, इह घटो नास्तीत्यत्र देशविशेषावलम्बनेन इहेति शब्दः सर्वेषामभिमतः, तत्र नास्ति विप्रतिप्रत्तिलेशोऽपि, 'इह घटोऽस्ति' इत्यादिभावप्रतीतिकालेऽपि इह इत्यंशस्य देशविशेषालम्बनत्वेन वोधात्, अपि तु 'इह घटो नास्ति' इति निषेधात्मकप्रत्ययस्य विषयो न भूतलमात्रम्। तस्माद् भूतलातिरिक्ततया अभावाख्यस्य पदार्थस्य स्वीकरणमावश्यकम्।

वस्तुतस्तु 'घटाभाववद् भूतलम्' इत्यत्र भूतलविशेष्यकघटाभावप्रकारकं विशिष्टं यज्ज्ञानं समुत्पद्यते, तत्र प्रकारविधया भासमानस्याभावस्य स्वीकरणं विना कथमपि तथाविधः प्रत्ययो न लोकेषु सम्भवेत्, विशेष्यविशेषणयोर्वैशिष्ट्यमन्तरेण विशिष्टज्ञानानुदयात्। न च यत्र घटादिकं प्राप्यते, तत्रैव 'घटोऽस्ति' इति व्यवहारः, यत्र तु तथाविधो व्यवहारो नोपलभ्यते, तत्र तादृशव्यवहारोपपत्तये अभावाख्यं किञ्चिद् वस्त्ववश्यं स्वीकरणीयम्।

५७. बौद्धमते घटो नास्तीति ज्ञानस्य विकल्पत्वेन प्रमात्वनिराकरणम्, नैयायिकमतेन विकल्पज्ञानस्यापि प्रमात्वस्थापनं च

ननु 'घटो नास्ति' इति ज्ञानं विकल्पमात्रमेव, विकल्पज्ञानत्वान्न प्रमा[1]। तस्माद् भावज्ञानस्य प्रमात्वानवगाहित्वेनाभावः प्रमेयो न भवेत्, अत्रोच्यते—सविकल्पकज्ञानस्य संवादिप्रवृत्तिजनकत्वेन प्रमात्वं वारयितुं न शक्यते, यतो ज्ञानेन प्रदर्शितमर्थं प्रापयज्ज्ञानं प्रमा भवतीति भवद्भिरपीष्टम्, तथा चोक्तं धर्मोत्तर—टीकायाम्—'अतोऽर्थक्रियासमर्थवस्तुप्रदर्शकं सम्यग्ज्ञानम्[2]' तथा च सति सविकल्पकज्ञानस्य प्रदर्शितार्थप्रापकतया प्रमात्वमव्याहतम्।

५८. अभावज्ञानं नियतमेव सविकल्पकम्

'जलं पिब' इत्याद्यभिलापवाक्यश्रवणानन्तरं ज्ञायमानस्य जलस्य पानेन पिपासानिवृत्तिरुपलभ्येत, तत् कथं जलमित्यादिसविकल्पकज्ञानस्य प्रमात्वं न स्यात् ?

---

१. विकल्पज्ञानम्—वस्तुस्वरूपातिरिक्तनामजात्यादिसम्बन्धावभासकं ज्ञानं विकल्पज्ञानम्, सूत्रम्—'अभिलापसंसर्गयोग्यप्रतिभासप्रतीतिः कल्पना' (न्या० बि० २।५)। अतो निर्विकल्पकं कल्पनारहितं वस्तुस्वरूपमात्रावगाहि ज्ञानं प्रमा।

२. न्या० बि० १।१—धर्मोत्तरटीकायाम्।

एवं च सति सविकल्पकज्ञानस्य प्रमात्वसिद्धौ सविकल्पकज्ञानत्वादेवाभावज्ञानस्य प्रमात्वं खण्डयितुं न शक्यते ।

अभावज्ञाने पुनरयं विशेषो यद् भावज्ञानं कदाचिद् निर्विकल्पकं कदाचिद् वा सविकल्पकमपि स्यात्, अभावज्ञानं पुनः नियतमेव सविकल्पकं यतः प्रतियोगितासम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिविशिष्टज्ञानमेव तदभावज्ञानम् । न हि अवच्छेदकधर्ममनन्तर्भाव्यप्रतियोगी अभावेन अन्वेति । अतोऽभावज्ञानं नियतमेव सविकल्पकम् । तदुक्तं कुसुमाञ्जलौ—

अवच्छेदग्रहध्रौव्यादध्रौव्ये सिद्धसाधनात् ।
प्राप्त्यन्तरेऽनवस्थानान्न चेदन्योऽपि दुर्घटः[1] ।। इति ।

अत्रायमाशयः—अभावज्ञानं प्रतियोगिज्ञानसापेक्षम् । न ह्यविदितप्रतियोगिकेन तत्प्रतियोगिकाभावो लभ्यते, अतः प्रतियोगिज्ञानस्याभावज्ञानात् पूर्वमपेक्षणीयत्वेन प्रतियोगिज्ञानरूपविशेषज्ञानाद् नियमतोऽभावज्ञानं सविकल्पमेव, न निर्विकल्पम् । घटादिज्ञानस्थले तु प्रथमतः घटघटत्वयोर्वैशिष्ट्यानवगाहिनिर्विकल्पकमेव ज्ञानं जायते । ततश्च 'घटोऽयम्' इति सविकल्पकज्ञानम्, तस्माद् अभावबुद्धिसामान्यं प्रति प्रतियोगिग्रहस्य हेतुत्वेनाभावनिर्विकल्पकासिद्धिः । प्रतियोगिज्ञानस्याहेतुत्वेऽभावनिर्विकल्पकस्वीकारे इन्द्रियादेवाभावज्ञानोत्पत्तिरिति तत्र नानुपलब्धिप्रमाणसम्भावना ।

वस्तुतस्तु सर्वत्रैव पूर्वानुभवसापेक्षं सविकल्पकज्ञानम् । भवन्मतेऽपि ह्यनुभूतपदार्थस्यैव कल्पनात्मकज्ञानविषयत्वात् कल्पनात्मकं ज्ञानं पूर्वानुभवसापेक्षम् । अनुभवश्च वस्तुसत्त्वसापेक्षम्, आकाशकुसुमादीनामननुभवात् । एवं च सति भवन्मतेऽप्यभावस्य कल्पनात्मकज्ञानविषयत्वाङ्गीकारे पूर्वमेवाभावानुभव आवश्यकीयः ।

न च भावविषयकानुभवेनैवाभावकल्पना सम्भवेत्, तस्मादकामेनापि कल्पनात्मकज्ञानविषयत्वाङ्गीकारादभावस्य वस्तुसत्त्वं स्वीकर्त्तव्यम् । तथा चोक्तं जयन्तभट्टपादैः—

यथानुभवमुत्पत्तुमर्हन्ति किल कल्पनाः ।
प्रतिषेधविकल्पस्तु न विध्यनुभवोचितः[2] ।। इति ।

५९. अभावज्ञानस्य किञ्चिदप्रापकत्वेन प्रमात्वं नोपपद्यत इति बौद्धानां शङ्का

ननु भावविषयकज्ञानानन्तरं ज्ञानोपदर्शितवस्तुप्राप्तिबलेनैव तथाविधानां सविकल्पकज्ञानानां प्रमात्वं कल्पयितुं यद्यपि शक्यम्, तथाप्यभावज्ञानस्थले ज्ञानोपदर्शितवस्तुप्राप्तेरसम्भवात् सुतरामेवाभावज्ञानस्यप्रमात्वं न युक्तम् । न हि घटाभाव-

---

१. न्यायकुसुमाञ्जलौ–३।२२ ।   २. न्या० म० प्रमाणकरणे–पृ० ५५ ।

ज्ञानानन्तरं भूतलादिप्रदेशे घटाभावाख्यं वस्तु केनापि लब्धुं शक्येत। तस्मादभावज्ञानस्य प्रमात्वं नास्ति। वस्तुप्रापकत्वेनैव ज्ञानस्य प्रमात्वं न्यायविद्भिरपीष्टम्। तथा चोक्तं न्यायभाष्ये—'प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्याद् अर्थवत्प्रमाणम्'[1] इति। अतो नाभावज्ञानं प्रमा। प्रमात्वप्रयोजकत्वाभावादिति चेत्, तत्रोच्यते—यथा नीलादिज्ञानानन्तरं नीलं लभ्यते, तथैव नीलेतरपीतादिभिन्नरूपेणैव नीलप्राप्तेरिष्टतया नीलादिव्यतिरिक्तपीताद्यभावस्यापि प्राप्तिः सिध्यत्येव। तथा चोक्तं जयन्तभट्टैः—'सेयमभावस्यापि प्राप्तिर्भवत्येव। नीलं हि प्राप्यमाणं तदभावविनाभूतपीतादिव्यवच्छिन्नरूपं प्राप्यते। सा चेयं तथाभूतनीलप्राप्तिर्भवन्तीइतराभावप्राप्तिरपि भवति। अन्यथा हि नीलप्राप्तिरेव न स्यादिति'[2] इति।

६०. अभावज्ञानस्य प्रापकत्वव्यवस्थापनम्

अपि च, रिपूणामभावात् सुखोत्पत्तिः, सुहृदामभावाद् दुःखोत्पत्तिः सर्वेषामनुभवसिद्धा। प्रेक्षावद्भिश्च कण्टकादिप्रतिबन्धकाभावं समीक्ष्य पादन्यासः क्रियते। घटादीनामुत्पत्तेः प्राक् तत्प्रागभावं विलोक्यैव तन्निर्माणचेष्टा जायते। विचक्षणैश्च भिषक्प्रवरैः रोगाभावं यथायथं निश्चित्य रोगिणं प्रति भेषजव्यवहारो निषिध्यते। एवं च सति प्रेक्षावतां सचेतनानामभावावस्थानसमवलोकनात् तथा अभावनिष्ठव्यवहारपारम्पर्यस्य व्यवहारहेतुत्वेन ग्रहणाच्च कथमभावास्तित्वमपलपितुं शक्यते।

अत्र प्रत्युच्यते बौद्धैः—सर्वत्रैव विषयप्रत्यक्षे कारणकुक्षावन्तर्भुक्तस्य विषयस्यैव प्रत्यक्षालम्बनं प्रसिद्धम्। अत एव च प्रत्यक्षं प्रति विषयस्य कारणत्वं न्यायविद्भिरपीष्टम्, एवं च सति अभावप्रत्यक्षस्थले कारणकलापेष्वभावस्यान्तर्भावो नैव सम्भाव्येत, व्यलीकत्वाद् अभावस्य।

६१. अभावस्य प्रत्यक्षविषयत्वानुपपत्तिशङ्का

न ह्यवस्तुभूतानां कारणत्वं सम्भवेत्। तस्माद् विषयविधया सकलोपाख्याविनिर्मुक्तस्वरूपस्य खपुष्पस्येवावस्तुभूतस्याभावस्य कारणत्वशरीरे प्रवेशासम्भवात् सुतरामेव प्रत्यक्षविषयता नाभावे सम्भवतीति।

६२. क्षणभङ्गवादिमते कार्यकारणभावानुपपत्तिप्रदर्शनम्, अभावस्य ज्ञानविषयत्वोपपादनञ्च

अभावस्य प्रत्यक्षविषयत्वकल्पनं सुदूरपराहतमिति चेत्, तत्रोच्यते—क्षणभङ्गवादिनां सौगतानां मते भावस्यापि कारणत्वं नैव सम्भाव्येत, यतः कारणतया निर्णीयमाणस्य द्विक्षणावस्थायित्वमवश्यं स्वीकर्त्तव्यम्। प्रथमक्षणे समुत्पन्नस्य भवन्मते

१. न्यायभाष्ये—१।१।१। २. न्यायमञ्जर्यां पृ० ५५।

द्वितीयक्षणे विनाशात् सुतरां तस्य कारणत्वं नैव सम्भाव्येत। दृश्यते च—प्रथमक्षणे समुत्पन्नं वस्तु तदर्थज्ञानं जनयति। अनन्तरं च ज्ञातं वस्तु कारणं भवितुमर्हति। अत उत्पत्त्यनन्तरं द्वितीयक्षणे विनाशिनां वस्तूनां कारणत्वानवकाशः प्रसज्येत। तस्मान्न केवलमभावानाम्, अपि तु भावानामपि कारणत्वं भवन्मते असिद्धम्।

अस्मन्मते त्वभावस्य न शशशृङ्गादिवत् सर्वसामर्थ्यशून्यत्वम्, अपि त्विदमिह नास्ति, इदमिदं न भवतीत्यादिज्ञानविषयत्वमेवाभावत्वम्, तस्माद् यद् हि भावत्वेन प्रतीयमानम्, स एव भावपदार्थः, तद्विपरीतश्चाभावपदार्थः। एतत्वभावलक्षणप्रसङ्गेन प्रागेव वैशद्येनालोचितम्।

६३. भाववदभावस्यापि कारणत्वप्रतिपादनम्

तस्मादुक्तं न्यायभाष्यकृता—'किं पुनस्तत्त्वम्? सतश्च सद्भावः, असतश्च असद्भाव इति। सत् सदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं भवति। असच्च असदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं भवति। कथं पुनरुत्तरस्य प्रमाणेनोपलब्धिरिति? सति उपलभ्यमाने तदनुपलब्धेः प्रदीपवत्। यथा दर्शकेन दीपेन दृश्ये गृह्यमाणे तदिव यन्न गृह्यते, तन्नास्ति, यदि अभविष्यदिदमिव व्यज्ञास्यत, विज्ञानाभावान्नास्तीति। एवं प्रमाणेन सति गृह्यमाणे तदिव यन्न गृह्यते, तन्नास्ति। यदि अभविष्यदिदमिव व्यज्ञास्यत विज्ञानाभावान्नास्तीति तदेवं सतः प्रकाशकं प्रमाणमसदपि प्रकाशयतीति[1]' इति।

उक्तं च जयन्तभट्टेनापि—'सत्प्रत्ययगम्यो हि भाव इष्यते। असत् प्रत्ययगम्यस्तु अभावः[2]'। न च भाव इव अभावोऽपि यदि जनकः स्यात्, तर्हि भावाद् अभावस्य वैलक्षण्यं व्याहन्येत, यतः सामर्थ्यं भावस्य। अत एव सामर्थ्यविरहाद् अभावस्य भाववैलक्षण्यम्। साम्प्रतं तु जनकत्वसामर्थ्यं भावानामिवाभावानामपि अङ्गीक्रियते चेत्, तर्हि सामर्थ्यासामर्थ्यकृतवैलक्षण्यमपि हीयत इति वाच्यम्। भावाभावयोर्ज्ञानवैलक्षण्यादेव विषयवैलक्षण्यमङ्गीकर्तव्यम्। सर्वत्रैव प्रत्ययवैलक्षण्यं प्रति विषयवैलक्षण्यस्य हेतुत्वात्। यदि तु जनकत्वबलात् सर्वत्रैवावैलक्षण्यमास्थीयेत, तर्हि स्वस्वज्ञानं प्रति रूपरसयोरपि जनकत्वात् तयोरपि अवैलक्षण्यं प्रसज्येत। जनकत्वस्य तुल्यतया तयोर्भेदानुपपत्तेः। तत्र च प्रतीतिभेदस्यैव विषयभेदनियामकत्वाङ्गीकारे भावाभावयोस्तत् सत्त्वात्। न हि विषयवैलक्षण्यं विना प्रतीतिभेद इति सर्वैरेव स्वीकृतम्।

६४. ज्ञानवैलक्षण्याद्भावाभावयोर्वैलक्षण्यम्

उक्तं च जयन्तभट्टपादैः—'ननु भाववदेष ज्ञानजनकः सन्नभावो न भावाद् विशिष्यते, अहो निपुणदर्शी देवानां प्रियः। प्रतीतिभेदश्चास्ति, तत्र प्रतीयमानौ

१. न्यायदर्शने वात्स्यायनभाष्ये—१।१।१। २. न्या० म० ५६।

भावाभावौ भिद्येते इति कथमेवं भवेत् ? अपि रे मूढ ! ज्ञानजनकत्वाविशेषेऽपि रूपरसौ कथं भिद्येते ? प्रतीतिभेदादिति चेत्, भावाभावौ अपि जनकत्वधर्मसामान्येऽपि प्रतीतिभेदादेवं भिद्येयाताम्। न हि प्रतिभास्यभेदमन्तरेण प्रतिभासभेदो भवतीति भवतापि अभ्युपगतम्[1]" इति।

६५. ज्ञानविषयत्वनिरूपणम्

अपि च ज्ञानालम्बनमात्रस्यैव ज्ञानजनकत्वाङ्गीकारे स्वाप्नवस्तूनामपि ज्ञानजनकत्वं स्वीकर्तव्यम्। तथा च सति स्वप्नदृष्टवस्तूनां सत्यतापत्तिः। जनकवस्तुविषयकस्य प्रत्यक्षस्य यथार्थत्वनियमात्। तस्मान्न हि ज्ञानालम्बनमात्रमेव ज्ञानजनकत्वेन सिद्धं भवेत्। अपि तु आलम्बनमात्रविषयत्वम्। अत एव भ्रमज्ञानस्थलेऽपि रज्जुसर्पादौ विषयत्वं स्वीकृतम्।

न च विषयत्वमेव तात्त्विकत्वे प्रयोजकम्, भ्रमप्रमासाधारणत्वाद् विषयत्वस्य। तत्र चायमेव नियमः स्वीकर्त्तव्यः—अविद्यमानवस्तुविषयकं ज्ञानं विषयविधया तद्वस्त्ववगाहमानमपि न तस्य सत्तां साधयितुमर्हति। अपि तु केवलं विषयतामात्रेणैव तत्र ज्ञानं तद्वस्तु विषयीकरोति। सद्वस्तुविषयकस्थले अयमेव नियमो यज्जनकशरीरे प्रविष्टस्य विषयस्यैव ज्ञानजनकत्वं ज्ञानविषयत्वं च। अतो यत्र वस्तु विद्यमानमेव जनकम्, तत्रैव ज्ञानं यथार्थम्, नान्यत्र।

तथा चोक्तं न्यायमञ्जरीकारैः—

प्रामाण्यं वस्तुविषयं द्वयोरर्थभिदां जगौ।
प्रतिभासस्य चित्रत्वाद् एकस्मिंस्तदयोगतः[2] ॥

तदिह पर्यवसितम् यद् अस्तीति प्रतीतिविषयीभूतस्य भावत्वेनावगाहनाद् यथा पदार्थत्वं स्वीकर्त्तव्यम्, तथैव नास्तीति प्रतीतिगोचरस्य अभावस्यापि पदार्थत्वं अङ्गीकर्त्तव्यमेव। अभावस्यापि अर्थक्रियाकारित्वं प्रागेव प्रतिपादितम्। अतोऽर्थक्रियाकारित्वस्य सत्त्वप्रयोजकत्वमभ्युपगच्छतां सौगतानामभावस्य वस्तुत्वं बलादापतितम्।

६६. अभावस्य वस्तुत्वं भावाधिकरणत्वं च स्वीकर्तव्यम्

न च भावाभावयोः परस्परविरोधाद् आधाराधेयभावानुपपत्तेर्भावाधिकरणकोऽभावो नैव सिध्यति, सम्बन्धानुपपत्तेरित्यपि वाच्यम्, तत्र भूतलाद्यधिकरणेनाभावस्य विशेष्यविशेषणभावरूपः सम्बन्धः सम्भवत्येव। यथा 'घटवद् भूतलम्' इत्यत्र भूतलस्य विशेष्यतया घटस्य च विशेषणतया प्रतीतिः सर्वानुभवसिद्धा, तथैव 'घटा-

---

१. न्या० म० पृ० ५६।   २. तदेव—पृ० ५६।

भाववद् भूतलम्' इत्यत्रापि भूतलस्य विशेष्यतया घटाभावस्य विशेषणतया प्रतीति-रानुभविकी, विशेष्यविशेषणभावस्य प्रतीतिमात्रशरीरत्वात् ।

इयांस्तु विशेषः—भावविशेष्यकभावविशेषणकप्रतीतिस्थले विशेष्यविशेषण-भावः सम्बन्धान्तरपूर्वकः, तथा च भूतलानुयोगिकघटप्रतियोगिकसंयोग एव तत्र घटभूतलयोर्वैशिष्ट्यसम्पादक इति विशेष्यविशेषणभावः संयोगपूर्वकः । अभावस्थले तु विशेष्यविशेषणभावो न सम्बन्धान्तरमपेक्षते, प्रतीतिविषयत्वादेव विशेष्यविशेषण भावस्य सम्बन्धतयाऽवगाहनात् । यतः विशेषणत्वविशेष्यत्वान्यविशिष्टधीविषयत्वस्यैव सम्बन्धस्वरूपतयाऽभावविशेषणकस्थलेऽपि तथाविधस्य सम्बन्धस्य प्रतीतिबलात् सम्भव एव ।

अपि च, सम्बन्धत्वमेव विशेषणत्वप्रयोजकमित्यपि न नियमः । न हि चरणा-वधृतदण्डः शिरसा वा कथञ्चित् सम्पृक्तयष्टिकः पुरुषो दण्डसम्बन्धवशाद् दण्डीति व्यह्रियते, न वा विशेषणभावं प्रति सम्बन्धत्वं नियामकम्, यतः 'रूपसमवायवान् घटः' इत्यत्र घटत्वावच्छिन्नाधिकरणतानिरूपिताधेयता समवाये वर्त्तत इति समवायस्य तत्र विशेषणत्वमङ्गीकर्तव्यम् ।

न च पुनस्तत्र समवायस्य घटे सम्बन्धान्तरं विद्यते । समवायस्य नित्यत्वात् सम्बन्धत्वाच्च तस्य सम्बन्धान्तरं नास्ति । तथा चोक्तं प्रशस्तपादभाष्ये—'एवम-विभागिनो वृत्त्यात्मकस्य समवायस्य नान्या वृत्तिरस्ति, तस्मात् स्वात्मवृत्तिः[1]' इति । अत एव वाच्यवाचकभावसम्बन्धवद् विशेष्यविशेणभावोऽपि प्रतीतिबलात् सम्बन्ध एवेति स्वीकर्त्तव्यम् । अतो नास्य व्यवहारार्थं सम्बन्धान्तरमपेक्ष्यते ।

अपि च, विशेष्यविशेषणभावः पुरुषेच्छानुवर्त्तनेन प्रसरति । तथा हि 'घटवद् भूतलम्' इत्यत्र घटस्य विशेषणत्वेन भूतलस्य च विशेष्यतया यथा प्रतीतिः, तथैव 'भूतले घटः' इत्यत्र घटविशेष्यकाधेयत्वसम्बन्धावच्छिन्नभूतलविशेषणकोऽनुभवः सर्वत्रैव सिध्यति । तस्माद् विशेष्यं वा विशेषणं वा न किञ्चिद् गोत्वादिवद् नियतम् । उभयोरप्युभयात्मकत्वसम्भवात् ।

---

१. प्रशस्तपादटीकायाम्—अत्रेदं तात्पर्यम्—यः सर्वदा सर्वत्र नास्ति, तस्यैव कदाचित्कत्वेन कस्मिंश्चिदधिकरणे आधेयतानियामकः सम्बन्ध आवश्यकः । यथा घटादीनां भूतलादौ । समवायस्य तु नित्यतया एकत्वेनाङ्गीकाराच्च सर्वदा सर्वत्र स विद्यत एव । अतस्तस्य अवस्थानार्थं सम्बन्धान्तरेण न प्रयोजनम् । तथा चोक्तं न्यायकन्दलीटीकायाम्—'कृतको हि संयोगः, तस्य वृत्त्यात्मकस्यापि वृत्त्यन्तरमस्ति । कारणसमवायस्य कार्यलक्षणत्वात् । समवायस्य वृत्त्यन्तरं नास्ति । तस्मादस्य स्वात्मना स्वरूपेणैव वृत्तिः, न वृत्त्यन्तरेणेत्यर्थः' (न्या० कु० समवायनिरूपणे-पृ० ७८५) ।

६७. विशेषणविशेष्यत्वस्य सम्बन्धत्वप्रतिपादम्

अतो विशेष्यविशेषणभावः प्रतीतिमात्रशरीर इति न तत्र पुरुषेच्छां विना किञ्चित् नियामकम्। न हि घटवद्भूतलमित्यत्र भूतलस्य विशेष्यतया प्रतीतिवशाद् यथा प्रत्यक्षं 'भूतले घटः' इत्यत्रापि न वस्तुतारतम्यं किञ्चित् सम्पद्यते। केवलन्तु प्रमातुरिच्छावशादेव प्रतीतयोर्घटभूतलयोर्विशेष्यविशेषणभावः कल्पनीयः। अतो न विशेष्यविशेषणभावः प्रतीतिं विहाय किञ्चिदपेक्षते।

एवं च सति 'घटाभाववद् भूतलम्' इति प्रतीतिबलादभावस्य विशेषणत्वेन प्रतीतिर्वारयितुं न शक्यते। तस्मात् सिद्धोऽभावस्याधिकरणेन विशेष्यविशेषणभावः सम्बन्धः। दृश्यते च—कर्तृस्थया गमनादिक्रियया कर्मस्थया भेदनादिक्रियया च कालसंयोगसम्बन्धराहित्येऽपि विशेष्यविशेषणभावः प्रतीतिबलात् सम्बन्धतया सिध्यति। तस्माद् भावपदार्थेनैव कालस्यापि यदि विशेष्यविशेषणभावसम्बन्धः स्वीकरणीयः स्यात्, तदा अभावपक्षेऽपि तथाविधसम्बन्धकल्पने न दोषः।

तत्र चाभावप्रतियोगिनोर्युगपत् सहानवस्थायित्वात् प्रतियोगिविरोधित्वमभावस्य सिद्धम्। विरोधश्चात्र सहानवस्थायित्वमिति देशकालघटितसम्बन्ध एव विरोधिपदार्थतया ग्राह्यः। तथा च यस्मिन् काले यस्मिन् देशे यत्सम्बन्धावच्छिन्नयद्धर्मावच्छिन्नप्रतियोगिसत्त्वम्, तस्मिन् काले तत्र तत्सम्बन्धावच्छिन्नतद्धर्मावच्छिन्नप्रतियोगिताकाभावो न सम्भवेत्।

६८. अभावतत्प्रतियोगिनोः पारस्परिकविरोधोपपादनम्

अत एव प्रतियोगितावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकत्वमभावस्य नियामकमिति एकधर्मावच्छिन्नप्रतियोगिताकाभावसत्वेऽपि धर्मान्तरावच्छिन्नप्रतियोगिसत्त्वं न विरुद्धम्। एवं सम्बन्धोऽपि बोध्यः। अत एव संयोगेन घटत्वावच्छिन्नघटवति भूतले समवायेन घटत्वावच्छिन्नप्रतियोगिताकाभावः सुलभः।

एवं च सति देशकालनियन्त्रिततया सहानवस्थायित्वलक्षणविरोधस्य प्रतियोग्यसमानकालीनतत्तद्देशादिकमभावसम्बन्धतया स्थितम्।

अपि चाभावस्य कृतकत्वनित्यत्वे समवलम्ब्य यो वितर्कः सौगतैः प्रदर्शितः, सोऽपि प्रतिविधीयते। तथा हि अन्योन्याभावस्यात्यन्ताभावस्य च नित्यत्वम् वयमपि अनुजानीमः। यद्यपि ध्वंसाभावस्य जन्यत्वमस्मत्सिद्धान्तसिद्धम्, तथापि न केवलं जन्यत्वसाधर्म्येण भावकुक्षौ तदन्तर्भावः समीचीनः, यतः 'घटो ध्वस्तः' इति प्रतीतेः 'अयं भावः' इत्याद्याकारकप्रतीतिवैलक्षण्यं हि नितरामेवाभावस्य भाववैलक्षण्यं प्रतिपादयति।

न हि विषयवैलक्षण्यं विना ज्ञानवैलक्षण्यं निष्पद्यते, विषयालम्बनत्वाज्ज्ञानस्य । कारणजन्यत्वमेव हि कृतकत्वे नियामकम् । तथा हि घटादिभावानां कारणजन्यत्वेन यथा उत्पत्तिमत्त्वम्, तथैव ध्वंसाभावस्यापि तुल्यमेव । उत्पत्तिविनाशौ प्रति कारण-सापेक्षत्वस्य तुल्यतया यथा घटानाम् आद्यक्षणावच्छिन्नसम्बन्धात्मकसमुद्भवं प्रति सामग्रीसमवधानं नियामकम्, तथैव घटविनाशं प्रत्यपि विनाशसामग्रीसमवधानमपि तुल्यमेव नियामकं वाच्यम् । घटाद्युत्पत्तौ यथा कपालदण्डचक्रकुलालादयोऽपेक्ष्यन्ते, तथा घटविनाशं प्रत्यपि मुद्गराभिघातादिकं कारणमावश्यकम् ।

६९. जन्यत्वस्य भावत्वव्यापकत्वखण्डनम्

यदि तु मुद्गरादिविनाशककारणासत्त्वदशायामपि घटादयो विनश्येयुः, तर्हि सहसैव घटादयः कथं न विनश्यन्ति ?

७०. ध्वंसस्य सकारणकत्वोपपादनम्

यच्चोक्तं मुद्गरादिप्रहारेण नाभावः समुत्पद्यते, अपि तु कपालादिकमेव जायत इति नास्ति किञ्चिद् विनाशकं कारणम्, तदपि न युक्तम्, यतस्तत्रापि घटसजातीय-वस्तुधारा तत्र नैव जायत इति क्षणभङ्गवादिना भवतापि स्वीकर्त्तव्यमेव । एवं च सति सजातीयधारासृष्टिजनकशक्तेरभावोऽवश्यं स्वीकर्त्तव्यः । अन्यथा मुद्गरादि-प्रहारेऽपि घटविजातीयकपालादिधारावद् घटसजातीयधारा उत्पद्यतां नाम ।

तथा चोक्तं न्यायमञ्जर्याम्—

तदुत्पादस्वभावे हि न किञ्चिन्मुद्गरादिना ।
अतदुत्पादकत्वेऽपि न किञ्चिन्मुद्गरादिना ॥
मुद्गरोपनिपाताच्च यद्युत्पन्नं क्षणान्तरम् ।
घटक्षणस्य कं वृत्तं येन नाभाति पूर्ववत्[1] ॥ इति ।

यदि तु सजातीयसृष्टिधाराशक्तेरभावो नाभ्युपेयेत, तर्हि मुद्गराद्यभिघात-स्थलेऽपि घटविजातीयकपालादिसृष्टिधारावद् घटसजातीयसृष्टिधारा वा कथं न स्यात् ? ननु सजातीयविजातीयधारासृष्टौ नैपुण्यं वर्त्तते । तथा च मुद्गराद्यभिघातस्थले न घटसजातीयसृष्टिधारानैपुण्यमिति विनाशकहेतोरनङ्गीकारो नैव दोषाय इति चेत् तत्रेदमुच्यते—तर्हि मुद्गरपातादिभ्यः प्रागपि विजातीयानां भवन्मते क्षणिकानां च कपालधाराणामुत्पादनं कथं न भवेत् ? तथा मुद्गराभिघाताद् अनन्तरमपि सजातीय-घटधारोत्पादनं कथं न भवेत् ? वस्तुतस्तु सर्वदैव तथाविधसजातीयविजातीययोर्घट-धाराकपालधारयोः समुत्पत्तिः प्रसज्येत । तथा चोक्तं जयन्तभट्टपादैः—मुद्गरादि-

१. न्यायमञ्जर्याम्—पृ० ५७ ।

योगात् पूर्वमपि कपालसन्ततिजननं तद्योगेऽपि वा सति घटसन्ततिजननमनियमेन दृश्यत इति । विजातीयक्षणोत्पादनस्वभावे च घटे मुद्गरादेर्वैयर्थ्यमेव स्यात् ।

अत्रेदं पृच्छ्यते—अभावमनङ्गीकुर्वतां सौगतानां नये पूर्वक्षणविनाशेन क्षणान्तरोत्पत्तिर्व्यवस्थिता । तथा च सति विनाशेऽपि यदि पूर्वक्षणस्य नाभावः स्यात्, तर्हि तदानीमपि तत्क्षणप्रतीतिः कथं न भवेत् ? न च तत्क्षणं न भवतीत्येवमात्रमुच्यते—न तु पूर्वक्षणस्याभाव इति तात्पर्यमित्यपि वाच्यम्[1], अभवनस्याभावात्मकत्वात् । तथा ह्यसौ न भवतीत्युक्ते तस्य अभाव एव प्रतीयते । तथा हि 'अयं स न भवति' इत्युक्ते प्रतीयते । इदन्तावच्छिन्नो जनः स्मर्यमाणतच्छब्दप्रतिपाद्यजनाद् भिन्न इत्येवं प्रतीयते ।

७१. उत्पादानन्तरास्थायिस्वभावस्वरूपक्षणिकत्वापेक्षया विनाशस्य वस्त्वन्तरत्वप्रतिपादनम्

एवं च सति तत्र तच्छब्दस्य स्मर्यमाणविषयोऽर्थो न इति तु ज्ञानस्याभावं प्रतिपादयति । एवं च सति तच्छब्दनकारयोरर्थभेदात् स न भवतीत्युक्ते अभावः प्रतीयत एव । तत् कथमुक्तमभावो नास्ति ?

वस्तुतस्तु मुद्गरादिपातानन्तरक्षणे घटक्षणो नास्तीति व्यवहारस्य स्वीकर्त्तव्यतया नास्तीति पदप्रतिपाद्यस्याभावस्यानङ्गीकारः कथमपि न युज्यते । एतदेवाभावास्तित्वे प्रमाणं यन्नास्तीति ज्ञानं सविषयकं, ज्ञानत्वात्, घटादिज्ञानवत् । तत्र च 'इदम् इदम् न भवति', 'इदम् इह नास्ति' इत्यादिप्रतीतिसिद्धस्याभावस्य अनङ्गीकारश्चेष्टासहस्रैरपि न सङ्गच्छत इत्येवं तात्पर्यम् ।

७२. अभावमनङ्गीकुर्वतां व्याघातदोषप्रदर्शनम्

इदं पुनरवधेयम्—ये तु अभावमनङ्गीकुर्वन्तः स्वाभिमतं प्रतिपादयितुमभावो नास्तीति उच्चैरुद्घोषयन्ति, तेषां मते नास्तीति ज्ञानस्य किन्तावद् अवलम्बनम् ? तत्र च नञो वाच्यार्थः कश्चित् स्वीकर्त्तव्य एव । अन्यथा नास्तीति प्रयोगानुपपत्तेः । तस्माद् अनिच्छतामपि तेषां स्वाभिप्रायप्रकटनवचोभिरेव अभावाख्यः कश्चित् स्वीकृतः स्यात् । तथा हि यदि अभावप्रतियोगिकाभाव एव अभावो नास्तीत्यस्यार्थः, तर्ह्यभावः स्वीकृत एव । अथ यदि नास्तीत्यस्य निषेधार्थकत्वं नाङ्गीक्रियते, तर्हि अभावस्यैव निषेधासम्भवात् सुतरामभावः स्वीकृतः स्यात् । अतोऽभावो नास्तीति

---

१. पादटीकायाम्—वस्त्वन्तरभावाच्च हेतुमानेव युज्यते ।
अभूत्वाभावतश्चापि यथैवान्यः क्षणो मतः ॥
(तत्त्वसङ्ग्रहे, कारिका—३६९)

वदता तादृशी एव रीतिः समाकलिता, या तु 'सेयमुभयतः पाशारज्जुः' इत्यभियुक्त-वचनलक्षणीया भवेत्। तस्मादलमभावमनङ्गीकर्त्तुर्मतमाश्रित्य कलहेन।

तथा चोक्तं जयन्तभट्टपादैः—

स्वप्रकाशा च नास्तीति संवित्तिर्भवतां मते।
न निरालम्बना चेयमस्तीति प्रतिपत्तिवत्॥
विकल्पविषयाः शब्दा यथा शौद्धोदनेर्गृहे।
गीयन्ते भवता नैवमिति नन्ववाच्यमुच्यताम्॥
अलं च बहुनोक्तेन विमर्दोऽत्र न शोभते।
महात्मनां प्रमादोऽपि मर्षणीयो हि मादृशैः[1]॥ इति।

ननु वस्तूनां क्षणिकत्वेन स्वोत्पत्त्यव्यवहितोत्तरक्षणे भावोऽर्थक्रियां प्रति असमर्थः, तदानीं तस्य विनाशसम्भवात्। अतस्तत्रार्थक्रियां प्रति या अशक्तिः, सैव नास्तितापदार्थः। अतो नास्तितावचनेनार्थक्रियासाधनानर्हत्वमेव सूच्यते, न तु तेन अभावस्वीकारप्रसंगः। तथा च समर्थेतरस्वभावभाव एव नास्तिता। तस्माद् घटो नास्तीत्यादावभावो न प्रतीयते, अपि तु पूर्वक्षणोत्पन्नो घटः परक्षणे अर्थक्रियास्वभावेतरस्वभावः। अतः कालान्तरवर्त्ती यो घटः, स एवार्थक्रियासामर्थ्यविरहेण समर्थात् पूर्ववर्त्तिनो घटाद् भिद्यमानो लाघवाद् विनष्ट इति व्यवह्रियत इति चेत्, अत्रोच्यते— एवं च सति उत्पत्तिकालीनो घटोऽर्थक्रियासमर्थः, तदुत्तरकालीनश्च घटो नार्थक्रिया-प्रतिपादनसमर्थः सम्पद्यते। तथा च सति क्षणिकतां साधयितुं समुद्यतस्यैत्र घटस्य नित्यत्वं पर्यवसितमित्यहो 'उभयतः पाशारज्जुः' स्यादेव।

७३. बौद्धनये अभावमनङ्गीकृत्यापि नास्तिताव्यवहारसाधनम्, नैयायिकैस्तत्खण्डनं च

अत्रेदं तात्पर्यम्—उत्पादानन्तरास्थायिस्वभावत्वं क्षणिकत्वमिति बौद्धानामाशयः। तथा चोक्तम्—

उत्पादानन्तरास्थायि स्वरूपं यच्च वस्तुनः।
तदुच्यते क्षणः सोऽस्ति यस्य तत्क्षणिकं मतम्[2]॥

एवं च सति तदानीं भाव एवार्थक्रियासम्पादनानर्हत्वाद् नास्तिताशब्दव्यवहारभाग् भवति। तथा च सति घटः—पूर्वक्षण इव तदनन्तरक्षणेऽपि भावस्वभावादप्रच्युत इति घटस्य नित्यत्वं वारयितुं न शक्यते। किञ्च—समर्थस्वभावस्य नास्तिता देशान्तरकालान्तरसम्बन्धिनी न वा? आद्यः कल्पो यदीष्यते, तदापि तथाविधा देशान्तर-सम्बन्धिनी नास्तिताभावाद् अभिन्ना भिन्ना वा? अभिन्ना चेत्, नास्तिता भावस्य

१. न्यायमञ्जर्याम्–प्रमाणप्रकरणे–पृ० ५८।
२. तत्त्वसङ्ग्रहे–३८८ कारिकायाम्।

घटस्य नित्यतामेव साधयति। भावाद् भेदे च नास्तितायास्तत्र भेदं प्रति किञ्चिद् नियामकं वाच्यम्। तथा च सति तस्य नियन्तुः प्रभावेण भावभिन्ना या नास्तिता, सा स्वात्मानमभावरूपतामेव प्रतिपादयति। अपि च, अर्थक्रियाया असामर्थ्यं तदानीं कथम्? अर्थक्रियाकारित्वमेव सत्त्वं भवन्मते इष्टम्। अतस्तदानीमर्थक्रियासामर्थ्यं सत्त्वमेव व्याहन्यात्।

तथा चोक्तं श्रीमदुदयनाचार्यैः 'अपि च देशान्तरकालान्तरानुषङ्गिनि अस्य नास्तिता यद्ययमेव, नूनमक्षरमिदमुक्तं यदयमेव देशान्तरकालान्तरानुषङ्गीति। यदि वा स्वदेशकालवत् कालान्तरदेशान्तरयोरपि नास्तितानानुषङ्गे आस्तित्वप्रसङ्गः[1]' इति।

७४. जैनमते अभावप्रत्यक्षोपपादनम्

जैना अप्यनुपलब्धेः प्रामाणान्तरत्वं नेच्छन्ति। अपि तु प्रत्यक्षेणैवाभावज्ञानमिति तेषां मतम्। ते इत्थं विचारयन्ति—भूतले घटो नास्तीत्यादौ भूतलग्रहणसामग्रीसत्त्वेऽपि प्रतियोगिनो घटस्य तत्रानुपलब्धिरेव घटाभावं गमयतीति यदुक्तम्, तन्न सम्यक्, तथा हि तत्र भूतलं घटसंसृष्टं न प्रतीयते। तथा सति प्रतियोगिसंसृष्टभूतलोपलब्धेस्तत्र घटाभावज्ञानानुपपत्तिः। अथ यदि घटादिना प्रतियोगिना असंसृष्टस्य भूतलस्योपलब्धेः सुतरामेव, तत्र घटानुपलब्धिवशाद् घटाभावज्ञानमिति अनुपलब्धेः प्रामाण्यमिष्येत, तदपि न चारु। तथा हि यदि प्रतियोगिना घटादिनाऽसंसृष्टतया भूतलोपलब्धिः, तत्रैव घटाभावप्रतीतिसिद्धौ पुनस्तत्राभावाख्यप्रमाणकल्पनं व्यर्थम्। तथा चोक्तं प्रमेयकमलमार्त्तण्डे—'प्रतियोगिसंसृष्टवस्त्वन्तरस्याध्यक्षेण प्रतीतौ तत्र तदभावग्राहकत्वेनाभावप्रमाणप्रवृत्तिविरोधात्। प्रवृत्तौ वा न प्रामाण्यम्। प्रतियोगिनः सत्त्वेऽपि तत्प्रवृत्तेः, द्वितीयपक्षे त्वभावप्रमाणवैयर्थ्यम्। प्रत्यक्षेणैव प्रतियोगिनः अभावप्रतिपत्तेः[2]'।

नन्वभावाधिकरणत्वेनावस्थितस्य भूतलादेर्घटादिप्रतियोग्यसंसृष्टत्वं प्रत्यक्षेण नैव ग्राह्यम्, अपि तु भूतलादिनिष्ठघटानुपलब्धिवशादेव तदवगमः। अतः प्रत्यक्षेण घटाभावोपलब्धिर्न सिध्यतीति चेत्, तत्रोच्यते—सर्वत्रैव प्रतियोग्यसंसृष्टज्ञानपूर्वकमेव घटाद्यभावज्ञानमिति भवतां मतम्! अत एव प्रतियोग्यारोपं विना नाभावप्रतीतिः।

एवं च सति भूतलादेः प्रतियोग्यसंसृष्टत्वज्ञानं यद्यनुपलब्धिप्रमाणग्राह्यम्, तर्हि तत्रापि प्रतियोगिसंसृष्टत्वारोपपूर्वकमेव तथाविधं ज्ञानं सम्पाद्यम्। तथा च प्रतियोगिसंसृष्टत्वारोपकाले प्रत्यक्षेणासंसृष्टत्वज्ञानं स्यादेवेति। प्रत्यक्षेणैवासंसृष्टत्वज्ञानसम्भवात् कुतः पुनस्तत्राप्यनुपलब्धिप्रमाणावसरः? एवमनवस्थापि तत्र सम्भाव्येत,

---

१. आत्मतत्त्वविवेके - पृ० ८७।

२. प्रमेयकमलमार्त्तण्डे—व्याख्यायाम्–२।२, पृ० २०३।

ग्रतस्तत्प्रतियोग्यसंसृष्टज्ञानं पुनरपि अभावप्रमाणसम्पाद्यमिति तत्रापि पुनस्तथैव रीतिरनुसर्त्तव्येत्यनवस्था। तथा चोक्तं प्रमेयकमलमार्त्तण्डे—'तर्हि तदपि अभावप्रमाणं प्रतियोग्यसंसृष्टवस्त्वन्तरग्रहणे सति प्रवर्त्तते। तदसंसृष्टतावगमश्च पुनरप्यभावप्रमाणसम्पाद्य इत्यनवस्था'[1]।

अपि च भूतलाद्युपलब्धावपि तत्र घटाद्यप्रतीतेरभावात्मकस्य भूतलादेः प्रतीतितो घटाभावसिद्धिरिति तत्र घटाभावेनेन्द्रियाद्यसंयोगात् सुतरां भावप्रतीत्यैवाभावोपलब्धौ भावग्राहकप्रमाणातिरिक्तं प्रमाणमेकमभावग्राहकं स्वीकृतं प्रतिवादिभिः।

७५ अभावेन भावग्रहणदर्शनादप्यभिलषितं यद् अभावस्य प्रमाणान्तरत्वं तदपि नेष्टम्

तत्रेदमुच्यते—न केवलं भावादेवाभावप्रतीतिः; अपित्वभावादपि भावप्रतीतिः सम्भवति। यथा—आकाशात् पततां पत्राणामभावो नभसि यः समुपलब्धः, तद्वशात् तत्र समीरणभावः प्रतीतिसिद्धः। एवं च सति यथा भावग्रहणेनाभावप्रतीतिस्थले भावग्राहकप्रमाणातिरिक्तमभावग्राहकं प्रमाणम्, तथा ह्यत्राप्यभावाद् भावसिद्धिस्थले अभावग्राहकप्रमाणातिरिक्तं भावग्राहकं स्वतन्त्रं प्रमाणमेकमङ्गीकरणीयं स्यात्। तस्माद् भावग्रहणेनाभावसिद्धिस्थले स्वतन्त्रप्रमाणकल्पना नैव युक्तियुक्ता। तथा चोक्तं प्रमेयकमलमार्त्तण्डे—'भावात्मके यथा मेये' इत्याद्यपि अयुक्तम्, अभावादपि भावप्रतीतेः। यथा गगनतले पत्रादीनामधःपाताभावाद् वायोरिति'[2]।

ननु यो यथाविधिः, स तथाविधेनैव प्रमाणेन गृह्येत इति न्यायः। तस्मादभावग्रहणार्थमभावात्मकमेव प्रमाणमेकमङ्गीकर्त्तव्यम्। भावग्रहणस्थले तु प्रसिद्धेनैव भावात्मकेन प्रमाणेन सिद्धिसम्भवाद् न तत्र प्रमाणान्तरं कल्पनीयमिति चेत्, नैतद् युक्तम्—तथा सति 'अयं धूमाभाववान् वह्न्यभाववत्त्वात्' इत्याद्यनुमानस्थले प्रमेयस्य धूमाभावस्याभावत्वेन तद्ग्राहकं भावात्मकं प्रमाणमप्यनुमानमभावात्मकतां भजताम्। तथा चानुमानत्वमेव व्याहन्येत। अपि च, प्रमाणेन ज्ञानं जन्येत, ज्ञानं सर्वत्र भावस्वरूपमेव, तच्च भावविषयकमभावविषयकञ्चेति द्विविधम्। एवं च सति भवदभिमतनियमवशादभावाख्येन प्रमाणेन भावात्मकं ज्ञानं नैव सिध्येत्। अतो निर्युक्तिकं वचः। एतावतैतदेव सिद्धं यदभावाख्यः प्रमेयो भावात्मकेन प्रत्यक्षेणैव ग्रहीतुं शक्यः, अभावग्रहणार्थमनुपलब्धिसंज्ञकं प्रमाणान्तरं नैव मृग्यमिति सर्वमवदातम्।

● ● ●

---

१. प्रमेयकमलमार्त्तण्डे—२।२-पृ० २०३।

२. तदेव—२।२-पृ० २०७।

पञ्चमोऽध्यायः

अभावस्यावान्तरविभागः—

लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति न्यायेन अभावपरीक्षणं लक्षणप्रमाणाभ्यां प्रसाध्य प्रत्यक्षप्रमाणसिद्धस्याभावस्य स्वतन्त्रपदार्थत्वं प्रतिपादितम्। साम्प्रतं च तदवान्तरभेदा आलोच्यन्ते।

१. अभावचातुर्विध्यकथनम्

वैशेषिकनये अभावश्चतुर्विधः—प्रागभावः, प्रध्वंसाभावः, इतरेतराभावः, अत्यन्ताभावश्च[1]। न्यायमते चतुर्विधोऽभावः स्वीकृतः। यथा—

अभावस्तु द्विधा संसर्गाऽन्योन्याभावभेदतः।
प्रागभावस्तथा ध्वंसः संसर्गाभाव दृश्यते[2] ॥

जयन्तभट्टपादास्त्वभावस्य द्वैविध्यं स्वीकृतवन्तः–प्रागभावः, प्रध्वंसाभावश्चेति। तथा हि 'स च द्विविधः–प्रागभावः, प्रध्वंसाभावश्चेति'।

२. मतान्तरेणाभावस्य षड्विधत्वकथनम्

केचित् पुनः षड्विधोऽभाव इति स्वीकृतवन्तः। वैशेषिकाभिमताश्चतुर्विधा अभावाः, तथा अपेक्षाभावः, सामर्थ्याभावश्चेति साकल्येन षट्प्रकारोऽभावः।

तत्र अभावद्वैविध्यमङ्गीकुर्वतां जयन्तभट्टानां मतमेवादावालोच्यते। ते च महात्मानः 'प्रागुत्पत्तेरभावोपपत्तेश्च[3]' इति न्यायसूत्रमाश्रित्याभावद्वैविध्यमुक्तवन्त इति प्रतीयते। तत्सूत्रव्याख्यानावसरे उक्तं तत्रभवता भाष्यकृता—'अभावद्वैतं खलु भवति प्राक् चोत्पत्तेरविद्यमानता, उत्पन्नस्य चात्मनो हानादविद्यमानता, तत्रालक्षितेषु वासःसुप्रागुत्पत्तेरविद्यमानतालक्षणो लक्षणानामभावो नेतरः[4]' इति।

३. अभावद्वैविध्यमङ्गीकुर्वतां जयन्तभट्टानां मतम्

तत्र च वस्तूनामुत्पत्तेः प्राग् योऽभावः प्रतीयते, स एव प्रागभाव इति जयन्तभट्टपादानामाशयः। उक्तं च–'प्रागात्मलाभाद् नास्तित्वं प्रागभावोऽभिधीयते[5]' इति। उत्पन्नवस्तुविनाशानन्तरं प्रतीयमानस्तदभावः प्रध्वंसाभावः, तथा चोक्तं—'उत्पन्नस्यात्महानन्तु प्रध्वंस इति कथ्यते[6]'।

---

१. 'स च चतुर्विधः—प्रागभावः, प्रध्वंसाभावः, इतरेतराभावः, अत्यन्ताभावश्चेति' न्यायकन्दल्याम्, अनुमानेऽभावान्तर्भावप्रकरणे, पृ०–१५६।

२. न्यायदर्शने—सूत्रवार्त्तिकतात्पर्यटीकायाम्–२।२।१२।

३. न्या० सू० २।२।१२।

४. तदेव—न्यायभाष्ये–२।२।१२।

५. न्या० म० प्र० प्र० ५९।

६. तदेव।

एवमभावद्वयं निरूप्यात्यन्ताभावान्योन्याभावयोस्तत्रैवाभावद्वयान्तर्गतत्वं जयन्तभट्टपादैः प्रतिपादितम्।

तत्र प्रागभाव एवात्यन्ताभावस्यान्तर्भावः, अन्योन्याभावस्यापि च तत्रैवान्तर्भुक्तिर्भवेत्। तथा हि घटे न घटानुत्पत्तिर्वर्तते; अपि तु घटातिरिक्ते वस्तुनि तिष्ठतीति घटानुत्पादघटाभेदयोः समानदेशावस्थायित्वम्। एवं च सति घटानुत्पादरूपो यो घटप्रागभावः, स एव यदा वस्त्वन्तरगतो भवेत्, तदैव घटान्योन्याभावाख्यां भजते।

४. अन्योन्याभावस्य प्रागभावान्तर्गतत्वस्थापनम्

अत्रायमाशयः—घटप्रागभावान्योन्याभावयोर्घटत्वावच्छिन्नप्रतियोगिताकत्वेन घटावृत्तित्वेन च तुल्यत्वं युक्तिसिद्धम्। यद्यपि घटाधिकरणे घटभेदस्यानुभविकतया तदानीं तत्र घटप्रागभावस्यासत्त्वात् प्रागभावव्यतिरिक्तत्वं घटभेदस्यायाति, तथापि यत्र घटो न वर्त्तते, तत्र घटातिरिक्तवस्त्वन्तरगतघटप्रागभावो घटान्योन्याभावान्नातिरिच्यत एव। उक्तं च जयन्तभट्टपादैः—

न प्रागभावादन्ये तु भिद्यन्ते परमार्थतः।
स हि वस्त्वन्तरोपाधिरन्योन्याभाव उच्यते[1]॥

५. प्रागभावस्य प्रतियोग्युत्पत्तिविनाश्यत्वखण्डनम्

'पटो न घटः' इत्यादिप्रतीतौ पटे विद्यमानो घटभेदो घटप्रागभावान्नातिरिच्यत इत्येवमर्थः, यतः पटे घटानुत्पत्तिश्चिरन्तनी एव। अतस्तत्र स्थितो घटभेदोऽपि चिरन्तनो भवितुमर्हति। घटविद्यमानदशायां घटवति भूतलादौ घटो न इति प्रतीतेरपि भूतलनिष्ठघटानुत्पादरूपघटप्रागभावापेक्षया नातिरिक्तत्वम्। तेन च घटप्रागभावस्य प्रतियोगिनाश्यत्वं नाङ्गीकृतम्। इह कपाले 'घटो भविष्यति' इत्यादिप्रतीत्या कपाले प्रतीयमानो यो घटप्रागभावः, स तु कपालत्वावच्छिन्नाधिकरणतानिरूपितस्वरूपसम्बन्धावच्छिन्नाधेयतावान् अभाव इति प्रतीतिसिद्धः। कार्यकारणयोरत्यन्तभेदवादिन्यायवैशेषिकनये घटोत्पत्तौ सत्यां कपालत्वाच्छिन्नाधिकरणता तत्र नैव सिध्यति। तदानीं घटत्वावच्छिन्नाधिकरणताया एव क्लृप्तत्वात्। तस्माद् यावत् कपालत्वावच्छिन्नाधिकरणता प्रतीतिसिद्धा, तावद् घटप्रागभावोऽपि तत्र प्रतीतिसिद्ध एव। अतो घटप्रागभावो घटोत्पादेन विनष्टो न भवेत्। कपालत्वावच्छिन्नाधिकरणतामन्तरेण तन्निरूपिताधेयतावत्त्वेन प्रतीतेरसम्भवात् तदानीं घटप्रागभावो नैव तत्र प्रतीयते। घटत्वावच्छिन्नप्रतियोगिताकत्वस्य तादात्म्यसम्बन्धावच्छिन्नत्वं घटान्योन्याभावे यदङ्गीकृतम्, तत्तु घटप्रागभावसाधारणस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकत्वेनैवो-

---

१. न्यायमञ्जर्याम्—प्र० प्र० पृ० ५९।

पपत्तौ प्रागभावान्योन्याभावयोस्तुल्यत्वमिह जयन्तभट्टाभिमतं व्यवस्थापयितुं शक्यते ।

६. भेदो न अन्योन्याभावः

वस्तुतस्तु अन्योन्याभावस्य भेदस्वरूपतां नेच्छन्तीत्येवं प्रतीयते । भेदस्तु वस्तुनिष्ठस्तदितरव्यावर्त्तको धर्म इति कन्दलीकृद्भिरपि स्वीकृतम् । तथा चोक्तं कन्दलीटीकायाम्—'भिन्नयोरितरेताराभावः, न तु इतरेतराभावो भेदः । यदेतद् वस्तुनः प्रात्यात्मिकस्वरूपम्, स एव भेदः[1]' इति । तस्माद् भेदस्तदितरव्यावर्त्तकधर्मतया स्थितः, न च सः अभावाख्यः । यस्तु पुनरितरेतराभावः, स तु प्रागभावेनैवोपपद्यते ।

७. अत्यन्ताभावस्य प्रागभावान्तर्गतत्वव्यवस्थापनम्

एवमत्यन्ताभावोऽपि प्रागभावान्तर्गत एव । तथा चोक्तं जयन्तभट्टपादैः—'स एवावधिशून्यत्वाद् अत्यन्ताभावतां गतः[2]' इति ।

अत्रायमाशयः—'घटो नास्ति' इत्यादिप्रतीत्या प्रतीयमानो घटाभावः केनचिद् देशेन कालेन वा न परिच्छिद्यते । सर्वदैव 'घटो नास्ति' इत्यादिप्रतीतेरानुभविकत्वात् । संयोगेन 'घटवति भूतले' यद्यपि संयोगेन 'घटो नास्ति' इत्यादिप्रतीतिर्न भवेत्, तथापि सम्बन्धान्तरेण 'घटो नास्ति' इत्यादिप्रतीतिसिद्धस्य घटात्यन्ताभावस्य स्वरूपतस्तत्राप्यवस्थानं वारयितुं नैव शक्यते । सम्बन्धविशेषणाभावीयप्रतियोगिता यद्यपि अवच्छिन्ना, तथापि प्रतियोगितासम्बन्धेन घटविशिष्टस्याभावस्य स्वरूपं नैव केनचित् प्रतियोगितावच्छेदकेन सम्बन्धेन समाविष्टम् । अभावस्य भावभिन्नत्वस्वरूपत्वात् तत्र च प्रतियोगितावच्छेदकसम्बन्धादीनां नान्तर्गतत्वम् । अतो घटात्यन्ताभावो देशेन कालेन वा नैव परिच्छिद्यत इति अवधिशून्यत्वं घटो नास्तीति प्रतीतिसिद्धस्याभावस्य । एवं घटानुत्पादलक्षणो घटप्रागभावोऽप्यवधिशून्यत्वाद् घटात्यन्ताभावतुल्यतया प्रागभावात् सोऽपि नातिरिच्यते ।

८. संयोगेन 'घटो नास्ति' इत्यस्य घटसंयोगाभावपरत्वेन प्रागभावेन सहाविरोधः

ननु संयोगेन 'घटवति भूतले' संयोगेन 'घटो नास्ति' इति प्रतीतिर्न भवेत् । तथा समवायसम्बन्धावच्छिन्नघटाधिकरणे समवायेन 'घटो नास्ति' इति प्रतीतिर्न सिध्यति । तस्मात् तत्सम्बन्धावच्छिन्नतद्धर्मावच्छिन्नप्रतियोगिताकाभावबुद्धिं प्रति तत्सम्बन्धावच्छिन्नतद्धर्मावच्छिन्नप्रकारताकज्ञानत्वेन विरोधित्वं स्वीकर्त्तव्यम् ।

---

१. न्या० म० द्रव्यप्रकरणे-जलप्रकरणे, पृ० ९०–९२ ।

२. न्या० म० प्रमाणप्रकरणे पृ०–५९ ।

अत्यन्ताभावस्य प्रागभावानतिरिक्तत्वमते तु नैवं विरोधः सिध्यति। घटानुत्पादस्य घटप्रागभावत्वेनाभिमतस्य घटोत्पत्त्यनधिकरणमात्रवृत्तितया संयोगसम्बन्धेन घटवत्यपि भूतले घटानुत्पादलक्षणप्रागभावस्य तत्कालावच्छेदेनैव सत्त्वात्। अतः प्रागभावाद-त्यन्ताभावोऽतिरिक्त एव स्वीकार्यं इति चेत्, तत्रोच्यते—प्रागभावात्यन्ताभावयोरन-तिरिक्तत्ववादिभिः—संयोगेन 'घटवति भूतले' सामान्यतः 'घटो नास्ति' इति प्रतीते-र्दुर्वारत्वात् तत्र सम्बन्धविशेषावच्छिन्नप्रतियोगिताकबुद्धिं प्रत्येव तथाविधसम्बन्धा-वच्छिन्नघटप्रकारताकज्ञानस्य विरोधित्वं भवद्भिरङ्गीकृतम्। तत्र तु संयुक्तघटाधि-करणे घटसंयोगाभावस्यैव तदानीमसत्त्वात्, तत्र घटसंयोगस्य प्रागभावेनैवोपपत्तौ न पूर्वोक्तप्रतिबध्यप्रतिबन्धकभावव्यवस्थायां कापि क्षतिः।

तथा हि यत्र घटसंयोगो वर्त्तते, तत्र तत्संयोगप्रागभावो नास्तीति सुतरां तत्र संयोगेन 'घटो नास्ति' इति व्यवहारोऽपि न भवेत्। एवं यत्र समवायेन घटो वर्त्तते, तत्रैव घटसमवेतत्वाभाव एव तदानीं नास्तीत्यर्थो ग्राह्यः। तथा च तत्रापि घटसमवेत-त्वप्रागभावासत्त्वान्न काप्यनुपपत्तिः।

९. घटे घटात्यन्ताभाववद् घटप्रागभावव्यवस्थापनम्

नन्वेवमपि घटे घटात्यन्ताभावस्यानुभविकतया तत्र च घटानुत्पादलक्षणस्य प्रागभावस्यासत्त्वात् कथं प्रागभावात्यन्ताभावयोस्तुल्यत्वम्? तथा हि 'घट उत्पद्यते' इति सर्वजनीनव्यवहाराद् घटोत्पत्तेराश्रयो घट एव। अतो घटानुत्पादलक्षणो घटप्राग-भावो घटे नास्ति। घटात्यन्ताभावश्च घटे अस्त्येव। तत् कथमुभयोस्तुल्यत्वमिति चेत्, तत्रोच्यते—उत्पन्नाद् घटाद् घटान्तरं नैवोत्पद्यत इति घटानुत्पादलक्षणोऽभावो घटेऽपि स्थातुमर्हति, उत्पत्स्यमान एव घट उत्पद्यत इति क्रियाश्रयतया व्यवह्रियते, न तूत्प-न्नोपि घटः पुनरुत्पद्यत इति व्यवहारः परीक्षकाणाम्। तस्मादुत्पन्ने घटे घटानुत्पादः स्थातुमर्हति। अतस्तत्र घटानुत्पादलक्षणस्य प्रागभावस्य सत्त्वेन घटात्यन्ताभावप्रतीतौ न कापि बाधा। एवमभावद्वैविध्यं जरन्नैयायिकानां जयन्तभट्टपादादीनामभिमतमिति प्रतीयते।

१०. अभावानां षड्विधत्ववादिमताख्यानम्

जयन्तभट्टपादैस्तु षड्विधोऽभावः कैश्चित् स्वीकृत इत्युक्तम्। तत्र च प्राग-भावः, ध्वंसाभावः, तथाऽन्योन्याभावः, अत्यन्ताभावश्चेति चत्वारः प्रसिद्धा अभावाः। अन्ये च सामर्थ्याभावः, अपेक्षाभावश्चेत्यभावः षड्विध इत्युक्तवन्तः। तथा हि—नित्यप्रागभाव एव देशविशेषाद्यपेक्ष्यापेक्षाभाव इत्युच्यते। तथा हि भविष्यत्पुत्रके पितरि पुत्रोत्पत्तेः प्राक् यः पितृत्वप्रागभावः, स एव कालविशेषापेक्षया पितृत्वप्रागभाव इत्युच्यते। अयमेव च अपेक्षाभावः पितृत्वस्य पुत्राद्यपेक्षया सुतरामेव पुत्रोत्पत्तेः प्राग-वस्थितस्य पितृत्वाऽभावस्य सापेक्षप्रतियोगिकत्वेनैवापेक्षाभावत्वम्।

यत्र च पूर्वस्थितस्य सामर्थ्यस्य विनाशः, स एव च ध्वंसाभावः सामर्थ्याभाव इति विशिष्यते। यथा रोगादिवशाद् नष्टचक्षुषः पुरुषस्य दृष्टिशक्तेरभावः। एवमभूतस्य अभावस्यापि सामर्थ्यप्रतियोगिकत्वेन सामर्थ्याभावत्वम्।

११. द्वैविध्यखण्डनद्वारेण अभावानां चातुर्विध्यव्यवस्थापनम्

अभावद्वैविध्यमङ्गीकुर्वतां जरन्नैयायिकानां मतं तु वैशेषिकादिभिर्नव्यैः नानुमन्यते, यतः सर्वस्यैव अभावस्य किञ्चित्सम्बन्धावच्छिन्नकिञ्चिद्धर्मावच्छिन्नप्रतियोगिताकत्वनियमात् तथाविधप्रतियोगिताकत्वभेदेन अभावस्यापि वैलक्षण्यं सुतरां परिनिष्पद्यते। तथा च 'घटः पटो न' इत्यत्र तादात्म्यसम्बन्धावच्छिन्नपटत्वावच्छिन्नप्रतियोगिताकत्वेनैव अभावप्रतीत्या अन्योन्याभावप्रतीतेर्गतार्थत्वम्। घटोत्पत्त्यनन्तरं घटप्रागभावस्य स्वीकारे न किञ्चित् प्रमाणमस्ति, यतः स्वसमवायिन्येव स्वोत्पत्तेः पूर्वं स्वप्रागभावस्तिष्ठतीति आनुभविकम्।

यदि तु कार्यानुत्पादस्य वस्त्वन्तरनिष्ठतया तत्रापि तत्कार्यप्रागभाव इष्येत, तर्हि पुत्रानुत्पादस्य बन्ध्यायामपि सत्त्वात् तत्रापि पुत्रप्रागभावः प्रतीयताम्। न चेष्टापत्तिः, अनुभवविरोधात्।

१२. प्रागभावस्य नित्यत्वनिराकरणम्

अपि च घटोत्पत्त्यनन्तरक्षणे पुनर्घटोत्पत्तिवारणार्थं घटोत्पत्तिं प्रति घटप्रागभावस्य कारणत्वं स्वीकार्यम्। एवं च सति घटसमवायिनि कपाले यावद् घटो नोत्पन्नः तावदेव घटप्रागभावस्तिष्ठन्नपि घटोत्पत्त्या विनश्यतीति अङ्गीकर्त्तव्यम्। एवं च सति घटप्रागभावस्य नित्यत्वं कथङ्कारं कल्पयितुं शक्यते? अतः प्रागभावस्य कार्योत्पत्तिविनाश्यतया विनाशित्वादेवात्यन्ताभावान्योन्याभावयोस्तद्वैलक्षण्यमङ्गीकर्त्तव्यम्।

किं बहुना—यदि प्रागभावस्यात्यन्ताभावान्योन्याभावात्मकत्वम्, तर्हि इह 'कपाले घटो भविष्यति' इति प्रतीतिर्यावद् वर्त्तते, तावत्पर्यन्तमेव पटेऽपि घटान्योन्याभावस्तिष्ठतु। घटोत्पत्त्या घटप्रागभावस्य विनाशे तु तदात्मकघटान्योन्याभावस्यापि सुतरां विनाशाद् घटोत्पत्त्यनन्तरं घटप्रागभावासत्त्वेन घटान्योन्याभावस्याप्यसत्त्वात् 'पटः घटो न' इति पटानुयोगिकघटप्रतियोगिकान्योन्याभावप्रतीतिरपि व्याहन्येत, तथाविधाभावस्य तदानीमसत्त्वात्।

१३. अनुभवसाक्षिकतया प्रागभावान्योन्याभावयोर्वैलक्षण्यम्

वस्तुतस्तु नैवम्। न हि लौकिकानां परीक्षकाणां च समर्थप्रवृत्तिजनिकां प्रतीतिमुपेक्ष्य शपथेनापि किञ्चिद् व्यवस्थापयितुं शक्यम्। तस्माद् लोकप्रतीतिं यथायथमनुसन्दधद्भिः सर्वैरेव 'घटो भविष्यति' तथा 'घटो न' इति प्रतीत्योर्वैलक्षण्यं

सम्भावनीयम्। अपि च, घटभेदाभावस्य केवलं घट एव सत्त्वाद् घटभेदाभावो घटत्वं च समनियतमिति अन्योन्याभावाभावस्य प्रतियोगितावच्छेदकत्वस्वरूपत्वं नैयायिकैरिष्टम्।

एवमत्यन्ताभावाभावस्यापि प्रतियोगिस्वरूपत्वं युक्तिबलात् सिद्धम्। यदि तु घटप्रागभावघटात्यन्ताभावघटान्योन्याभावानामनतिरिक्तत्वमिष्येत, तर्हि कपाले घटप्रागभावस्य सत्त्वेऽपि पटादौ पूर्वोक्तयुक्त्या घटप्रागभावाभावसत्त्वात् तत्र सुतरामेव घटात्यन्ताभावघटभेदयोः प्रागभावानतिरिक्तयोरभावोऽपि सिध्यत्येवेति पटस्य घटरूपत्वं तथा पटे घटत्वं च प्रसज्येत। तथा च घटत्ववान् अयं घट इति बुद्धेः पटविषयकत्वेऽपि प्रमाणत्वं दुर्निवारं स्यात्।

एवं ध्वंसाभावपक्षेऽपि समान एव पन्थाः। तथा हि घटध्वंसो घटविनाशात् पूर्वं केनाप्यप्रतीयमानत्वाद् न विद्यत एव। अपि तु घटविद्यमानदशायामेव पटे घटभेदो भूतलादौ च घटात्यन्ताभाव आ च पांशुलचरणं हालिकम्, आ च प्रमातृपुरुषं प्रतीयते।

१४. ध्वंसाभावस्यापि अभावान्तरापेक्षया वैलक्षण्यव्यवस्थापनम्

तस्माद् लोकसिद्धां प्रतीतिमास्थाय सर्वथैव ध्वंसप्रागभावातिरिक्ततयाऽत्यन्ताभावान्योन्याभावयोः प्रतिपत्तिः स्वीकार्या। अत एव न्यायभाष्यकृतापि 'प्रागुत्पत्तेः अभावोपपत्तेश्च'[१] इति सूत्रव्याख्यानावसरे यदभावद्वैतमुक्तम्, तत्रापि संसर्गाभावतादात्म्याभावश्चेति द्वैविध्यं बोद्धव्यम्। तथा चोक्तं तत्र वाचस्पतिमिश्रैः तात्पर्यटीकायाम्—'परमार्थतस्तु प्रथममभावे द्वैतम्, तादात्म्याभावः संसर्गाभावश्चेति। संसर्गाभावोऽपि प्राक्प्रध्वंसात्यन्ताभावभेदेन त्रिविध इति चतस्रो विधा अभावस्येति'[२] इति। तस्माद् युक्तिसिद्धत्वान्नैयायिकप्रवरैः स्वीकृतत्वादभावानां चातुर्विध्यमेव सिद्धम्।

१५. अन्योन्याभावलक्षणम्

तत्र अभावः प्रथमतो द्विधा—अन्योन्याभावः, संसर्गाभावश्चेति। तत्र च तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वमन्योन्याभावत्वमिति अन्योन्याभावलक्षणम्। तत्र तादात्म्यम्—'तद्गतोऽसाधरणो धर्मः' इति रामरुद्रीटीकायामुक्तम्[३]।

तत्रापि तादात्म्यत्वेन तादात्म्यावच्छिन्नत्वं प्रतियोगितायां विवक्षितम्। तेन संयोगावच्छिन्नप्रतियोगिताके संयोग्यत्यन्ताभावे नातिव्याप्तिः। तथा हि संयोगि-

---

१. न्या० सू० २।२।१२। २. तात्पर्यटीकायाम्—न्या० सू० २।२।१२।

३. भाषापरिच्छेदे—रामरुद्रीटीकायाम्, अभावप्रकरणे-पृ० ९५।

तादात्म्यस्य संयोगरूपतया संयोगसम्बन्धावच्छिन्नप्रतियोगिताकः संयोग्यत्यन्ताभावोऽपि संयोगितादात्म्यावच्छिन्नतया तस्यापि तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकत्वसत्त्वात् तत्रातिव्याप्तिः सम्भाव्येत, तादात्म्यत्वेनेत्युक्तौ तु तादात्म्यत्वावच्छिन्नतादात्म्यनिष्ठा या संसर्गविधयाऽवच्छेदकता तन्निरूपकप्रतियोगिताकत्वस्यैव लाभात् तत्र नातिव्याप्तिः, यतस्तत्र संयोग्यत्यन्ताभावीयसंयोगनिष्ठप्रतियोगितावच्छेदकतायाः संयोगत्वेनैव लाभात् तत्तादात्म्यत्वमपि संयोगत्वमेवेति तादृशावच्छेदकतायास्तादात्म्यत्वावच्छिन्नतादात्म्यनिष्ठसंसर्गावच्छेदकत्वासत्त्वाद् नातिव्याप्तिः।

न च संयोगितादात्म्यस्य संयोगरूपत्वेन तत्तादात्म्यत्वमपि संयोगत्वमेवेति तत्रापि तादात्म्यत्वावच्छिन्नतादात्म्यनिष्ठावच्छेदकत्वसम्भव इति वाच्यम्, संसर्गतावच्छेदकं तादात्म्यत्वं न संयोगत्वादिरूपम्। अपि तु संयोग्यादिवृत्त्यसाधारणधर्मवत्त्वमेव तथाविधं विवक्षितम्। अतोऽत्यन्ताभावीयप्रतियोगितायां संयोगस्य संयोगत्वेनैवावच्छेदकत्वात् संयोग्यादिवृत्त्यसाधारणधर्मत्वेनावच्छेदकत्वविरहाद् न तत्रातिव्याप्तिः। तत्र भेदप्रतियोगितावच्छेदकसंसर्गस्यैवासाधारणधर्मत्वेन प्रतीत्यभ्युपगमात्, अन्यथाऽत्यन्ताभावान्योन्याभावयोर्वैलक्षण्यासम्भवात्।

१६. संसर्गाभावनिरूपणम्

संसर्गाभाव इत्यत्र संसर्गपदस्य कोऽर्थः? न च तादात्म्यभिन्नसम्बन्धपरमेव संसर्गपदमिति वाच्यम्, ध्वंसप्रागभावयोः प्रतियोगित्वस्य सम्बन्धानवच्छिन्नत्ववादिनये तयोरसंग्रहापत्तेः। अतः संसर्गपदमत्र तादात्म्यानवच्छिन्नप्रतियोगितारूपसंसर्गपरम्। अत एवान्योन्यपदमपि तादात्म्यावच्छिन्नप्रतियोगितापरमिति केचित्। यद् वा संसर्गपदं संसर्गपूर्वकपरम्, अन्योन्यपदमपि अन्योन्यपूर्वकपरम्। एवमभावपदमपि अभावपरम्। तथा च संसर्गान्योन्यौ तथा तादृशौ अभावौ च इति व्युत्पत्त्या संसर्गान्योन्यपदपूर्वकाभावपदवाच्यौ अभावावेव संसर्गाभावान्योन्याभावाविति तात्पर्यम्।

१७. संसर्गाभावत्रैविध्यं तत्स्वरूपादिनिरूपणं च

संसर्गाभावस्तु त्रिविधः—प्रागभावः, ध्वंसाभावः, अत्यन्ताभावश्चेति। तत्र विनाश्यभावत्वं प्रागभावत्वमिति प्रागभावलक्षणम्, विनाशीति पदप्रयोगाद् ध्वंसादौ नातिव्याप्तिः। वस्तूत्पत्तेः पूर्वमनादिकालादारभ्य तद्वस्तुसमवायिकारणे यस्तद्वस्तुप्रतियोगिताकाभावस्तिष्ठति। इह 'कपाले घटो भविष्यति' इत्याद्याकारेण प्रतीयमानः, स एव प्रागभावः। उत्पन्ने च वस्तुनि तथाविधस्याभावस्याप्रतीयमानत्वाद् वस्तूत्पत्तिरेव प्रागभावविनाशिनी। अतो विनाशी प्रागभाव इति।

ननु प्रागभावसत्त्वे किं मानमिति चेत्, तत्र केचिदाहुः—घटोत्पत्त्यनन्तरक्षणे घटोत्पादकसामग्रीसत्त्वेन पुनरपि घटोत्पत्तिनिरासार्थं प्रागभावस्य स्वप्रतियोग्युत्पत्ति

प्रति तत्प्रागभावत्वेन हेतुत्वाद् घटोत्पत्त्या च घटप्रागभावस्य विनाशात् कारणाभावादेव न तत्र पुनर्घटोत्पत्तिः प्रसज्येत ।

१८. प्रागभावप्रमाणादिविमर्शः

तत्रान्ये प्रत्यवतिष्ठन्ते लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति न्यायात् प्रागभावो यदि प्रमाणसिद्धः स्यात्, तदैव तल्लक्षणमपि निर्वाच्यं भवेत् । किन्तु प्रागभावे प्रमाणमेव नास्ति । तथा हि—'जातो घटः' इत्यादिप्रतीतिवत् 'उत्पन्नो घटध्वंसः' इति प्रत्यक्षप्रतीतिबलान्नाशेऽत्यन्ताभावादिभ्योऽतिरिच्यत एव, न पुनः कस्यापि 'इह कपाले घटो भविष्यति' इत्यादिप्रतीतौ प्रागभाव एव विषयः । तत्र वर्त्तमानघटप्रागभावस्य प्रतियोगित्वमेव भविष्यत्वरूपत्वम्, जन्यस्य भविष्यत्वरूपेण निर्वक्तुमशक्यत्वादिति वाच्यम्, वर्त्तमानकालध्वंसाधिकरणकालोत्पत्तिकत्वस्यैव तत्र भविष्यत्वरूपेण प्रतीयमानत्वात् । तत्र चाद्यक्षणसम्बन्ध एवोत्पत्तिः । आद्यत्वं च क्षणे तदधिकरणक्षणध्वंसानधिकरणत्वरूपं बोध्यम् । अतः प्रागभावस्वीकारे न काऽपि युक्तिः । यच्च पुनरुक्तं घटोत्पत्त्यनन्तरक्षणे पुनः घटोत्पत्तिवारणार्थं प्रागभावस्य हेतुत्वं वाच्यमिति, तदपि न साधु, यतः सामान्यतो जन्यद्रव्यत्वावच्छिन्नं प्रति समवायसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्याभावः कारणमिति कार्यकारणभावः कल्पनीयः । तत्र रूपध्वंसोत्पत्तिं प्रति समवायसम्बन्धेन जन्यद्रव्यसामान्याऽभावस्यासत्वाद् व्यभिचारवारणार्थं कार्यतावच्छेदककोटौ द्रव्यपदमुपात्तम् । एवं कपाले जन्यभावस्य पाकजरूपस्योत्पन्नत्वात् तत्र द्रव्यसामान्याभावस्यासत्त्वाद् व्यभिचारः स्यात् । अतः कारणकुक्षौ द्रव्यपदम् ।

१९. तदुत्पत्तिं प्रति तत्प्रागभावः कारणं न वेति विचारः

अथ जन्यद्रव्यत्वावच्छिन्नं प्रति जन्यद्रव्योत्पत्तिकालीनोत्पत्तिकध्वंसाभावस्य हेतुत्वेऽपि इष्टसिद्धौ, तत्र जन्यद्रव्यत्वावच्छिन्नं प्रति समवायसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्याभावस्य कारणत्वमिति विनिगमनाविरहेण द्विविधयोः कार्यकारणभावयोः स्वीकरणमावश्यकम्, तदपेक्षया लाघवाद् जन्यद्रव्यत्वावच्छिन्नं प्रति प्रागभावस्यैव कारणत्वमिति एक एव कार्यकारणभावः, तस्मात् प्रागभावपक्षे लाघवमित्यपि न वाच्यम्, प्रागभावकल्पनपक्षेऽपि तत्कालोत्पत्तिकानन्तपदार्थप्रतियोगिकानामनन्तानां प्रागभावानां विनिगमनाविरहेण कारणत्वकल्पनं वारयितुं न शक्यत इति तत्र प्रागभावरूपधर्मिकल्पनागौरवमव्याहतम् । तस्मात् प्रागभावकल्पनपक्षेऽपि न कोऽपि लाभः ।

अत्रेदं तत्त्वम्—प्रागभावानङ्गीकारे नवीनैर्जन्यद्रव्यत्वावच्छिन्नं प्रति समवायसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्याभावस्य कारणत्वं कल्प्यते[1] । प्रागभाववादिना

---

१. ध्वंसप्रागभावयोरधिकरणे नात्यन्ताभाव इत्यभ्युपगन्तृभिः प्राचीनैः जन्यद्रव्यत्वावच्छिन्नं प्रति जन्यद्रव्योत्पत्तिकालीनोत्पत्तिकध्वंसाभावानां कारणत्वं कल्प्यते ।

त्वेतत् सर्वमुपेक्ष्य जन्यद्रव्यत्वावच्छिन्नं प्रति तत्प्रागभावस्यैव हेतुत्वमङ्गीक्रियते। तत्र च समवायेन द्रव्यत्वं प्रतिबन्धकमिति स्वीक्रियते। प्रागभाववादिना तत्प्रतिबन्धकतानभ्युपगमेऽपि प्रसिद्धस्य जन्यद्रव्याभावस्यैव कारणत्वं वक्तुमुचितम्। न त्वसिद्धस्य प्रागभावस्य कारणत्वं कल्पनीयम्।

एवं च सति यत्र कपालद्वयसंयोगाद् घटोत्पत्तिः, तत्र तदानीं घटोत्पत्तिदशायां प्रत्येककपालेऽपि घटोत्पत्तिरङ्गीकर्त्तव्या। अन्यथा तत्र कपालिकायां समवायेन घटाभावप्रत्यक्षप्रसङ्गात्। अतस्तत्तद्द्रव्यानारम्भकद्रव्याभावस्यैव कारणत्वं वाच्यम्। तथा च तत्तद्ध्वंसाभावानामपि विनिगमनाविरहेण कारणत्वापत्तिः संगच्छत एव। एवं जन्यद्रव्यं प्रति द्रव्योत्पत्तिकालीनोत्पत्तिकध्वंसाभावानां हेतुत्वे तत्तद्घटनाशानन्तरं तदारम्भककपालाभ्यां घटान्तरोत्पत्तिरपि न स्यात्, तादृशध्वंसाभावरूपकारणाभवात्। अत एव प्रागभावकल्पनेऽपि विनिगमनाविरहरूपदूषणान्तरं समुचितमेवेति पूर्वपक्षः।

अत्रेदमुच्यते—जन्यद्रव्योत्पत्तिं प्रति समवायसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्याभावत्वस्य कारणत्वकल्पनापेक्षया तादृशध्वंसाभावस्य कारणत्वकल्पने गौरवम्, यतस्तत्तद्द्रव्यं प्रति तदुत्पत्तिकालोत्पत्तिकध्वंसव्यक्तीनां तत्तद्व्यक्तित्वेनैव कारणता वाच्या। अतो ध्वंसाभावस्य कारणत्वकल्पने प्रागभावकारणकल्पनापेक्षया न विनिगमनाविरहः।

२०. उत्पत्तिं प्रति प्रागभावस्य कारणत्वकल्पने कल्पनान्तरापेक्षया लाघवात् प्रागभावसिद्धिः

वस्तुतस्तु समवायेन जन्यद्रव्योत्पत्तिं प्रति समवायेन द्रव्याभावस्य कारणत्वमुभयवादिसम्मततया जन्यद्रव्यत्वावच्छिन्नं प्रति तथाविधद्रव्याभावस्य जनकत्वेनाङ्गीकरणमावश्यकम्। तथा च क्लृप्तेन द्रव्याभावेनैव कारणत्वं वाच्यम्, न त्वक्लृप्तेन प्रागभावत्वेन कारणत्वकल्पनं युक्तमित्येवं पूर्वपक्षिणामाशयः। अपि तु जन्यद्रव्यं प्रति द्रव्योत्पत्तिकालिकोत्पत्तिकध्वंसाभावस्य हेतुत्वे तत्तद्घटनाशानन्तरं तदारम्भककपालाभ्यां घटान्तरोत्पत्तिरपि न सम्भवेत्, तादृशध्वंसाभावरूपकारणाभावात्। अतो नानया युक्त्या प्रागभावः साधयितुं शक्यते, किन्तु तत्र युक्त्यन्तरमेवाश्रयणीयम्। तथा हि—यैस्तन्तुभिर्यः पट आरभ्यते, तेष्वेव तन्तुषु पट उत्पद्यते, न तु स्वानधिकरणेषु तन्तुषु। तत्रेत्थं कार्यकारणभावः कल्पनीयः—तत्तत्पटोत्पत्तिं प्रति पटारम्भकतत्तन्तुसंयोगेन हेतुत्वम्। तथा च पटानारम्भकतन्तुषु न पटोत्पत्तिप्रसंगः।

एवं च सति पटारम्भकतन्तूनां बहुत्वात् तत्तन्तुसंयोगानां कारणत्वकल्पने गौरवं दुष्परिहरम्, किन्तु यदि पटप्रागभावस्य पटं प्रति कारणत्वं स्वीक्रियते, तदा

पटानारम्भकतन्तुषु तत्पटप्रागभावासत्त्वान् न तत्र पटोत्पत्तिप्रसंगः। तस्मात् कार्य-कारणभावलाघवानुरोधेन प्रागभावस्वीकार एव युक्तियुक्तः।

२१. ध्वंसाभावनिरूपणम्

अथ ध्वंसाभावो निरूप्यते। तत्र जन्याभावत्वं ध्वंसत्वमिति मुक्तावली। ननु जन्याभावस्यैव ध्वंसत्वकथनाद् ध्वंसं प्रति कश्चित् कार्यकारणभावो वाच्यः, स च कीदृशः? यदि प्रतियोगितासम्बन्धेन ध्वंसं तादात्म्येन भावत्वेन कारणत्वम्, तदा एतद्घटनाशकालीनघटसमवेतरूपादिनाशं प्रति स्वप्रतियोगित्वसम्बन्धेनैतद्घटसमवेत-त्वस्य कारणत्वं वाच्यम्। तथा च सति घटनाशप्रतियोगिसमवेतत्वस्य घटत्वेऽपि सत्त्वाद् घटत्वस्यापि विनाशापत्तिप्रसंगः। अतो विनाशित्वावच्छिन्नं प्रति जन्यभावत्वेन कारणत्वं वाच्यम्। घटत्वे तथाविधकारणत्वाभावाद् न तस्य विनाशप्रसंगः।

अत्रायमर्थः—प्रतियोगित्वसम्बन्धेन विनाशित्वावच्छिन्नं प्रति तादात्म्य-सम्बन्धेन जन्यभावत्वावच्छिन्नस्य कारणत्वं वाच्यम्। तत्र च भावतादात्म्यवति कालादिनित्यपदार्थप्रतियोगित्वसम्बन्धेन विनाशित्वरूपकार्यासत्त्वाद् उक्तकार्यकारण-भावस्यान्वयव्यभिचारवारणार्थं जन्येति पदम्। एवं तादात्म्येन जन्यत्वमात्रावच्छिन्नस्य कारणत्वे ध्वंसस्यापि विनाशापत्तिः स्यात्। अतो भावेति पदम्।

न च तथापि प्रतियोगित्वसम्बन्धेन विनाशित्ववति प्रागभावे तादात्म्येन जन्य-भावस्यासत्त्वाद् व्यतिरेकव्यभिचार इति वाच्यम्, समानाधिकरण्यसम्बन्धेन भावत्व-विशिष्टप्रतियोगिताया एव कार्यतावच्छेदकसंसर्गतया स्वीकारात्, प्रागभावे च सामा-नाधिकरण्यसम्बन्धेन भावत्वविशिष्टायाः प्रतियोगिताया असत्त्वान्न दोषः।

नन्वेतादृशकार्यकारणकल्पने किं नियामकम्? प्रतियोगित्वसम्बन्धेन नाशं प्रति तादात्म्येन सोत्पत्तिकत्वेन कारणत्वमित्येवं कार्यकारणभावकल्पने नित्यानामाकाश-कालादीनां विनाशो न भवति। प्रागभावस्य विनाशार्थं पुनः पृथगेव कार्यकारणभावः कल्पनीयः।

तथा च प्रतियोगितासम्बन्धेनाभावत्वावच्छिन्ननाशं प्रति स्वसामानाधिकरण्य-स्वाव्यवहितपूर्ववर्त्तित्वोभयसम्बन्धेन कार्यत्वेन हेतुत्वम्। तथा च प्रथमकार्यकारण-बलेन नित्यानां न विनाशभावापत्तिः, द्वितीयकार्यकारणभावबलेन च प्रागभावस्यापि विनाशः। अतो जन्यभावत्वेन हेतुत्वकल्पनं न युक्तम्, यतस्तत्र जन्यत्वस्य प्रागभाव-प्रतियोगित्वरूपतया भावत्वस्य चाभावभिन्नतया कारणताकुक्षौ तयोरन्तर्भावाद् गौरवमिति चेत्, तत्रोच्यते—एवं सति ध्वंसस्यापि विनाशापत्तिर्दुर्वारा।

२२. जन्यभावध्वंसयोः कार्यकारणभावनिरूपणम्

तथा चात्रानुमानम्—ध्वंसो विनाशी जन्यत्वात्, घटवत्, अपि तु प्रतियोगित्व-सम्बन्धेन विनाशित्वावच्छिन्नं प्रति तादात्म्येन जन्यभावत्वेन हेतुत्वकल्पने पूर्वोक्तानुमाने जन्यत्वावच्छिन्नविनाशित्वव्यापकं भावत्वमुपाधिः स्यात्। तथा हि कार्यकारणभावान्तर्गतविनाशित्वं नाम विनाश एव, यद्धर्मविशिष्टवाचकाद् भावविहितप्रत्ययः, स तदर्थमेवावगाहत इति नियमात्। अत्र च जन्यत्वावच्छिन्नभावत्वं नाम जन्यत्वविशिष्टविनाशित्वव्यापकभावत्वम्। वैशिष्ट्यं च सामानाधिकरण्यसम्बन्धेन। तथा च सामानाधिकरण्यसम्बन्धेन जन्यत्ववैशिष्ट्यं भाव एव वर्त्तमानत्वात् तथाविधं भावत्वं विनाशित्वव्यापकमिति भावत्वे साध्यव्यापकता। एवं विनाशे जन्यत्वसत्त्वेऽपि भावत्वासत्त्वाद् हेतोरव्यापकत्वं चेति भावत्वमुपाधिः। अत्र च भावत्वोपाधौ विनाशित्वव्यापकं कथमिति चेत्, उच्यते—अनुकूलतर्कवशात् तत्सिद्धिः। अत्रानुकूलतर्क एव पूर्वोक्तकार्यकारणभावः। तथा हि जन्यभावत्वं यदि विनाशित्वव्यापकं न स्यात्, तर्हि भावानां जन्यत्वं न स्यात्। प्रसिद्धं च जन्यभावानां जन्यत्वम्। अत एव नित्यानां न विनाशः। अतः पूर्वोक्तकार्यकारणं विना जन्यभावत्वस्य पूर्वोक्तानुमाने उपाधित्वं न सिध्यति। अतो ध्वंसो विनाशी जन्यत्वात्, घटवदित्याद्यनुमानस्य निराकरणार्थमेव प्रतियोगितासम्बन्धेन ध्वंसं प्रति तादात्म्येन जन्यभावत्वेन कारणत्वं वाच्यम्।

२३. ध्वंसाभावानङ्गीकर्त्तृमतं तत्परिहारश्च

एतत् पुनरिहावधेयम्—ध्वंसस्य जन्यत्वेऽपि तस्य विनाशो नास्तीति न्यायसिद्धान्तः। सांख्यादयः केचिदिह वदन्ति—मुद्गरादिप्रहारानन्तरं यद् घटप्रध्वंस इत्यभिधीयते, सोऽपि भावस्वभाव एव, यतो यस्य कपालस्य सत्त्वे यस्य घटस्य विनाशः, तस्मिन् कपाले तद्घटप्रध्वंस इति यो व्यवह्रियते, स तु मुद्गरप्रहारानन्तरक्षणवर्ती कपालक्षणपरिणाम एव, तथा च यद् मृद् द्रव्यं घटोत्पत्तेः पूर्वं कपालरूपेणावस्थितमासीत्, तस्यैव परिणामो घटः। एवं सति मुद्गरप्रहारान्तरमपि तस्यैव कपालस्य मृद्द्रव्यान्तरोत्तरोत्तरपरिणामः। यदि तु तस्य परिणामस्य तुच्छस्वभावत्वमेव स्यात्, तर्हि मुद्गरादिप्रहारवैयर्थ्यं स्यात्।

ननु घटप्रध्वंसस्य मृद्द्रव्यान्तरोत्तरपरिणामरूपत्वे कपालोत्तरक्षणेषु घटप्रध्वंसस्याभावाद् घटस्य पुनरुज्जीवनप्रसङ्गः, अभावस्याभावे प्रतियोगिसमाविर्भावनियमादिति चेत्, तत्रोच्यते वादिभिः—घटं प्रति कपालं कारणम्। यदा कारणरूपेणैव कपालस्यावस्थानम्, तदा कार्यस्य घटस्य तत्रावस्थानं न युज्यते। कारणस्य कपालस्य न घटरूपता। एवं मुद्गरप्रहारानन्तरमपि मृद्द्रव्यान्तरोत्तरपरिणामं प्रति घटस्य कारणत्वं सिद्धम्। न ह्यसति घटे मुद्गरप्रहारादिना तथाविधस्य मृद्द्रव्यान्तरस्य परिणामः

सम्भवति। अतः सर्वत्रैव कारणस्य कार्योपमर्दनात्मकत्वाभावाद्, न तदानीं मृद्द्रव्यान्तरोपमर्दनं सम्भवति। अतः तदानीं घटध्वंसाभावेऽपि मृद्द्रव्यान्तरमेवावतिष्ठते। कार्यस्यैव कारणोपमर्दनात्मकत्वधर्माधारतया प्रसिद्धत्वात्।

अपि च, न हि कदाचित् कुत्रापि पुरुषव्यापारेणाभावो जायते। तस्मात् पुरुषव्यापारेण घटध्वंसो जायत इति केवलमन्यप्रतारितेन भवता परः प्रतार्यते। तस्मादन्धपरम्परापरित्यागेन बलवत्पुरुषप्रेरितमुद्गरादिव्यापाराद् घटाकारावस्थाविगमनेन मृद्द्रव्यान्तरोत्पत्तिरभ्युपगन्तव्या। अतो ध्वंसाभावोऽप्रसिद्ध एवेति चेत्, अत्रोच्यते सिद्धान्तपक्षैः—किं परिणामपक्षमाश्रित्य सिद्धान्तोऽयं गृह्यते, पक्षान्तरस्वीकारेण वा ? न चाद्यः पक्षः कल्पः। परिणामो हि 'अवस्थितस्य द्रव्यस्य पूर्वधर्मनिवृत्तौ धर्मान्तरोत्पत्तिः परिणामः'[1] इति। अत उत्पत्तेः पूर्वं कार्यं सद् इत्यङ्गीकृत्यैव परिणामः किन्तूत्पत्तेः पूर्वं कार्यं सद् इत्येव न सिध्यति।

२४. सत्कार्यवादखण्डनेन परिणामवादनिराकरणम्

तथा हि पुरुषव्यापारात् पूर्वमपि यदि तन्तुषु पटः सन्नेव स्यात्, तर्ह्युपलब्धिकारणेषु सत्सु कथं स पटो नोपलभ्यते। न चानभिव्यक्तत्वादेव तदानीमनुपलब्धिरित्यपि वाच्यम्, अनभिव्यक्तेरेव निर्णेतुमशक्यत्वात्। तथा च केयमनभिव्यक्तिः ? यद्युपलब्धेरभावस्तर्हि प्रकारान्तरेणासत्कार्यवाद एव भवता अङ्गीकृतः, यतः सति वस्तुनि सत्सु कारणव्यापारेषूपलब्धिर्भवत्येव, अत उपलब्धिकारणेषु सत्स्वपि यत्र यस्य नोपलब्धिः, तत्र तस्याभाव एव स्वीकार्यः स्यात्। अतोऽनभिव्यक्तेरुपलब्ध्यभावरूपत्वे प्रकारान्तरेणाकामेनापि भवता असत्कार्यवाद एव अङ्गीकृतः।

अथ यद्युपलब्धियोग्यस्यार्थक्रियासाधनक्षमस्य वस्तुनो विरह एवानभिव्यक्तिरभिप्रेता स्यात्, तदानीमपि असत्कार्यवाद एव समापतेत्। किं बहुना, उत्पत्तेः पूर्वमपि सतः कार्यस्य पुरुषव्यापारेणाभिव्यक्तिर्भवद्भिरङ्गीकृता। अत्रेदं पृच्छ्यते—इयमभिव्यक्तिः पूर्वमसती सती वा ? यदि त्वभिव्यक्तिः पुरुषव्यापारात् पूर्वं स्वयमसती, पुरुषव्यापारेण सती स्यात्, तर्ह्यसत्कार्यवादः प्रतिज्ञासहस्रैरपि नान्यथयितुं शक्यते। अथ यदि सती स्यात्, तर्हि पुरुषव्यापारं विनापि कार्याभिव्यक्तेः सत्त्वात् सिद्धाया अभिव्यक्तेरापादनार्थं पुरुषव्यापारेणालम्, तस्मादुत्पत्तेः पूर्वं कार्यं सदित्येवापादयितुं न शक्यम्। तथा च सत्यवस्थितस्य द्रव्यस्य पूर्वधर्मनिवृत्तौ यः परिणामः स्वीकृतो भवद्भिः, तन् मृषैव स्यात्। न हि पुरुषव्यापारेणासतो धर्मिणः पूर्वधर्मनिवृत्तिः सम्भवेत्। अतः परिणामवाद एव दुर्युक्तियोगाद् वर्जनीयः।

---

१. योगसूत्रे-विभूतिपादे–सू० १३ व्यासभाष्यम्।

२५. कार्यकारणयोरभेदनिराकरणम्

अपि च परिणामपक्षे कार्यकारणयोरभेदो वादिभिः स्वीकृतः। तथा चोक्तं सांख्यकारिकायाम्--

असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्[1] ॥

किन्तु कार्यकारणयोरभेद एव न सिध्यति। उत्पत्तिभेदात् प्रतीतिभेदाद् निरोधभेदाद् आधाराधेयव्यवहारभेदात् प्रयोजनभेदाच्च।

तथा चानुमानम्—पटस्तन्तुभ्यो भिद्यते, तन्तूत्तरोत्पत्तिप्रतीतिविषयत्वात्, यो यदुत्तरोत्पत्तिप्रतीतिविषयः, स तद्भिन्नः, घटोत्तरोत्पत्तिप्रतीतिविषयपटवत्।

एवं तन्तुकालीनविनाशप्रतीतिविषयत्वात् पटस्तन्तुभ्यो भिद्यत एव। एवमन्यत्रापि बोध्यम्। कार्यकारणयोर्महति भेदे जागरूके तयोरभिन्नत्वव्यवस्था न कथमपि सम्भाव्यते।

२६. परिणामवादखण्डनोपसंहारः

किं बहुना, यत् कारणं तत् साकल्येन परिणमते ? अंशेन वा ? साकल्येन चेत्, तर्हि कार्यावस्थायां कारणस्योच्छेदात् कार्यकारणयोरत्यन्तभेद एव सिध्यति। तत्रापि परिणामो न घटते। अंशेन परिणामपक्षे तु घटावस्थायामप्यंशतो घटः, अंशतः कपाल इति प्रतीत्यापत्तिः। वस्तुतो नैवम्। अतः परिणामवादो निर्युक्तिक एव। एवं चासिद्धे परिणामे मुद्गरप्रहारेण मृद्द्रव्यान्तरोत्तरपरिणाम इति वृथैव कल्पना भवताम्। इह 'कपाले घटो विनष्टः' इति प्रतीतेः सर्वानुभवसिद्धतया तत्र घटध्वंसं विना कथमपि तत्प्रतीतेरसिद्धत्वाल्लोकप्रतीतिसिद्ध एव ध्वंसो न हि युक्तिशतेनापि प्रेक्षावत्प्रतीतिमतिक्रमितुं शक्नुयात्। अतः सिद्धो ध्वंसः।

२७. अत्यन्ताभावनिरूपणारम्भः

नित्यसंसर्गाभावत्वमित्यत्यन्ताभावलक्षणम्। यथा 'भूतले घटो नास्ति' इति भूतले यो घटाभावः, तस्योत्पत्तिविनाशयोरसत्त्वाद् नित्यत्वं स्वीकर्त्तव्यम्। ननु भूतले यदि घटाभावो नित्यः स्यात्, तर्हि घटवत्यपि भूतले घटाभावस्य सत्त्वेन घटवद्भूतलमिति प्रत्ययो न स्यात्, तत्सम्बन्धावच्छिन्नतत्प्रकारकबुद्धिं प्रति तत्सम्बन्धावच्छिन्नतद्धर्मावच्छिन्नप्रतियोगिताकाऽभावबुद्धेः प्रतिबन्धकत्वादिति चेत्, तत्रोच्यते—घटाभावस्य भूतलादौ नित्यत्वेऽपि तत्प्रत्यक्षोपयोगितासन्निकर्षासत्त्वे घटाभावप्रत्यक्षं न भवेत्।

---

१. सां० का०—९।

२८. अभावप्रत्यक्षं प्रति सन्निकर्षप्रतियोग्यारोपादीनां कारणत्वनिरूपणम्

न हि सन्निकर्षं विना विद्यमानस्यापि वस्तुनः प्रत्यक्षत्वं केनचिदपि इष्टम्। घटस्य विद्यमानत्वेऽपि चक्षुःसंयोगादिकं विना तत्प्रत्यक्षानुपपत्तेः। घटाभावप्रत्यक्षोपयोगी सन्निकर्षस्तु घटासमानकालीनतत्तद्भूतलादिकमेव। अतो घटविद्यमानदशायां सन्निकर्षाभावेन स्थितस्यापि घटाभावस्य प्रत्यक्षं न भवेत्। अपि तु संयोगसम्बन्धेन घटस्य चक्षुःसन्निकर्षसत्त्वाद् 'घटवद् भूतलम्' इति प्रत्यक्षं भवत्येव। अत एवाभावप्रत्यक्षं प्रति प्रतियोग्यारोपः कारणम्। तत्र प्रतियोग्यारोपत्वं नाम प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकत्वरूपमिति मुक्तावलीकृतामाशयः।

तत्रेदं तात्पर्यम्—तत्तदिन्द्रियजन्यतत्सम्बन्धावच्छिन्नतदभावलौकिकप्रत्यक्षं प्रति तदिन्द्रियजन्यानाहार्यतत्संसर्गकतत्प्रकारकोपलम्भाभावः कारणम्। अत एवेन्द्रियान्तरजन्य आनुमानिके च तदुपलम्भे सत्यपि तदभावप्रत्यक्षं सम्भवति। एवमाहार्यात्मकप्रतियोग्युपलम्भसत्त्वेऽपि अभावप्रत्यक्षादनाहार्यमिति पदं प्रदत्तम्। तथा चैकसंसर्गेण प्रतियोगिप्रकारकज्ञानसत्त्वेऽप्यन्यसंसर्गेणाभावप्रत्यक्षोपपत्त्या कार्यताकुक्षौ कारणताकुक्षौ च संसर्गनिवेशः कर्त्तव्यः। अत एव संयोगेन 'घटवति भूतले' समवायेन 'घटो नास्ति' इति प्रत्यक्षं भवत्येव। तत्र भूतले घटाभावो यद्यनित्य एव स्यात्, तर्हि संयोगेन 'घटवति भूतले' समवायेन घटाभावप्रत्यक्षं कथं सम्भवेत्?

२९. प्रतियोग्यारोपविषयकप्राचीननवीनमतप्रदर्शनम्

वस्तुतस्त्वभावप्रत्यक्षे प्रतियोग्यारोपः कारणमिति प्राचीनानामाशयः। यद्यत्र घटप्रकारकोपलम्भविषयः स्यादित्यादेरयमेवार्थो यद् भूतले यदि घटः स्यात्, तर्हि घटवत्तयोपलभ्येतेति आपत्तिकारणीभूतम् आपादकवत्ताज्ञानप्रदर्शनपरम्, न त्वापत्तिविषयाभिलापरूपम्। अत आपत्तेः कारणत्वेऽपि तस्या घटप्रकारकत्वेन प्रतियोग्यारोपस्य कारणत्वाप्रसक्तेस्तादृशापत्तियोग्यतैव तत्रापेक्षिता, न तु आपत्तिरपीति नव्यानामाशयः।

तथा च—संयोगसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रतियोगिताकाभावप्रत्यक्षं प्रति संयोगसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रकारतानिरूपिततदधिकरणनिष्ठविशेष्यताशाल्युपलम्भयोग्यताऽपेक्षिता। एतत्तु चतुर्थाध्याये योग्यतानिरूपणविचारे समालोचितम्।

३०. प्रतियोग्यादियोग्यत्वविचारः

अत्रायं निष्कर्षः—तदधिकरणनिष्ठलौकिकविषयतासम्बन्धेन तदभावप्रकारकप्रत्यक्षं प्रति तदधिकरणकतदापादकापत्तियोग्यतदुपलम्भस्यं विषयतासम्बन्धावच्छिन्नप्रतियोगिताकोऽभावः कारणम्। तदुपलम्भ इत्यस्य च यदभावप्रत्यक्षं जननीयं तत्प्रकारकोपलम्भ इत्यर्थः। तथा च यत्प्रतियोगिकाभावप्रत्यक्षं जननीयम्,

विषयतासम्बन्धावच्छिन्नतत्प्रतियोगिसत्त्वनिष्ठव्याप्तिनिरूपकत्वं तदधिकरणकतदापादकापत्तियोग्यत्वमुपलम्भे बोध्यम्। अत एव यत्र तदापादकापत्तिर्नोत्पन्ना, तत्र तदभावप्रत्यक्षानुपपत्तिवारणार्थं योग्यत्वनिवेशः कृतः।

तथा हि भूतलादौ चक्षुःसंयोगानन्तरमापादनं विनैव घटो नास्तीति प्रतीतेरनुभवसिद्धतया तत्र योग्यता निविष्टा।

३१. प्रतियोगियोग्यताविचारनिष्कर्षः

ननु घटादिसत्त्वेऽपि यत्र चक्षुःसंयोगाद्यभावे न घटोपलब्धिः, तत्रोपलम्भे प्रतियोगिसत्त्वव्यापकता न सिध्यतीति पूर्वोक्तकार्यकारणभावस्वीकारे उपलम्भे प्रतियोगिसत्त्वव्यापकत्वासिद्धौ तदधिकरणकतदापादकापत्तियोग्यत्वमुपलम्भनिष्ठं न सिध्यतीति न कुत्राप्यभावप्रत्यक्षं भवेदिति चेत्, तत्रोच्यते—निर्विशेषितस्य केवलं प्रतियोगिसत्त्वस्योपलम्भव्याप्यत्वं न विवक्षितम्, यतो घटादिसत्त्वेऽपि घटोपलम्भकसामग्र्यन्तरविरह उपलम्भो न सिध्यति; किन्तु महत्त्वोद्भूतरूपाद्यवच्छिन्नप्रतियोगिसत्त्वस्यैवोपलम्भव्याप्यत्वं विवक्षितम्। एवं च सति घटादिसत्त्वेऽपि चक्षुःसंयोगाद्यभावे केवलघटसत्त्वस्योपलम्भव्याप्यत्वाभावेऽपि न दोषः।

३२. प्रतियोगिप्रत्यक्षकारणानामपि अभावप्रत्यक्षहेतुत्वम्

अत इदमत्र पर्यवसितम्—प्रतियोगिनः प्रत्यक्षं प्रति यावन्ति कारणान्यपेक्ष्यन्ते, तावत्सु कारणेषु सत्स्वपि यदि तत्र प्रतियोगी नोपलभ्यते, तदैव प्रतियोग्यारोपस्तत्र सम्भवति। अतो यत्रालोकसंयोगादिकं वर्त्तते, तत्रैव यद्यत्र घटः स्यात् तर्हि घटवत्तयोपलभ्येतेति प्रतियोग्यारोपः सम्भवेत्। तत्रैव च घटाभावप्रत्यक्षं भवितुमर्हति। अत एवान्धकारादौ घटाभावस्य न चाक्षुषप्रत्यक्षम्। स्पार्शनप्रत्यक्षं तु तत्र भवत्येव।

इदमत्र बोध्यम्—यद्यभावप्रत्यक्षे योग्यानुपलम्भः कारणं स्यात्, तदा पिशाचाद्यभावप्रत्यक्षं भवितुं नार्हति। पिशाचस्य प्रत्यक्षायोग्यतया योग्यानुपलम्भासम्भवात्। अतः केवलं योग्यस्य प्रतियोगिनोऽभावप्रत्यक्षस्थल एव योग्यानुपलम्भः कारणम्। अयोग्यप्रतियोगिकाभावप्रत्यक्षस्थले तु प्रतियोगिनिष्ठस्तदधिकरणीयोपलम्भस्य विषयतासम्बन्धावच्छिन्नाभाव एव कारणम्।

तथा हि स्तम्भादौ अधिकरणे यदा पिशाचाभावः प्रत्यक्षो भवेत्, तदा स्तम्भनिष्ठलौकिकविशेष्यतानिरूपिताभावनिष्ठप्रकारतानिरूपितप्रतियोगित्वसम्बन्धावच्छिन्न-प्रकारतासम्बन्धेन पिशाचादीनामभावप्रत्यक्षम्। वस्तुतस्तु अयोग्यप्रतियोगिनोऽभावोऽपि न योग्यः। अत एव संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्यताऽपेक्ष्यते। अन्योन्याभावप्रत्यक्षे त्वधिकरणयोग्यताऽपेक्षिता। अतः स्तम्भादौ पिशाचभेदप्रत्यक्षं सम्भवति।

३३. प्रतियोग्युपलम्भनिरूपणे उपसंहारः

अथ पूर्वोक्तप्रकारेण सलक्षणमभावभेदनिरूपणानन्तरं तत्तल्लक्षणखण्डनद्वारेण प्रागभावादीनामसिद्धिमाशङ्कमानानां वादिनां मतं संक्षेपेणालोच्य समाधीयते। तत्र संसर्गान्योन्याभावभेदतोऽभावद्वैविध्यं प्रसिद्धमुक्तम्। तत्र च संसर्गाभावस्यापि पुनस्त्रैविध्यं न्यायसम्मतम्—प्रागभावः, ध्वंसाभावः, अत्यन्ताभावश्चेति। तत्र विनाश्यभावत्वं प्रागभावत्वमिति प्रागभावलक्षणं प्रसिद्धम्। तथा च विनाशित्वे सत्यभावत्वमित्यर्थः। अत्र ध्वंसेऽतिव्याप्तिवारणार्थं विनाशित्वे सतीति विशेषणम्। घटादावतिव्याप्तिवारणायाभावत्वम्।

३४. वैदान्तिकादिभिः पूर्वपक्षिभिः प्रागभावलक्षणस्यासिद्धयाशङ्का

अत्रेदं विचार्यते—विनाशिशब्देन कोऽर्थो गृह्येत ? विनाशोऽस्यास्यीति व्युत्पत्त्या यदि विनाशः शब्दः परिनिष्पद्येत, तर्हि 'घटो विनष्टः' इत्यादिप्रतीतिबलाद् उत्पत्तिमदभावत्वमेव विनाशिशब्दार्थः स्यात्। किमेष एवार्थो ग्राह्यः ? आहोस्विदभाववत्त्वमेव विनाशिशब्दार्थः ? अन्त्ये ध्वंसादावतिव्याप्तिः। अत्यन्ताभावो न ध्वंस इति प्रतीत्या ध्वंसान्योन्याभावस्यापि प्रसिद्धतया ध्वंसस्यापि भेदप्रतियोगित्वेनाभाववत्वं तत्र वर्त्तते। अतोऽतिव्याप्तिः।

अथ यदि प्रथमः कल्पः स्यात्, तदोत्पत्तिमान् अभावो यस्य वर्त्तते, स एव विनाशिशब्दार्थः स्यात्। तथा च सति असम्भवो दोषः। तथा हि घटप्रागभावस्य निवृत्तिर्यदि घटातिरिक्तः कश्चिदभावः प्रसिद्धो भवेत्, तदेव प्रागभाव उत्पत्तिमदभाववान् स्यात्।

३५. प्रागभावनिवृत्तिर्भावान्नातिरिच्यत इति पूर्वपक्षिमतप्रदर्शनम्

वस्तुतस्तु घटातिरिक्तो घटप्रागभावनिवृत्तिर्नैव लभ्यते। तथा हि घटातिरिक्तस्य घटप्रागभावध्वंसस्य केन प्रमाणेन सिद्धिः ? न हि प्रत्यक्षेण घटातिरिक्तघटप्रागभावनिवृत्तिरुपलभ्यते, यतोऽभावाभावो न भावातिरिक्तः। तथा हि—न खल्वभावाभावो नाम कश्चिदन्यो भावात्। नापि भावाभावोऽन्योऽभावात्। एवं कुमारिलभट्टपादैरपि श्लोकवार्त्तिके उक्तम्—'अपोह्यमाने चाभावे भाव एवावशिष्यते'[1] इति। तस्मात् प्रत्यक्षेण प्रमाणेन घटप्रागभावाभावो घटादन्यः कश्चिन्न सिध्यति। तथा च सति पूर्वोक्तलक्षणेऽसम्भवदोषः।

अथ यदि युक्तिबलात् प्रागभागाभावः साधयितुमिष्येत, साऽपि युक्तिर्न गरीयसी। तथा हि यद्येवं मन्यते घटादेरुत्पत्तिबलादेव घटप्रागभावः सिध्यति, यतो

---

१. श्लो० वा० अपोहप्रकरणे।

घटप्रागभावानिवृत्तेर्घटादेर्जन्मासम्भवात् प्रागभावनिवृत्तिः स्वीकर्त्तव्या। सा च निवृत्तिर्घटातिरिक्तैव।

अत्रायमाशयः—किं प्रागभावे निवृत्ते सति घट उत्पद्यते? आहोस्विद् अनिवृत्त एव प्रागभावे? न तावदन्त्यः कल्पः सङ्गच्छते—घटविरोधिनः प्रागभावस्यानिवृत्तौ तद्विद्यमानतादशायां घटोत्पत्तेरसम्भवात्। न हि विरोधिनि सति विरुद्धोत्पत्तिः संगच्छते। तस्मात् प्रागभावनिवृत्तावेव घटोत्पत्तिः स्वीकर्त्तव्या। एवं च सति घटोत्पत्तेः पूर्वं विद्यमाना काचन प्रागभावनिवृत्तिरभावस्वरूपिणी स्वीकर्त्तव्या। अतो न लक्षणस्यासम्भवदोषः। तस्मात् स्वीकर्त्तव्यं यदभावनिवृत्तौ घट उत्पद्यते, अनिवृत्तौ च यस्याभावस्य घटो नोत्पद्यते, स भावभिन्नः प्रागभावाख्यः कश्चिदभावो वर्त्तत एव।

न चैवम्—'अपोह्यमाने चाभावे·····' इति श्लोकवार्त्तिकवचनविरोधः, तद्वाक्यस्यैवम्भूतार्थपरत्वात्। तथा हि 'अपोह्यमाने' प्रागभावस्य निवृत्तौ सत्यां तस्याभावस्य प्रतियोगी एवावशिष्यते। अन्यथा यद्यभावापह्नवशब्देन भाव एव गृह्येत, तर्हि प्रागभावकाले ध्वंसापह्नवात् तथा ध्वंसकाले च प्रागभावापह्नवात् प्रतियोगिनः सर्वदैव सत्त्वप्रसंगः[1]। तस्मात् प्रागभावः स्वीकर्त्तव्य एवेत्येवं प्रागभावमङ्गीकुर्वन्तं प्रति प्रत्युच्यते वैदान्तिकैः—प्रागभावस्यानिवृत्तो कार्यानुत्पत्तेः प्रागभावसिद्धिमिच्छतां मते यत् प्रागभावलक्षणं कृतम्, तन्न संगच्छते, आत्माश्रयदोषप्रसंगात्।

३६. प्रागभावलक्षणसम्भावनाविषये पूर्वपक्षिणामाशंकां प्रति सिद्धान्तिनां प्रत्याशंका, तत्र वैदान्तिकैर्दत्तोत्तरम्

तथा हि विनाश्यभावत्वं प्रागभावत्वमिति त्वभिमतलक्षणान्तर्गतविनाशपदार्थप्रतिपादनावसर एवमुक्तं यत् प्रागभावस्यानिवृत्तौ कार्यं नोत्पद्यत इति नियमात् प्रागभावस्य ध्वंसः कार्योत्पत्तौ हेतुरिति। स च ध्वंसो भावकार्यातिरिक्तः। तत्र ध्वंसस्यापि कार्यतया तत्रापि पूर्वं ध्वंसस्य प्रागभावनिवृत्तिः कल्पनीया। एवं च सति प्रागभावलक्षणान्तर्गतविनाशस्यापि प्रागभावापेक्षिततयाऽऽत्माश्रयो दुर्वारः। एवं तत्र तत्र निवृत्त्यन्तराभ्युपगमे अनवस्थापातः। तस्माद् घट एव स्वप्रागभावनिवृत्तिरिति कल्पनालाघवात् स्वीकर्तव्यम्। तथा च विनाशित्वस्य भावतया पर्यवसानात् तस्याभावत्वासम्भवेनैवासम्भवो दोषो वज्रायते।

---

१. 'न च वार्त्तिकवचनविरोधः। निवृत्त्या प्रागभावे अपोह्यमाने तत्प्रतियोगी घटादिरवशिष्यत एवेति अयोगव्यवच्छेदपरत्वात्। अन्यथाऽभावापह्नवमात्रेण भावशेषे प्रागभावसमये प्रध्वंसस्याऽसम्भवात् प्रध्वंससमये च प्रागभावस्याभावाद् भावावशेषः प्रसज्येत' इति। (तत्त्वप्रदीपिकायां द्वितीयपरिच्छेदे–पृ० ४४२)।

३७. ध्वंसस्यापि विनाशित्वसाधने पूर्वपक्षिणां युक्तिः

एवं ध्वंसस्य यदनिवृत्तिः परैरिष्यते, तदपि न युक्तम्, यतो ध्वंसस्य विनाशे प्रतियोगिनः पुनराविर्भावप्रसंग इति दोषस्तैः प्रदर्शितः। स च न सम्यक्, यतः प्रध्वंसस्य ध्वंसोऽपि ध्वंस एव स्यात्, ध्वंसत्वस्य तत्रानपायात्। तथा चोक्तम्—'न च ध्वस्तस्योन्मज्जनापत्तिः, प्रध्वंसवदेव तत्प्रध्वंसमालाया अपि प्रध्वस्तभावविरोधित्वात्'[1]।

एवं च सति ध्वंसस्यापि विनाशित्वसिद्धौ विनाशित्वे सत्यभावत्वमिति प्रागभावलक्षणं ध्वंसेऽतिव्याप्तम्। यदि तु ध्वंसस्य विनाशे ध्वंसविरोधिनस्तत्प्रतियोगिपदार्थस्य पुनराविर्भावप्रसंग इष्येत, तर्हि घटप्रागभावविरोधिनो घटस्य नाशादूर्ध्वं पुनरपि घटप्रागभावाविर्भावो भवेत्?

३८. प्रागभावलक्षणे पूर्वपक्षिणामाशङ्कानुवृत्तिः

अथ यद्येवं मन्यसे यत्र कथमपि न विरुद्धधर्मसंसर्गः सम्भवति, तत्र यदि प्रत्यभिज्ञाबाधः स्यात्, तर्हि तथाविधकल्पना नैव युक्ता। प्रागभावस्योत्पत्तिं ध्वंसस्य च विनाशमिच्छतः प्रत्यभिज्ञाबाधः कल्पनागौरवं च स्यात्। तथा हि प्रागभावस्योत्पत्तिमत्त्वं ध्वंसस्य च विनाशित्वं वेदान्तिकमतेऽनुमानसिद्धम्।

तथा चात्रानुमानम्—(१) प्रागभाव उत्पत्तिमान्, विनाशित्वात्, घटादिवत्, (२) ध्वंसो विनाशी, कृतकत्वात्, घटादिवत्, इत्यनुमानाभ्यां वेदान्तमते प्रागभावध्वंसयोरुत्पत्तिविनाशौ साधनीयौ। तच्च प्रत्यभिज्ञाविरुद्धम्। तथा हि प्रागभावस्य नाशानन्तरं जायमानस्य तत्प्रतियोगिनो घटस्य विनाशेऽयं प्रागभावो घटस्येति न कदाचित् प्रत्यभिज्ञा जायते। एवं ध्वंसेऽपि बोध्यम्।

तथा हि मुद्गराद्यभिघातेन प्रस्तरे चूर्णतामुपगते ध्वस्तः प्रस्तर इति अबाधितप्रत्ययात् तत्र प्रस्तरध्वंसः स्वीकर्त्तव्यः। जायते च पुनस्तत्र प्रस्तरमिति भावग्राही प्रत्ययः। न तु ध्वंसस्य ध्वंस इति प्रत्ययः कदाचिदपि। तस्मात् प्रत्यक्षबाधाद् न ध्वंसस्यापि ध्वंसः स्वीकर्त्तव्यः। तथा ह्यसम्भवद्विरुद्धधर्मासंसर्गप्रत्यभिज्ञानबाधितत्वात् कल्पनालाघवाच्च न प्रागभावप्रध्वंसयोरुत्पत्तिविनाशौ।

३९. तत्र सिद्धान्तिकृतसमाधानं प्रति वैदान्तिकानां पुनः दोषोद्भावनम्

तथा चोक्तं न्यायलीलावत्याम्—'असम्भवद्विरुद्धधर्मासंसर्गप्रत्यभिज्ञानप्रतिक्षिप्तत्वादनुमानानां लाघवाच्च'[2] इति। अतो वैदान्तिकमतं नोपपद्यत इति चेत्,

---

१. तत्त्वप्रदीपिकायाम्—द्वितीयपरिच्छेदे, पृ०-४०३।

२. न्यायलीलावत्याम्—पृ० ५७२।

तत्र प्रत्युच्यते वैदान्तिकैः—घटध्वंसकाले क्रमशोऽवस्थान्तरेण पर्यवसितानां कपालकपालिकाचूर्णरजःकणानां परस्परविरुद्धधर्मसंसर्गः सम्भवत्येव। तेषु कपालादिरजःकणेषु विरुद्धधर्मस्य प्रसिद्धतया तत्र न्यायाभिमतप्रत्यभिज्ञाया असिद्धेर्न पूर्वोक्तनियमो युज्यते। तथा हि घटध्वंसः कपालरूपम्, कपालध्वंसः कपालिकारूपम्, एवं कपालिकाध्वंसश्चूर्णरूपमित्यनुभूयते। अतः कपालकपालिकाचूर्णादिषु न ह्येक एव ध्वंसो विद्यते, अपि तु पूर्वपूर्वस्य ध्वंसः परपरध्वंसस्योत्पादक इति ध्वंसनानात्वं तत्र प्रसिद्धम्। अतः प्रत्यक्षबलाद् ध्वंसस्य नानात्वे सिद्धे तत्र कल्पनालाघवप्रयासो निर्युक्तिकः। तथा हि पौराणिकैरभिहितम्—

महीं घटत्वं घटतः कपालिकाः।
कपालिकाचूर्णरजः ततोऽणुः[1]॥

तस्माद् विनाशित्वे भावत्वमिति लक्षणं ध्वंसे अतिव्याप्तम्।

४०. प्रसङ्गक्रमेण ध्वंसाभावलक्षणस्याप्ययुक्तत्वप्रदर्शनम्

तथा जन्याभावत्वं ध्वंसत्वमित्यप्यलक्षणम्, वेदान्तमते पिण्डादेः प्रागभावत्वेन स्वीकारात् तस्योत्पत्तिमत्वेन तत्रापि ध्वंसलक्षणातिव्याप्तेः। तथा हि—'उत्पत्तिमान् अभावो ध्वंस इत्यलक्षणम्, पिण्डादेः घटप्रागभावत्वेनास्मदभिमतस्योत्पत्तिमत्त्वाद् तदतिरिक्तस्य चानुपलब्धेः[2]' इति।

एवं प्राप्ते तत्र नैयायिकैः प्रत्युच्यते—असत्कार्यवादिनां[3] नैयायिकानां मते उत्पत्तेः प्राक् कार्यस्यासत्त्वं सिद्धमेव। अतः सामग्रीसम्बलनपूर्वं समवायिकारणे कपालादौ कार्यस्य घटादेः कश्चिदभावः सिद्ध एव। स चाभावो घटात्यन्ताभावा-

---

१. तत्त्वप्रदीपिकायाम्—पृ० ४४३-४४४।

२. तदेव – पृ० ४४८।

३. पादटीकायाम्—असत्कार्यवादस्तु ग्रन्थविस्तरभयान्नेह प्रपञ्च्यते। संक्षेपतस्तु इदमत्र ज्ञातव्यम् – कार्यकारणयोरत्यन्तभेद एव युक्तिसिद्धः। तथा हि पटस्तन्तुभ्यो भिद्यते तन्तूत्तरोत्पत्तिप्रतीतिविषयत्वात्। यो यदुत्तरोत्पत्तिप्रतीतिविषयः, स तद्भिन्नः, घटोत्तरोत्पत्तिप्रतीतिविषयपटविशेषवत्। एवं पटस्तन्तुभ्यो भिद्यते—तन्तुकालीनध्वंसप्रतीतिविषयत्वात्, यो यत्कालीनध्वंसप्रतीतिविषयः, स तद्भिन्नः, घटकालीनध्वंसप्रतीतिविषयः, 'स' तद्भिन्नः, घटकालीनध्वंसप्रतीतिविषयपटविशेषवत्। एवं पटस्तन्तुभ्यो भिद्यते तन्त्वधिकरणकत्वप्रतीतिविषयत्वात्, यो यदधिकरणकत्वप्रतीतिविषयः, 'स' तद्भिन्नः, भूतलाधिकरणकत्वप्रतीतिविषयघटवत्। एवं पटस्तन्तुभ्यो भिद्यते—तन्तुसम्बन्धियत्किञ्चिदर्थक्रियाभिन्नार्थक्रियावत्त्वात्, यो यत्सम्बन्धियत्किञ्चिदर्थक्रियाभिन्नार्थक्रियावान्, स तद्भिन्नः, घटार्थक्रियाभिन्नार्थक्रियायुक्तपटवत्।

द्वतिरिच्यते, यतः प्रागभावः समवायिकारणं विहाय नान्यत्र प्रतीयते। न च समवायिकारण एव कार्यप्रागभावः, नान्यत्रेत्यत्र किं प्रमाणमित्यपि वाच्यम्। अनुभव एवात्र प्रमाणम्। यत्र च कार्यं समवायसम्बन्धेनोत्पद्यते, तत्रैव कार्योत्पत्तेः पूर्वं 'अत्र एतद् भविष्यति' इति सर्वेषां व्यवहारो जायते। न हि वृक्षादौ घटो भविष्यतीति व्यवहारः, अपि तु कपाल एव तद्व्यवहारः। तस्माल्लोकप्रत्ययबलात् समवायिकारण एव प्रागभाव इति नियमः।

४१. पूर्वपक्षखण्डनद्वारेण सिद्धान्तिनां प्रागभावलक्षणसमर्थनम्

एतत् पुनरिहावधेयम्—अभावत्वेन रूपेण सर्वेषामभावानां तुल्यत्वेऽपि व्यवहारानुकूलप्रत्ययभेदादेवाभावभेदः सिध्यति। यत्रेदम् इदं नेति व्यवहारः, तत्र अन्योन्याभावः, यत्र चेदमिह नास्तीति व्यवहारः, तत्रात्यन्ताभावः, यत्र चेदमिह भविष्यतीति व्यवहारः, तत्र प्रागभावः, यत्र चेदमिह नष्टमिति व्यवहारः, तत्र ध्वंसाभाव इत्यनुभवसाक्षिकतयाऽभावभेदो न्यायविद्भिरङ्गीकृतः। तस्माद् 'इह कपाले घटो भविष्यति' इति व्यवहारस्यान्यविधाभावव्यवहारवैलक्षण्यात् कश्चिद् विलक्षणोऽयमभाव इत्यवश्यमङ्गीकर्त्तव्यम्। अत उत्पत्तेः पूर्वमिदमिह भविष्यतीति प्रतीतिसिद्धिः। तथा घटोत्पत्तेरनन्तरं तादृशव्यवहाराभावाद् योऽभावः सिध्यति, स प्रागभाव इति स्वीकर्त्तव्यम्।

यच्चोक्तं पिण्डादेरेव घटप्रागभावरूपत्वम्, तन्न सुचारु। तत्राभावत्वावच्छिन्नप्रतीतेरनुदयात्। तथा हि मृत्पिण्डं पश्यतो जनस्य तत्र मृद्विकारजातं भविष्यतीति प्रतीतिसम्भवेऽपि विकारसामान्यप्रागभावः स्वीक्रियते न वा? नाङ्गीक्रियते चेत् केवलं पिण्डस्यैवोपलब्धिस्तत्र स्वीकर्त्तव्या। अतः पिण्डोऽस्तीति प्रत्ययाद् विकारो भविष्यतीति प्रत्ययस्य को विशेषः? न हि अबाधितमनुभवं शपथशतैरप्यपलपितुं शक्नुयात्। न च तत्र पिण्डस्य भावांशेनैवेन्द्रियस्य सम्बन्धः, न त्वभावांशेनापि। अतः प्रत्यक्षबलात् तत्र पिण्डातिरिक्तः प्रागभावो नैव सिध्येदित्यपि वाच्यम्, इन्द्रियसन्निकर्षादुपलभ्यमाने भूतले 'अघटं भूतलम्' इति ज्ञानस्य सर्वसिद्धतया तत्र भूतलस्येवाभावस्यापि प्रत्यक्षता कथं नेष्यते?

भावपदार्थेष्विन्द्रियप्रत्यक्षोपयोगिसम्बन्धसामर्थ्यमुपपत्तिबलादेव स्वीकर्त्तव्यम्, न तु निर्युक्तिकम्। सर्वत्र तु फलेनैव कारणस्य कार्योत्पादनयोग्यता प्रतिष्ठिता भवेत्। अतो भावेनान्वयव्यतिरेकानुविधायित्वादिन्द्रियसम्बन्धयोग्यता यथा स्वीकर्त्तव्या, तथैवाबाधितप्रत्ययवशाद्भावस्यापीन्द्रियग्रहणयोग्यत्वं स्वीकर्त्तव्यम्।

अतो यथा पिण्डस्य भावत्वेनावगाही 'अयं पिण्डः' इति प्रत्ययो जायते, तथैवात्र 'विकारो भविष्यति' इत्यबाधितप्रत्ययबलात् तत्र पिण्डास्तित्वातिरिक्त-

किञ्चित्पदार्थावलम्बनप्रत्ययः स्वीकर्त्तव्यः। प्रत्ययावलम्बनीभूतं तत् पिण्डातिरिक्तं तदानीमनुत्पन्नानां विकाराणामभावाख्यं किञ्चित् स्वीकर्त्तव्यम्। अतः कार्यदर्शनादेव पिण्डादौ तदतिरिक्तविकाराभाव उत्पत्तेः प्राक् स्वीकर्त्तव्यः।

वस्तुतस्तु जन्यानां भवानां कादाचित्कत्वेनोत्पत्तेः पूर्वमभावः स्वीकर्त्तव्य एव। अन्यथोत्पत्तेः पूर्वमपि जन्यानामभावानङ्गीकारे सदातनत्वेन तेषां कादाचित्कत्वमनुपपन्नं भवेत्। तच्च सर्वलोकविरुद्धम्। अत उत्पत्तेः पूर्वं जन्यानामभावो वर्त्तत एव। स चाभावो जन्यानामुत्पत्त्यनन्तरं देशान्तरे वस्त्वन्तरे वा प्रतीयमानेभ्यस्तदभावेभ्यो विलक्षणः। अत एव घटोत्पत्त्यनन्तरमपि घटानधिकरणे 'घटो नास्ति' तथा 'पटादौ घटो न' इति व्यवहारसत्त्वेऽपि 'तद्घटो भविष्यति' इति व्यवहारो न भवेत्। तस्मादकामेनापि घटोत्पत्तेः पूर्वं घटसमवायिकारणे 'घटो भविष्यति' इति प्रतीत्याऽनुभूयमानः कश्चिद् घटाभावविशेषः स्वीकर्त्तव्यः। स च प्रागभावः।

४२. प्रागभावस्योत्पत्तिमत्त्वनिरसनम्

एवं च सति प्रागभावसिद्धौ तस्योत्पत्तिमत्त्वमस्ति नास्ति वेति विचारणीयम्। दृश्यते च पुनरनादिकालादारभ्यायं प्रागभावो वर्त्तत एव, यतो जन्यत्वं नाम प्रागभावप्रतियोगित्वम्, नान्यत्। अतः प्रागभावो यदि जायेत, तर्हि प्रागभावस्यापि प्रागभावप्रतियोगित्वं स्वीकर्त्तव्यम्। तच्चानिष्टम्, अनवस्थाभयात्। अतः प्रागभावस्य प्रागभावप्रतियोगित्वासम्भवात् प्रागभावो न जायते। यच्चोक्तं प्रागभाव उत्पत्तिमान्, विनाशित्वात्, घटादिवदिति, तद् ध्वंसेऽनैकान्तिकम्। ध्वंसस्य कृतकत्वहेतुना विनाशित्वमिति वाच्यम्, अत्र हेतोः सोपाधिकत्वाद् व्यभिचारात्।

४३. ध्वंसप्रागभावनिर्द्धारणोपसंहारः

तथा च सावयवत्वमुपाधिः। दृश्यते च आ परमाणुपर्यन्तं विनाशिनां द्रव्याणां सावयवत्वमिति साध्यव्यापकता। कृतकत्वं च ध्वंसेऽस्ति, तत्र सावयवत्वं नास्तीति हेतोरव्यापकत्वं च। तस्मात् कृतकत्वेन हेतुना ध्वंसस्य विनाशित्वं नैव सिध्येत्। एवं च सति ध्वंसस्याविनाशित्वे सिद्धे तत्र जन्यत्वस्य सत्त्वेन विनाशित्वस्याभावाद् विनाशित्वहेतुना प्रागभावस्य जन्यत्वं नैव सिध्यति। एवं च सति विनाश्यभावत्वं 'प्रागभावत्वम्' जन्याभावत्वं च ध्वंसत्वमिति लक्षणं कथमपि दूषयितुं न शक्यते।

एवं प्रागभावध्वंसाभावयोः प्रतिवादिमतनिरसनेन सिद्धौ तदनन्तरं प्रतिवादिभिराक्षिप्यमाणस्यान्योन्याभावस्य परीक्षणं क्रियते। तथाहि—तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वमन्योन्याभावत्वमिति न्यायसिद्धान्तमाश्रित्याप्येवमाक्षेपः क्रियते प्रतिवादिभिः—'घटे पटान्योन्याभावः', 'घटः पटो न' इत्याकारकः पटतादात्म्यप्रतियोगिकघटानुयोगिकोऽभाव इत्यनेन घटपटयोस्तादात्म्यप्रतिषेधः प्रतीयते। स च तदेव

सङ्गच्छते यदि घटपटयोस्तादात्म्यं प्रसिद्धं स्यात्। तथा हि घटपटयोर्न तादात्म्यमित्यनेनाकारेणाभावेनैव घटे पटान्योन्याभावः सिध्यति। तथा च घटपटतादात्म्यप्रतियोगिकोऽभाव एव घटे पटान्योन्याभाव इति फलितम्[1]। तत्र च प्रतियोग्यप्रसिद्ध्या नान्योन्याभावः सिध्यति, अप्रसिद्धप्रतियोगिकस्याभावस्यासम्भवात्।

ननु प्रमिते घटे प्रमितस्य पटत्वस्य प्रतिषेध एव पटान्योन्याभावविषयतया नाप्रसिद्धप्रतियोगिकत्वमन्योन्याभावस्येति चेत्, तत्रोच्यते प्रतिवादिभिः—'भूतले घटो नास्ति' इति सप्तम्यन्तानुयोगिकाभाववद् घटे पटत्वप्रतियोगिकाभावस्याप्यत्यन्ताभावेनैव चरितार्थतया तत्राभावान्तरकल्पने प्रमाणाभावः। अथ यदि प्रतियोग्यवृत्तिर्नित्योऽभावोऽन्योन्याभाव इत्युच्येत, तदा प्रथमविशेषणेनात्यन्ताभावव्यावृत्तावपि तत्र विकल्पासहत्वान्नेदं लक्षणं सङ्गच्छते।

४४. अन्योन्याभावनिरूपणावसरे प्रतियोगिपदार्थनिरूपणे पूर्वपक्षः

तथा हि—कस्तावत् प्रतियोगिशब्दार्थः? यद्यन्योन्याभावभिन्न एवात्र प्रतियोगिशब्दार्थः, तर्ह्यन्योन्याभावाधिकरणस्याप्यन्योन्याभावभिन्नतया तस्यापि प्रतियोगिशब्देन ग्रहणं सम्भाव्यते। तथा च सति 'भूतलं न घटः' इत्यत्र भूतलस्यापि घटान्योन्याभावप्रतियोगित्वात् प्रतियोग्यवृत्तिरिति विशेषणं लक्षणस्यासम्भाव्यतां समानयति। यदि तावदभावस्य निरूपक एव प्रतियोगिपदार्थः, तदा भूतलनिष्ठघटभेदस्य निरूकत्वं[2] भूतलेऽपि वर्त्तत इति तत्रापि पूर्वदोषतादवस्थ्यम्।

न च धर्मिव्यतिरिक्तनिरूपकावृत्तित्वं विवक्षणीयमित्यपि वाच्यम्, धर्मिणोऽपि धर्मान्तरादन्यत्वेन तत्राप्यसम्भवदोष एव स्यात्। अथ धर्मित्वानधिकरणे अवृत्तिरेवात्र विवक्षितेति यदि मन्यसे, तत्रापि न निस्तारः। निर्धर्मिकस्य वस्तुनोऽसम्भवेन प्रतियोगिनोऽपि धर्मित्वात् प्रतियोग्यवृत्तिरित्यस्याप्रसिद्धेः। अथ यद्यभावविरोधित्वमेव तत्प्रतियोगित्वमित्युच्येत, तदापि न निस्तारः, यतो विरोधस्य विशेषविषयनियन्त्रितया सर्वस्यैव वस्तुनः स्वभावविरोधित्वेन प्रतियोगिरूपत्वात् तत्रापि प्रतियोग्यनिष्ठ इति विशेषणं न सङ्गच्छते। यदि स्वप्रतियोग्यवृत्तिकत्वमेवोपादीयते, तदाऽऽत्माश्रयदोषः। अतः कथमप्यन्योन्याभावलक्षणं न सिध्यति।

---

१. पूर्वपक्षिभिरत्र तादात्म्यस्य प्रतियोगिविधया ग्रहणं कृतम्, न तु प्रतियोगितावच्छेदकसम्बन्धविधयेति विभावनीयम्।

२. निरूपकत्वं नाम निर्धारकत्वम्। तथा चाभावस्यानुयोगिसापेक्षतयाऽनुयोग्यप्यभावनिरूपको भवेत्। तथा च घटप्रतियोगिकभूतलानुयोगिकभेदस्य भूतलसापेक्षतया भूतलेऽपि घटभेदनिरूपकत्वं वर्त्तत इत्याशयः।

४५. 'घटो न पटः' इति प्रत्ययबलाद् अन्योन्याभावसिद्धिरिति नैयायिकपक्षखण्डनम्

अथ यदि मन्यसे 'घटो न पटः' इत्यत्र घटे प्रतीयमानो यः पटभेदः, स तु न संसर्गाभावः, संसर्गाभावस्य सप्तम्यन्तानुयोगिकत्वनियमात्। अतो विलक्षणप्रत्यय-साध्योऽभाव एवान्योन्याभाव इति चेत्, तत्रेदमुच्यते, तदापि घटे धर्मिणि प्रतीय-मानपटभेदो व्यवस्थापयितुं न शक्यते। तथा हि घटे धर्मिणि प्रतीयमानः पटभेदो घटधर्मतयैव प्रत्येतुं योग्यः। स च प्रत्ययो न सम्भवति, यतो घटपटभेदयोर्विशेष्य-विशेषणभावेनैव प्रत्ययौचित्यात् तत्र पटभेदस्य च घटे विशेषणत्वाऽयोगान्नैतादृशोऽभावः सिध्यति, यतोऽभावग्राहकं च कारणं नैकं भवेत्। अतो विशेषणीभूतस्याभावस्य, विशेष्यीभूतस्य घटस्य च भिन्नकारणग्राह्यतया युगपद्ग्रहणायोग्यत्वम्।

तथा चोक्तं तत्त्वप्रदीपिकायाम्—

युगपद्ग्रहणायोगादनवस्थाप्रसङ्गतः।
परस्पराश्रयत्वाच्च धर्मभेदेऽपि नाक्षधीः[1]॥ इति।

भावयोरेव हि दण्डदेवदत्तयोस्तुल्योपलम्भयोग्यत्वेन युगपद्ग्रहणं सम्भवति। भावाभावयोः सुतरां तुल्योपलम्भयोग्यत्वासम्भवाद् युगपद्ग्रहणं न युज्यते; अपि तु घटे तदितरभेदानामानन्त्याद् अनन्तभेदविशिष्टस्य घटस्य ग्रहणमेव सुदूरपराहतम्, यतोऽ-भावज्ञानस्य प्रतियोगिज्ञानसापेक्षतयाऽभावविशिष्टस्य घटस्य ग्रहणे विशेषणीभूताभाव-ग्रहणार्थं तत्तदभावप्रतियोगिज्ञानमावश्यकम्, तच्च न सम्भवति।

४६. भेदस्यानुयोगिविशेषणत्वासम्भवप्रदर्शनम्

एवं यदि घटस्य धर्मः पटभेदो घटादतिरिक्तस्तर्हि घटेन सह पटभेदस्यापि भेदः स्वीकर्त्तव्यः। एवं सोऽपि भेदः पटभेदादतिरिक्त इति तद्भेदस्यानुयोगितया स्वीकर्त्तव्यो यो पटभेदः, तेनापि तद्धर्मभूतस्य घटप्रतियोगिकपटभेदानुयोगिकभेदस्या-तिरिक्तत्वं स्वीकर्त्तव्यमिति तत्राप्यन्यो भेदः स्वीकर्त्तव्य इत्येवमनवस्था। अतः पट-भेदस्य तद्भेदानुयोगिघटातिरिक्तत्वं दुर्वचम्।

अथ यदि पटभेदो घटस्वरूप एव, न तु घटातिरिक्त इति मन्यसे, तदापि न निस्तारः। तथा हि भेदस्य प्रतियोगिसापेक्षतया वस्तुनश्चातथात्वान्न भेदस्यानुयोगि-वस्तुस्वरूपता युज्यते। तथा हि यदि घटपटभेदयोरनतिरिक्तत्वमिष्येत, तर्हि घटप्रत्यक्षं पटभेदग्राहकसामग्र्यधीनमिति तत्सामग्र्यन्तर्गतस्य पटादेरपि तत्प्रत्यक्षे कारणत्वं वाच्यम्। एवं च सति घटे धर्मिणि प्रतीयमानानां घटेतरभेदानामनुयोगिस्वरूपतया तत्तत्प्रतियोगिज्ञानसापेक्षत्वं घटप्रत्यक्षस्यापतितं स्यात्। तथा च सति घटप्रत्यक्षा-सम्भवः।

---

१. तत्त्वप्रदीपिकायाम्—द्वि० प० का०–२।

उक्तं च—

सापेक्षत्वात् सावधेश्च तत्तेऽद्वैतप्रसङ्गतः।
एकाभावादसन्देहान् न रूपं वस्तुनो भिदा[1] ॥ इति ।

४७. अभावस्य भावस्वरूपत्वखण्डनम्

वस्तुतस्तु स्वतो न्यूनपरिमाणेनाधिकपरिमाणेन च सहैकद्रव्ये समवायविरोधि यद् धर्मद्वयं दीर्घत्व-ह्रस्वत्वात्मकं वस्तुनः प्रादेशमात्रपरिमाणस्य तदविशिष्टतया प्रतीतावेव प्रतियोग्यपेक्षा वर्त्तते, न स्वरूपमात्रप्रतीतावपि तथाविधापेक्षाऽऽनुभविकी। अतो भेदस्य वस्तुस्वरूपत्वं न युक्तिसिद्धम्।

नन्वस्मादयं भिन्न इति प्रतीत्या प्रतियोगिघटिततयाऽऽनुभविको भेदो वस्तुस्वरूपं स्यातिति चेत्, तत्रोच्यते—भेदस्य वस्तुस्वरूपेऽन्तर्भावाद् भेदस्याभावत्वं नैव स्यात्। न हि घटादीनामभावरूपताऽऽनुभविकी, भावो घटो न अभाव इत्यबाधितप्रत्ययबलाद् भावत्वावच्छिन्नतयैव घटादेः प्रतीतेरभावस्य तदनतिरिक्तत्वे तस्यापि भावत्वप्रसंगाद् अभाव एव लुप्येत। अतोऽन्योन्याभावो न प्रमाणसिद्धः। तस्मात् पटतादात्म्यनिषेधो घटे केनापि प्रमाणेन नैव सिध्यतीति पूर्वपक्षः।

४८. नैयायिकैरन्योन्याभावस्थापने वेदान्तमतखण्डनम्

अत्रेदमुच्यते नैयायिकैः—तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वमन्योन्याभावत्वमित्येवं लक्षणं ग्राह्यम्। तादात्म्यं च तद्गतोऽसाधारणो धर्मः। अतस्तादात्म्यत्वेन तादात्म्यावच्छिन्नं यत् तादात्म्यं तत्सम्बन्धावच्छिन्नं प्रतियोगिताकत्वमभावस्य विवक्षणीयम्। अत्र तादात्म्यमभावलक्षणे संसर्गविधया प्रविष्टम्। तथा च तादात्म्यत्वावच्छिन्नतादात्म्यनिष्ठा या संसर्गविधयाऽवच्छेदकता, तन्निरूपकप्रतियोगिताकत्वलाभेन न कोऽपि दोषः।

भूतले 'घटो नास्ति' इत्याद्यत्यन्ताभावीयप्रतियोगिता तु संयोगसम्बन्धावच्छिन्ना। अतोऽत्यन्ताभावप्रतियोगितावच्छेदकसंयोगादिसम्बन्धानां संयोगत्वादिनैवावच्छिन्नत्वाद् भूतले घटो नास्तीत्यादौ नान्योन्याभावलक्षणातिव्याप्तिः। तस्मात् प्रमितस्य पटत्वस्यैव घटे प्रतिषिध्यमाणत्वाद् अवच्छेदकसम्बन्धभिन्नतया 'घटे पटत्वं नास्ति' इत्यत्यन्ताभाववैलक्षण्यमन्योन्याभावस्य प्रसिद्धमेव।

४९. अन्योन्याभावात्यन्ताभावयोर्वैलक्षण्यम्

यदि पुनरत्यन्ताभावान्योन्याभावयोर्वैलक्षण्यं स्वरूपतो न भवेत्, तर्हि 'घटः पटो न' इत्यत्र यथा घटे पटत्वाभावः प्रतीयते, तथैव घटे घटत्वाभावोऽपि प्रतीयताम्,

---

१. तत्त्वप्रदीपिकायाम्—द्वि० परि०—कारिका—२।

यतः 'घटो न घटत्वम्' इति घटे घटत्वभेदः प्रसिद्ध एव। अयमेव घटत्वान्योन्याभावो यदि घटत्वात्यन्ताभावान्न विलक्षणः, तर्हि घटे घटत्वभेदस्य प्रतीयमानत्वेन घटे घटत्वात्यन्ताभावोऽपि प्रतीयताम्, तुल्ययोगक्षेमत्वात्। अतोऽनुभवबलादेवान्योन्याभावात्यन्ताभावयोर्वैलक्षण्यं स्वीकर्त्तव्यमेव। तच्च तादात्म्यसम्बन्धावच्छिन्नत्वद्वारेणैव सम्भवेत्, न त्वन्यथा। अतोऽनेनैव लक्षणेन निर्वाहे कृतं लक्षणान्तरचिन्तया।

एवं लक्षणेनान्योन्याभावे सिद्धे सति 'घटः पटो न' इत्यादौ वस्तुसंस्थानरूपभेदविशिष्टविषयत्वं प्रत्यक्षबलेनैव गृह्यत इति प्रत्यक्षसिद्धस्य भेदस्यापलापो न सम्भवति। यदि भेदो नैव सिध्यति, तर्हि सर्वेष्वनुभवेषु यत्किञ्चिदेकविषयत्वस्यैव सम्भवादत्र 'घटोऽस्ति', 'पटो नास्ति' इत्यादिविशिष्टविषया प्रतिपत्तिरवलुप्येत।

५०. अनुभववैलण्यादन्योन्याभावसिद्धिः

अपि च, यदि प्रत्यक्षेण भेदो नैव गृह्येत, तर्हि अश्वार्थी समीपगतात् महिषात् कथं निवर्तते? कथं वा तृष्णार्त्तो जलमेव गृह्णाति, वह्निं न गृह्णाति। अतः सिद्धं प्रत्यक्षेणैव संस्थानरूपवैलक्षण्यं दृष्ट्वा स्वाभिमतं गृह्णाति, प्रतिकूलाच्च निवर्तते। अपि च भेदस्य सर्वथाऽसत्त्वे सर्वास्वनुभूतिष्वेकं सन्मात्रमेव विषयतया स्वीकर्त्तव्यं स्यात्। तथा च सति यत्किञ्चिदनुभवानन्तरं सर्वेषां विषयाणां स्मरणं कथं न स्यात्? एवं भेदानङ्गीकारे अश्वे हस्तिनि चानुभवस्यैकरूपत्वाद् अश्वानन्तरं यथावस्थितस्य करिणः प्रत्यक्षमपि गृहीतग्राहितत्वात् प्रमाणं भवितुं नार्हति। अतः सर्वेषां व्यवहाराणां परिनिष्पत्तये प्रतिसंवेदनं तत्तद्विषयविशेषप्रकाशः स्वीकर्त्तव्य एव। तच्च भेदं विना न सिध्यति। तस्माद् वस्तुसंस्थानरूपविशिष्टविषयकत्वाद् अनुभवानां भेदः स्वीकर्त्तव्य एव।

अपि च, गौर्गवेतरभिन्ना सास्नादिमत्वादिति यथायथव्याप्तिपक्षधर्मतादिबलोपबृंहितस्यानुमानस्य कथङ्कारमनङ्गीकरणं स्यात्? अतो भेदः स्वीकर्त्तव्य एव, यतो भेदग्रहणेनैवाभेदबुद्धिर्निवर्त्तत इति सर्वैरेव स्वीकर्त्तव्यम्।

यच्च पुनरुक्तम्—भेदस्य धर्मिस्वरूपादिविकल्पः, तत्रेदमुच्यते—तत्तु भेदव्यवहारद्वारेणैव दुरुत्सारितम्, यतो हानोपादानरूपस्य व्यवहारस्य प्रत्यक्षानुमानादिसिद्धतया तत्र धर्मस्वरूपो भेदः[1] प्रत्यक्षबलेनैव गृहीत इति न तत्र धर्मभूतेन भेदेन धर्मिभूतस्य वस्तुनो भेदादिविचारावकाशः, यतो भेदो यदि धर्मिस्वरूप एव स्यात्, तदा धर्मिज्ञानस्य प्रतियोगिनिरपेक्षतया धर्मिग्राहकसामग्रीग्राह्यत्वं भेदस्यापीति तत्र प्रतियोगिज्ञानस्य नापेक्षा वर्त्तते।

---

१. अभावस्यानुपलब्धिप्रमाणगम्यत्वमङ्गीकुर्वतां वैदान्तिकानां मते भेदो न प्रत्यक्षसिद्धः; किन्त्वनुपलब्धिप्रमाणमनङ्गीकुर्वतां नैयायिकानां मते चक्षुःसंयुक्तविशेष्यतानिरूपितसन्निकर्षेण घटानुयोगिकपटभेदस्य प्रत्यक्षग्राह्यत्वं सम्भवेदित्यभिप्रायः।

वस्तुतस्त्वयं गौः अश्वाद् भिन्न इत्यादिशब्दव्यवहारस्थल एव प्रतियोगिज्ञानमावश्यकम्। अतस्तथाविधशाब्दव्यवहार एव प्रतियोगिज्ञानसापेक्षः, वस्तुनिष्ठस्य भेदस्य प्रतीतिस्तु प्रतियोगिनिरपेक्षैव। अतः शाब्दव्यवहारविषये प्रतियोगिसापेक्षत्वस्य 'दाराः', 'कलत्रम्', 'आपः' इत्यादिषु स्त्रीत्वनपुंसकत्वबहुत्वादिवच्छब्दस्वभावायत्तत्वाद् न तत्र भेदरूपस्यार्थस्य दूषणं सम्भवेत्। केवलं व्यावृत्त्यादिशब्दप्रयोगेष्वेव प्रतियोगिसापेक्षत्वदर्शनात्। घटनिष्ठपटभेदस्य प्रत्यक्षं तु घटादिवस्तुस्वरूपायत्तत्वाद् न तत्र प्रत्यक्षं प्रति प्रतियोगिज्ञानापेक्षा। अतः सर्वत्रैव हानोपादानादिहेतुत्वात् तत्राशङ्किताया अनवस्थाया अपि नावकाशः।

इदमत्र तात्पर्यम्—प्रत्यक्षं तावद् इदमस्माद् भिन्नमिति नीलपीतादेर्भेदं साधयति। अतः सर्वत्रैव प्रथमं सर्वतो विलक्षणतया वस्तुस्वरूपे ज्ञायमाने प्रतियोग्यपेक्षया विशिष्टव्यवहारोपपत्तिः। तथा हि यथा घटप्रतीतिरन्यस्माद् घट इति न प्रतियोगिसापेक्षा, तथाऽन्यस्माद् भेद इत्येवं सापेक्षापि भेदप्रतीतिर्न भवेत्। लोके हि नियमेन सापेक्षैव भेदप्रतीतिर्दृश्यते।

५१. भेदप्रकारकबुद्धेर्विशिष्टवैशिष्ट्यावगाहित्वेन विशेषणतावच्छेदकविशेषणज्ञानहेतुकत्वमिति भेदप्रकारकबुद्धौ प्रतियोगिज्ञानसापेक्षत्वाशङ्का, तत्र नैयायिकानामुत्तरम्

ननु 'पटभिन्नो घटः' इत्यत्र घटविशेष्यकपटभेदप्रकारकप्रतीतिस्तु विशिष्टविषयिणी। एतादृशविशिष्टज्ञानस्य सप्रतियोगिकत्वात् तद्ज्ञानस्य प्रतियोगिस्वरूपं ज्ञानमपेक्षितमिति विशिष्टप्रतिपत्तेः प्रतियोगिज्ञानसापेक्षत्वं स्वीकर्त्तव्यमेव। अतो घटस्वरूपस्य घटेतरव्यावृत्तविषयतया घटेतरज्ञानमशक्यसाधनमिति चेत्, तत्रोच्यते—प्रतियोगिज्ञानापेक्षा नाम किं विशिष्टज्ञाने प्रतियोग्यवभासनियम आहोस्वित् तत्तद्ज्ञानस्य विशिष्टज्ञानहेतुत्वम्। तत्र प्रथममभ्युपगच्छामः। घटेतरत्वावच्छिन्नरूपेण घटेतरज्ञानं सुलभमेव। यत्र तु तत्तद्विशिष्टधर्मावच्छिन्नप्रतियोगिकभेदो ग्राह्यो भवेत्, तत्रैव तथाविधधर्मावच्छिन्नप्रतियोगिज्ञानमपेक्ष्यते। अत एव पटत्वावच्छिन्नपटमजानता 'पटभिन्नो घट' इत्येवं नैव ज्ञायते।

यदि पुनस्तत्तद्ज्ञानस्य विशिष्टज्ञानहेतुत्वमुच्येत, तत्रेदं पृच्छ्यते— तत्तत्प्रतियोगिनः पदार्था मिथो व्यावृत्ततया प्रथमं गृहीता न वा ? नो चेद् अव्यावृत्ततया गृहीतानां पूर्वोत्तरवर्त्तिनीनां दीपशिखानामिव विशेषणविशेष्यभावप्रतियोगिताप्रतीतिर्नोपपद्येत।

अथ यदि व्यावृत्ततया गृहीतास्तदैवं विचारणीयम्—किं विशेष्यविशेषणभावेन व्यावृत्तिरथवा स्वरूपतः गृहीतानां व्यावृत्तिः ? तत्र प्रथमे कल्पे विशेष्यविशेषणभावज्ञानस्यावश्यकतया तत्रैव भेदज्ञानं प्रसिद्धं वर्त्तते। द्वयोर्वस्तुनोर्भेदज्ञानं विना

विशेष्यविशेषणभावासम्भवात्, यतो भिन्नप्रवृत्तिनिमित्तानां शब्दानां तुल्याधिकरणतयाऽर्थज्ञानमेव विशेष्यविशेषणभावे तन्त्रम्। नीलोत्पलशब्दयोर्भिन्नप्रवृत्तिनिमित्तत्वमजानता पुरुषेण नीलोत्पलमिति व्यवहारसम्भवात्, यतस्तत्रोत्पलशब्दार्थस्य नीलशब्दप्रवृत्तिविषयत्वेन प्रयुञ्जानस्य रक्ताद्युत्पलेभ्यो विवक्षितस्योत्पलस्य भेद एव विवक्षणीयः। अत उत्पलमेकं वस्तु, नीलशब्देन चोत्पलातिरिक्तं गुणादिकं बुध्यते।

५२. विशेष्यविशेषणभावज्ञानं भेदज्ञानसापेक्षम्

अत्र च पुनर्नीलशब्दप्रवृत्तिनिमित्तीभूते नीलगुण उत्पलेन सहाभिन्नतया प्रतीयते। अतोऽन्येभ्य उत्पलेभ्यो वैलक्षण्यमस्योत्पलस्य वर्तत इत्येवं बोधयितुकामो नीलोत्पलमिति समभिव्याहरति, अतो विशेष्यविशेषणभावज्ञानं भेदज्ञानं विना नैव सम्भवेत्।

ननु वस्तुसामर्थ्यात् तत्र विशेष्यविशेषणभावः प्रतीयते, न तत्र भेदज्ञानमपेक्षणीयमिति चेत्, तत्रेदमुच्यते—वस्तुस्वभावस्य विशेष्यविशेषणभावनियामकत्वे तेनैव विशिष्टप्रतीतिसम्भवाद् विशिष्टबुद्धयैव वस्तुस्वभावस्य हेतुत्वं भवतापि दृष्टम्। वस्तूनां स्वभावश्च पुनर्न केवलं सन्मात्रम्, अपि त्वितरव्यावृत्तधर्मावलीढरूपम्।

५३. वस्तुस्वरूपज्ञानमितरव्यावृत्तरूपम्

यदि सन्मात्रमेव वस्तुस्वभावः स्यात्, तर्हि असद्व्यावृत्तानां सर्वेषां सत्त्वेनैक्याद् व्यवहारसिद्धवस्तुस्वभावो विलुप्यते। न हि वह्निजलयोरश्वमहिषयोर्वा सत्त्वेनैवैकत्वं सम्भवेत्। तत्तद्भिन्नार्थक्रियाकारित्वस्य सर्वप्रत्यक्षसिद्धस्यापलपितुमशक्यत्वात्। अतो वस्तुस्वभावस्य व्यावृत्तस्वरूपत्वमकामेनापि भवद्भिरिष्टम्, अन्यथा सुखदुःखयोर्बन्धमोक्षयोश्च सत्त्वेनैकरूपतया दुःखप्रहाणार्थं निःश्रेयसाधिगमनार्थं वा भवतामपि प्रयत्नो विफल एव स्यात्। अतो वस्तुस्वभावो व्यावृत्तगर्भित इति भेदज्ञानं सर्वत्रावश्यकम्। तच्च भेदज्ञानं यथा सम्भवेत्, तत्तु प्रागेवोक्तम्। नित्यसंसर्गाभावत्वमत्यन्ताभावमिति प्रागेव लक्षणं निरूपितम्। तत्रात्यन्ताभावस्य नित्यत्वे युक्तिरप्युपलभ्यते।

तथा हि ध्वंसप्रागभावाप्रतियोगित्वं नित्यत्वम्। ध्वंसाभावस्याप्रतियोगित्वे सति प्रागभावस्याप्रतियोगित्वं नित्यत्वमिति तात्पर्यम्। तत्र सावयवानां द्रव्याणामेव द्रव्येषूत्पत्तिर्विनाशश्च वर्त्तेते। अतोऽभावस्य द्रव्यत्वाभावाद् निरवयवत्वाच्च न द्रव्योत्पत्तिविधयोत्पत्तिः सम्भवतीति प्रागभावत्वमत्यन्ताभावस्य नैव सम्भवति। अभावस्य गुणकर्मभिन्नत्वं च प्रतीतिसिद्धम्, युक्तिसिद्धं च। अत एव गुणकर्मवदपि नाभावस्योत्पत्तिः सम्भवेत्। अतः सावयवद्रव्यत्वाभावाद् गुणत्वाभावात् कर्मत्वाभावाच्चात्यन्ताभावस्य नोत्पत्तिः कल्पयितुं शक्यते। सावयवानां द्रव्याणां गुणानां कर्मणाञ्च विनाशसम्भवाद् ध्वंसाभावो जायते। अतः प्रतियोगिनाश एव ध्वंसप्रतिपत्तिकरः।

५४. अत्यन्ताभावस्य नित्यत्वादिव्यवस्थापनम्

अत्यन्ताभावस्तु न कस्यचिद् विनाशेनोत्पद्यते, यतः 'इह घटो नास्ति' इति किञ्चिदधिकरणकघटाभावप्रतीतिरेव घटात्यन्ताभावमवगाहते। तत्तु घटस्य विद्यमान-दशायामपि घटानधिकरणप्रदेशे सम्भवत्येव, न तु घटस्य विद्यमानदशायां घटप्रागभावो घटध्वंसाभावो वा सम्भवेत्। अतः प्रागभावध्वंसाभावाभ्यां भिन्न एवात्यन्ता-भावस्त्रैकालिकः प्रतीयमानः सिध्यतीति ध्वंसप्रागभावयोरप्रतियोगित्वान्नित्य एवात्यन्ताभावः।

५५. उत्पादविनाशशालिनश्चतुर्थसंसर्गाभावस्य विचारपूर्वकखण्डनम्

ननु यस्मिन् भूतलादावधिकरणे घटानुपलम्भदशायां घटो नास्तीति प्रतीयते, प्रतीयमानस्य तदभावस्यात्यन्ताभावत्वं स्वीकृतम्। किन्तु तस्मिन्नेवाधिकरणे यदि घट अनीतो भवेत्, तदा तत्र 'घटो नास्ति' इति प्रतीतिर्न भवति, अपि तु घटवति भूतले घटाभावो नास्तीत्येवं प्रतीतिर्जायते। पुनश्च तस्मात् प्रदेशादपसारिते घटे तत्र घटो नास्तीति प्रतीतिरबाधिता जायते। तथा च सति तत्रेदमुपलभ्यते यद् घटानधि-करणप्रदेशे घटानयनात् पूर्वम् 'इह घटो नास्ति' इति प्रतीतिसिद्धो घटात्यन्ताभाव एव वर्त्तते। पुनश्च आनीते घटे तत्र घटाभावो नास्तीति प्रतीतिबलाद् घटाभावस्याभाव एव प्रतीयते। पुनश्च तस्मादेवापसारिते घटे 'घटो नास्ति' इति घटात्यन्ताभावः प्रतीयते। तेन च पूर्वमवस्थितस्य घटात्यन्ताभावस्य घटानयनेन विनाशः, तथा घटापसरणे च पुनर्घटो नास्तीति प्रतीत्या तत्रैव घटात्यन्ताभावस्योत्पत्तिरप्यनुभवसिद्धा।

एवं च सति घटात्यन्ताभावस्योत्पत्तिविनाशयोरानुभविकत्वाद् घटात्यन्ताभावो नित्य इति वक्तुं नैव शक्यतेति चेत्, तत्रोच्यते—यस्मिन् काले यस्मिश्च प्रदेशे घटो वर्त्तते, तस्मिन्नेव काले प्रदेशान्तरे घटात्यन्ताभावः प्रतीयत इति सर्वैरनुभूयते। यदि घटसत्त्वे घटाभावव्यक्तेर्विनाश एवाङ्गीक्रियते, तर्हि प्रदेशान्तरे तदानीमेव घटा-भावः कथं प्रतीयते? न ह्याकाशकुसुमवदसतः कस्यचिद् वस्तुनः कुत्रचिद् कदाचित् प्रतीतिः सम्भवेत्। अतस्तद्घटसत्त्वेऽपि प्रदेशान्तरे तदानीमेव तद्घटाभाव-प्रतीतेरानुभविकत्वात् तदानीं तद्घटाभावो नासन्।

एवं विनष्टस्यापि कुत्रचिदप्रतीतेर्घटाभावस्य तदानीमपि प्रतीयमानत्वाद् घटाभावो न विनष्टः। एवं च सति सतोऽविनष्टस्य च घटाभावस्य विद्यमानत्वं स्वीकर्त्तव्यमेव। एवमधिकरणभेदेनाभावस्य भेदानभ्युपगमादन्यत्र विद्यमानस्य घटा-भावस्य नित्यत्वेन घटाधिकरणावस्थानमपि स्वीकर्त्तव्यमेव[1]।

---

१. 'कर्मादौ संयोगाद्यभावस्य भिन्नत्वे मानाभावात्'

(व्याप्तिपञ्चकतृतीयलक्षणदीधितिः—पृ० ५६)।

अतो घटाभावस्य विनाशाभावात् सर्वदैवावस्थानाच्च तस्य नित्यत्वं व्याहन्तुं न शक्येत। नन्वेवमपि घटात्यन्ताभावस्य नित्यत्वे घटानयनात् पूर्वं कस्मिंश्चित् प्रदेशे विद्यमानस्य घटाभावस्य तत्रैव घटानयनानन्तरमप्यवस्थानध्रौव्यात् कथं न तदानीमपि इह घटो नास्तीति प्रतीतिः स्यादिति चेत्, पूर्वं दत्तोत्तरमपि पुनरिदं प्रतिपक्षखण्डनार्थं व्यपदिश्यते।

सर्वत्रैवैन्द्रियिकप्रत्यक्षं प्रति तत्प्रत्यक्षप्रतिबन्धकाभावविशिष्टसामग्रीत्वेन कारणत्वं स्वीकर्त्तव्यम्। अत एव दूरत्वादिप्रतिबन्धकदशायां चाक्षुषप्रत्यक्षकारणसत्त्वेऽपि महाकाशे उड्डीयमानानां विहगादीनां न प्रत्यक्षम्। अतो घटवति भूतले घटाभाव-प्रतीतिप्रतिबन्धकीभूतस्य प्रतियोगिनो घटस्योपलम्भान्न विद्यमानस्यापि घटाभावस्य चाक्षुषप्रत्यक्षम्। अत एव प्रतियोग्युपलम्भाभावोऽभावप्रत्यक्षे कारणमिति पूर्वमेव न्यायसिद्धान्तः प्रपञ्चितः।

किं बहुना—घटवति भूतले तदानीं घटात्यन्ताभावाप्रतीतावपि तस्मिन् घटे घटात्यन्ताभावोऽनुभूयते। अतस्तदानीं तस्मिन्नेव देशे भूतलादौ घटात्यन्ताभावा-प्रतीतावपि घटे घटात्यन्ताभावस्य प्रतीतिसिद्धत्वात् कथङ्कारं घटाभावस्यानित्यत्वमा-शङ्क्येत? यद्यधिकरणभेदेनाभावा भिन्नाः स्युः, तदैव भवत्पक्षः कथञ्चिद् ग्राह्यो भवेत्। तथा सति घटप्रतियोगिकात्यन्ताभावस्यानन्ताधिकरणभेदेनानन्त्याद् महागौरवम्।

नन्वेवमपि यत्र घटानधिकरणे घटादिकमानीतम्, पुनरपसारितं च तत्र नित्य-घटात्यन्ताभावकल्पनापेक्षयोत्पादविनाशशाली चतुर्थः कश्चित् संसर्गाभावः स्वीक्रिय-ताम्, प्रतियोग्युपलम्भाभावादिकल्पनापेक्षयाऽभावान्तरकल्पनमेव लाघवमिति चेत्, तत्रोच्यते—'इदानीं घटो नास्ति' इत्यादिप्रतीतेरानुभविकत्वेन कालविशेषविशिष्ट-स्वरूपस्य घटाभावप्रत्यक्षोपयोगिसंसर्गत्वोपगमाद् 'घटवति घटो नास्ति' इति प्रतीति-र्नैव भवितुमर्हति, तत्कालस्य घटाभावसंसर्गत्वाभावात्। अतश्चतुर्थस्याभावस्य कल्पनमेव गौरवम्।

५६. अत्यन्ताभावशब्दस्य कालत्रयावच्छिन्नप्रतियोगिताकाभावत्वमर्थो न वेति विचारः

अत्र पुनरिदं विचार्यते—अभावस्यात्यन्तेति विशेषणेनैवमर्थः प्रतीयते यद् यत्र कालत्रयेऽपि यद्वस्तु नास्ति, तत्रैव तद्वस्तूनामत्यन्ताभावः स्थातुं शक्नुयात्। एवं च सति समवायिकारणे कार्यभूतस्य वस्तुनोऽत्यन्ताभावो न सम्भवति, यतः कार्यस्य त्रिविधा दशा समवायिकारणेऽनुभूयते। कार्योत्पत्तेः पूर्वं कार्यस्य प्रागभाव एव तत्रानुभवसिद्धः। इह 'कपाले घटो भविष्यति' इति प्रत्ययात् तत्र प्रतीयमाने

घटप्रागभाव एव समुचितः। एवं घटध्वंसानन्तरमपीह 'कपाले घटो ध्वस्तः' इति प्रतीत्या ध्वंस एव तत्र युक्तिसिद्धः। ध्वंसप्रागभावयोरन्तराले घट एव कपाले समवायेन तिष्ठतीति तदानीं तत्र घटाभावप्रतीतेर्वार्त्तैव नास्ति। अतो यत्र कदाचिदपि घटो नोत्पद्यते ध्वंसप्रागभावयोरनधिकरणे तस्मिन् घटात्यन्ताभावः स्वीकर्त्तव्यः।

५७. ध्वंसप्रागभावाभ्यामत्यन्ताभावस्य विरोध इति प्राचीनमतपरीक्षणम्

अत एव 'श्यामपटे रक्तं नास्ति', 'रक्तघटे च श्यामो नास्ति' इति प्रतीत्योः रक्तप्रागभावश्यामध्वंसावेव विषयौ। तेन च ध्वंसप्रागभावयोरधिकरणे नात्यन्ताभाव इति प्राचीनसिद्धान्तोऽपि समर्थितो भवेत्। अतो वाय्वादौ रूपाद्यभाव एवात्यन्ताभावोदाहरणम्। न त्विह 'कपाले घटो नास्ति' इति घटात्यन्ताभावप्रदर्शनं संगच्छते।

नव्यास्तु तद्ध्वंसतत्प्रागभावयोरधिकरणे तदत्यन्ताभावसत्त्वे न कोऽपि विरोधः प्रमाणाभावादिति मन्यन्ते। अत्रायमाशयः—समवायिकारण एव कार्यस्योत्पत्तेः पूर्वं प्रागभावः, तथा विनाशान्तरं च ध्वंसाभावो वर्त्तत इति पूर्वपक्षिभिरपि स्वीकृतम्। समवायिकारणं विहाय नान्यत्र कार्यस्य प्रागभावो वा ध्वंसाभावो वा स्थातुं शक्नोति। एवं कार्योत्पत्तिदशायां समवायिकारणे कार्यमेव वर्त्तते इत्यत्राप्यविवादः। अतस्त्रैकालिकसंसर्गाभाव एवात्यन्ताभाव इति स्वीकरणात् कार्यवर्त्तमानदशायां समवायिकारणे कार्यस्य नात्यन्ताभाव इति सिद्धान्तात् समवायिकारणे कार्यस्य त्रैकालिकसंसर्गाभावो नास्तीत्येवं वक्तुं शक्यते। किन्त्वत्यन्ताभावस्य प्रतियोगिता सामान्यधर्मावच्छिन्नैव भवति।

तथा च 'घटो नास्ति' इत्यत्र घटत्वावच्छिन्नप्रतियोगिताकोऽभावो बुध्यते। अत उत्पत्तिपूर्वमिह 'कपाले घटो नास्ति' इति प्रतीतिर्घटत्वावच्छिन्नप्रतियोगिताकाभावमवगाहते। 'घटो भविष्यति' इत्यादौ तु न घटत्वसामान्यधर्मावच्छिन्नप्रतियोगिता अभावांशे भासते, किन्तु सम्भाव्यमानतद्घटत्वावच्छिन्नप्रतियोगिताकत्वेनैवाभावस्तत्र भासते। अन्येषां घटानां तत्र समवायिकारणे कपाले उत्पत्तेरसम्भवान्न तत्र घटत्वावच्छिन्नप्रतियोगिताकत्वं प्रागभावांशे भासते। एवं ध्वंसाभावेऽपि बोध्यम्।

अपि च यत्र कश्चिद् घटः पूर्वं रक्तः, ततः श्यामः, ततो रक्तः, ततः श्यामः, ततश्च रक्तः, तस्मिन् घटे मध्यश्यामदशायां रक्तं रूपं नास्तीत्याकारको यो रक्ताभावावगाही प्रत्ययः, स न रक्तिमध्वंसावगाही भवितुमर्हति, यतस्तत्र रक्तत्वसामान्यधर्मावच्छिन्नप्रतियोगिताकत्वमेवाभावांशे भासते। ध्वंसप्रागभावयोस्तु न सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वं युक्तिसिद्धम्। अतस्तथाविधमध्यश्यामदशायां रक्तं नास्तीति प्रतीतेरत्यन्ताभावावगाहित्वं स्वीकर्त्तव्यम्।

उक्तं च दिनकर्याम्—'पूर्वमग्रेऽपि रक्ते मध्ये श्यामे घटे रक्तं रूपं नास्ति इत्याद्याकारकप्रत्ययस्य सामान्याभावावगाहित्वात्' व्याख्यातं च रामरुद्रीकारेण—'सामान्यधर्मावच्छिन्नप्रतियोगिताकाभावविषयकत्वादित्यर्थः, ध्वंसप्रागभावयोश्च सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वानङ्गीकारात्'[1] इति। तस्माद् ध्वंसप्रागभाव-योरधिकरणेऽप्यन्ताभावसत्त्वे न कोऽपि विरोध इति स्वीकर्त्तव्यम्। अन्यथा पूर्वो-दाहृतस्थले 'रक्तं रूपं नास्ति' इत्यस्य रक्तरूपत्वावच्छिन्नप्रतियोगिताकाभावस्य रक्तप्रागभावत्वेन ग्रहणासम्भवात् तत्र 'रक्तं रूपं नास्ति' इति प्रतीतेरनुपपत्तिः। कार्यस्य वर्त्तमानतादशायां तदत्यन्ताभावस्तत्र समवायिकारणे वर्त्तत एव, अत्यन्ता-भावस्यनित्यत्वोपगमात्; किन्तु कार्यसमानकालीनत्वघटितविशेषणताविशेषाख्य-सन्निकर्षस्यैव कार्यात्यन्ताभावप्रत्यक्षं प्रति हेतुत्वोपगमान्न कार्यदशायां तदत्यन्ता-भावप्रतीतिः। त्रैकालिकसंसर्गाभाव इति तु नाऽत्यन्ताभावलक्षणम्।

येषां मते समवायिकारणे कार्यमुत्पत्तेः प्रागपि सत्, तथा विनाशानन्तरमपि तस्यैव कार्यस्यावस्थान्तरेणावस्थानम्, तेषां मते त्रैकालिकसंसर्गाभाव इत्यत्यन्ता-भावलक्षणं विवक्षितम्। अत एव तेषां मते समवायिकारणे कदापि कार्यस्यासत्त्वा-भावान्न तत्र कार्यात्यन्ताभावः। अत एव समवायिकारणं विहायान्यत्र कार्यस्य सत्ताऽनङ्गीकारात् तत्रैव कार्यात्यन्ताभावः संगच्छते।

५८. सत्कार्यवादाङ्गीकार एव प्रागभावध्वंसाभावाभ्यामत्यन्ताभावविरोधः, न त्वसत्कार्यवादिनां नैयायिकानां मतेन

असत्कार्यवादिनां नैयायिकानां मते तु नायं पन्था इष्टः, यतः समवायिकारणे उत्पत्तेः पूर्वं विनाशादूर्ध्वं च कार्यस्यासत्त्वमेव नैयायिकैरङ्गीकृतम्। अतस्तथा-विधदशायां कार्यात्यन्ताभावस्वीकारे न कापि बाधा संगच्छते।

ननु पूर्वोदाहृतस्थले मध्यश्यामदशायां 'रक्तं रूपं नास्ति' इति प्रतीतेर्ध्वंस-प्रागभावावगाहित्वं ध्वंसप्रागभावयोः सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वानङ्गी-काराद् यदुक्तम्, तन्न संगच्छते, यतो रक्तत्वावच्छिन्नप्रतियोगिताकत्वं ध्वंसप्राग-भावयोः कालिकाव्याप्यवृत्तिः स्वीकर्त्तव्या। अतोऽन्तरा 'श्यामे रक्तं रूपं नास्ति' इति प्रत्ययो यदा भवति, तदा ध्वंसप्रागभावयोः सामान्यधर्मावच्छिन्नप्रतियोगिता-कत्वमेव स्वीकर्त्तव्यम्, न तु तत्र रक्तरूपात्यन्ताभावस्वीकारे किञ्चित् प्रयोजनम्। यदा तु 'श्यामघटे रक्तं नास्ति', 'रक्तघटे वा श्यामं नास्ति' तदा सामान्यधर्माव-

---

१. दिनकरी—रामरुद्रीसहिते भाषापरिच्छेदे—अभावकारिकायाम्।

च्छिन्नप्रतियोगिताकत्वानभ्युपगमः। अतो ध्वंसप्रागभावयोरपि समुदाहृतस्थले सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वसम्भवात् तत्रात्यन्ताभावस्वीकारो निरर्थकः।

एवं च सति ध्वंसप्रागभावयोरधिकरणे तदत्यन्ताभावस्वीकारो नावश्यक एवेति चेत् तत्रोच्यते—यदि ध्वंसप्रागभावयोः सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वं कालिकाव्याप्यवृत्तित्वेन स्वीक्रियते, तर्हि रक्तरूपोत्पत्तिध्वंसोत्पत्तिकालीनोत्पत्तिक-तत्समानाधिकरणवायुसंयोगादिध्वंसप्रागभावयोरपि विनिगमनाविरहेण रक्तरूपत्वा-वच्छिन्नप्रतियोगिताकत्वस्वीकारसम्भवात् तत्रापि रक्तत्वावच्छिन्नप्रतियोगिताकत्व-कल्पनापत्त्या गौरवं स्यात्।

यदि पुनर्ध्वंसप्रागभावयोः सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वं नाङ्गीक्रियते, तदा समुदाहृतस्थलेऽत्यन्ताभावस्वीकारेणैवोपपत्तिसम्भवाल्लाघवं स्यात्। अतः सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वं ध्वंसप्रागभावयोर्नेष्टम्। अतोऽन्तरा श्यामदशायां रक्तरूपध्वंसप्रागभावाधिकरणे घटे 'रक्तं रूपं नास्ति' इत्यादिप्रतीतेरत्यन्ताभावावगाहि-त्वमेव युक्तिसिद्धम्। अतो ध्वंसप्रागभावाभ्यामत्यन्ताभावस्य विरोधे न किञ्चिद् मानमस्ति।

अत्रेदमवधेयम्—यत्र यद्वस्तुनः सत्त्वं कदापि न वर्त्तते, तत्रैव तस्यात्यन्ता-भाव इत्येवं प्राचीनानामाशयः। अत एव समवायिकारणे कार्यस्योत्पत्तेः प्रागपि सत्त्वं यैः स्वीक्रियते, तन्मत एव प्रागभावाधिकरणेऽत्यन्ताभावो न तिष्ठतीति वक्तुं युक्तम्। अत एव नाशानन्तरमपि समवायिकारणे कार्यस्यात्यन्तासत्त्वं नास्ति इति सत्कार्य-वादिनां मतं यदि गृह्येत, तदैव प्रागभावध्वंसाधिकरणे नात्यन्ताभाव इति वक्तुं शक्यते।

असत्कार्यवादिनां नैयायिकानां नये तूत्पत्तेः 'प्राक्' विनाशानन्तरं च समवायि-कारणे कार्यस्यात्यन्तासत्वमेव सिद्धम्। अत एव प्रागभावकाले ध्वंसकाले च प्रागभाव-ध्वंसाभाववत् तत्तदधिकरणेऽत्यन्ताभावोऽपि स्थातुं शक्नुयात्। अतो न्यायमते प्राग-भावध्वंसाभावयोरधिकरणे तत्तदत्यन्ताभावोऽप्यविरुद्धतया तिष्ठत्येव। अविरोधश्च प्रागेव प्रदर्शितः।

उपसंहारः

एतावता प्रबन्धेनाभावपदार्थमधिकृत्य यथामति किञ्चिदुपस्थापितं तत्रभवतां निखिलशास्त्रतत्त्वाभिज्ञानां मान्यवराणां विदुषां पुरस्तात्। दुर्ज्ञेयतमेऽस्मिन् विषये कुशाग्रधियां नानाशास्त्रजटिलतत्त्वार्थविचारक्षमाणां विदुषामेवाधिकारः, न तु पुन-र्मादृशानां शास्त्रानभिज्ञानां क्षुद्रबुद्धीनां तदालोचनकौतूहलमपि समुचितम्; किन्तु नाना-

तत्त्वाभिज्ञैर्निखिलनिगमागमशास्त्रमहोदधिसमुद्धृतरत्नराजिभिर्मान्यमान्यै राचार्यप्रवरैरे-तद्विषये यादृशं निबन्धादिकं विरचितम्, तेनैव यथा 'मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः' इति महाकविवाक्यार्थालोचनेन प्राप्तसाहसः क्षुद्रबुद्धिरपि किञ्चिद् जिगमिषुर्मं-हृति कर्मणि प्रवृत्तोऽहम्। विशेषतोऽस्मद्गुरुवर्याणां नानाशास्त्रनिष्णातानां सदयमुप-देशेनोत्साहप्रदानेन च समाश्वस्तो निबन्धरचने साहसं प्राप्तवानहम्। तद् यात्वात्म-दोषादिप्रकाशनेन। इतः पूर्वं यत् किञ्चिदालोचितम्, तदेव वाजिनेभ्य आमिक्षामिव किञ्चिदुद्धृत्य संक्षेपत इह समुपस्थाप्य प्रबन्धस्योपसंहारः क्रियते।

तत्रादौ प्रथमेऽध्यायेऽभावचिन्तने बीजं किञ्चिदालोचितम्। अभावाख्यस्य पदार्थस्य कैश्चित् शास्त्रकृद्भिः स्वातन्त्र्यं यद्यपि नाङ्गीकृतम्, तथापि नैयायिका-दिभिर्महता विचारेण सप्रयोजनमभावस्य स्वातन्त्र्यं समुपपादितम्। दुःखात्यन्तध्वंस-रूपस्यापवर्गस्य शास्त्रैकलक्ष्यस्याभावं विना नानुपपत्तिरिति न्यायादिशास्त्रेष्वभाव-पदार्थस्वीकारे महत् प्रयोजनं वर्त्तते। न केवलं शास्त्रकृत्येषु, लौकिकव्यवहारेष्वपीद-मिह नास्ति, इदमिदं न भवतीत्याद्यानुभविकव्यवहारप्रयोजकाभावपदार्थः केनाप्य-नङ्गीकर्त्तुं न शक्यते। तादृश्याः प्रतीतेरभावस्वातन्त्र्यं विनाप्यधिकरणादिस्वरूपेण समुपपत्तिमभिलषतां तेषां तेषां शास्त्रकृतां सिद्धान्तस्य नैयायिकमतमाश्रित्य निरसन-पद्धतिरपि यथामति किञ्चित् प्रपञ्चिता।

एवमभावस्य सप्रयोजनत्वं प्रतिपाद्याभावशब्दार्थविचार उपस्थापितः। तत्र चाभावत्वं सर्वाभावशब्दप्रतिपाद्यशक्यतावच्छेदकं भवितुमर्हति न वेति विचारणायां श्रीमद्दीधितिकृतां तथा नैयायिककुलचूडामणीनां गादाधरभट्टाचार्याणां सिद्धान्त-माश्रित्य विचार उपस्थापितः।

एवमभावशब्दस्य प्रतिपाद्यार्थनिर्धारणानन्तरं द्वितीयेऽध्यायेऽभावस्वातन्त्र्य-विचारो वादिप्रतिवादिपक्षसमालोचनेन नैयायिकमतमाश्रित्याभावस्य स्वातन्त्र्यविषये सिद्धान्तः प्रदर्शितः। अथ तृतीयेऽध्यायेऽभावलक्षणं यथामति किञ्चित् प्रतिपादितम्। तत्र चाभावस्य भावभिन्नत्वादिरूपेण लक्षणं विविधदोषग्रस्तमिति वैदान्तिकादिमतोद्-भावितं पूर्वपक्षं निराकृत्य नैयायिकमतेन तल्लक्षणोपसंहारः समुपस्थापितः।

अथ चतुर्थेऽध्यायेऽभावविषये प्रमाणचिन्तनम्। तत्र चाभावस्येन्द्रियसन्निकर्षा-योग्यत्वेन प्रत्यक्षादिप्रमाणागोचरत्वमिच्छतां सुतरामेवानुपलब्धेः प्रमाणपदवीत्वं प्रति-पिपादयिषूणां मीमांसकादीनां मतं यथाशक्ति परीक्ष्याभावस्य प्रत्यक्षगोचरत्वं व्यवस्था-पितम्। तत्रैव चाभावज्ञानं व्यवहारप्रयोजकमपि नाभावस्य पृथक्पदार्थत्वमिति बौद्धानां विरुद्धानेकजटिलयुक्तीनां परिहारेण नैयायिकरीत्या बौद्धगतखण्डनं तथा जैनमतादीनां परीक्षणमपि कृतम्।

अथ पञ्चमेऽध्याये लक्षणप्रमाणाभ्यां प्रतिपादितस्याभावस्यावान्तरविभागः प्रदर्शितः। तत्र च जयन्तभट्टानां मते ध्वंसप्रागभावाभ्यां विनाऽभावान्तरं नास्तीति सिद्धान्तो यथामति समालोचितः, नैयायिकमतं च किञ्चिद् विचारपूर्वकं समुपन्यस्तम्। तत्रैव प्रसंगतोऽभावान्तरविभागप्रदर्शनवेलायां तत्तदवान्तरविभागप्रतिपन्नानां तेषां तेषामभावानां लक्षणादिकमपि संक्षेपत आलोचितम्।

एतावानेव मम प्रयासेऽल्पीयानपि विद्वत्समीपे समुपस्थाप्यते। तत्र च शास्त्रसिद्धान्तविषये समालोचनकाले मदीयबुद्धिमान्द्यात् क्वचित् किञ्चित् स्खलनादिकं सम्भवदपि यथाशक्ति मया तत् परीक्षितम्। तथापि यदि स्खलनं परिलक्ष्यते, तर्हि कृपया विज्ञापनेनानुग्राह्योऽयं जनः। यच्चैतस्मिन् निबन्धे किञ्चित् समुत्कृष्टं विद्वद्भिः परिलक्ष्यते, तत्तु महतां शास्त्रकृतां तथा मदीयगुरुवर्याणां चोपदेशगुरुत्वेनैव ग्राह्यम्। यच्च पुनः किञ्चिद् दोषदुष्टं परिलक्ष्यते, तत्तु मदीयबुद्धिजाड्यस्य फलमित्यलमतिविस्तरेण।

। इत्यभावविमर्शे पञ्चमोऽध्यायः।

॥ समाप्तश्चायमभावविमर्शाख्यो ग्रन्थः॥

ग्रन्थपञ्जी

ग्रन्थनाम	ग्रन्थकारनाम	प्रकाशनपरिचयः

१. न्यायदर्शनम् (भाष्यसमेतम्), गौतमः—फणिभूषणतर्कवागीशसम्पादितम् (२३२४ वंगाब्दे)।

२. सांख्यकारिका, ईश्वरकृष्णः—एस्० एस्० सूर्यनारायणशास्त्रिसम्पादितम् (१९३५ ख्रिस्ताब्दे)।

३. न्यायबिन्दुः (धर्मोत्तरटीकासमेतः), धर्मकीर्त्तिः—चन्द्रशेखरशास्त्रिसम्पादितम् (१९२४ ख्रिस्ताब्दे)।

४. न्यायकन्दली, श्रीधरभट्टः—क्षेत्रेशचट्टोपाध्यायसम्पादितम् (१९६३ ख्रिस्ताब्दे)।

५. न्यायवार्त्तिकम्, उद्द्योतकरः—अनन्तलालठाकुरः (१९६७ ख्रिस्ताब्दे)।

६. वैशेषिकदर्शनम्, कणादः—पण्डितदेवदत्तशर्मा (१९११ ख्रिस्ताब्दे)।

७. शब्दखण्डे नञ्वादः (तत्त्वचिन्तामणिः), रघुनाथशिरोमणिः—कामाख्यानाथतर्कवागीशः, एशियाटिक-सोसाइटी (१९०२ ख्रिस्ताब्दे)।

८. दीधितिसमेतं सिद्धान्तलक्षणम्, स्वामिदयानन्दः (१९७० ख्रिस्ताब्दे)।

९. दिनकरी-रामरुद्री-सहिता भाषापरिच्छेदसिद्धान्तमुक्तावली, विश्वनाथः—चौखम्बा-संस्कृत-सीरिज, वाराणसी।

१०. प्रकरणपञ्चिका, शालिकनाथः सं०—सुब्रह्मण्यशास्त्री (१९६२ ख्रिस्ताब्दे)।

११. शास्त्रदीपिका, पार्थसारथिमिश्रः—धर्मदत्तसुरी (निर्णयसागर १९१५ ख्रिस्ताब्दे।

१२. प्रशस्तपादभाष्यसेतुटीका, पद्मनाभमिश्रः—चौखम्बा-संस्कृत-सोरिज (१९४३ ख्रिस्ताब्दे)।

१३. श्लोकवार्त्तिकम्, कुमारिलभट्टः—रामस्वामिशास्त्री, त्रिवेन्द्रम (१९४३ ख्रिस्ताब्दे)।

१४. ज्ञानश्रीमित्र-निबन्धावली, ज्ञानश्रीमित्रः—अनन्तलालठाकुरः (१९५९ ख्रिस्ताब्दे)।

१५. तत्त्वप्रदीपिका, चित्सुखाचार्यः—उदासीनसंस्कृतविद्यालयः (१९५६ ख्रिस्ताब्दे)।

१६. शङ्करमिश्रकृत-कण्ठाभरणटीका समेता न्यायलीलावती, वल्लभाचार्यः—काशी चौखम्बा संस्कृत सीरिज (१९२४ ख्रिस्ताब्दे)।

१७. न्यायकुसुमाञ्जलिः, उदयनाचार्यः—सं० लक्ष्मणशास्त्री, चौखम्बा संस्कृत सीरिज (१९५४ ख्रिस्ताब्दे)।

१८. न्यायमञ्जरी, जयन्तभट्टः—पण्डितराजसूर्यनारायणशुक्लः (१९७१ ख्रिस्ताब्दे)।

१९. तत्त्वचिन्तामणिः (प्रत्यक्षखण्डम्), गङ्गेशोपाध्यायः–कामाख्यानाथतर्कवागीशः (१९०१ ख्रिस्ताब्दे)।

२०. शाबरभाष्यम्, शबरस्वामी–आनन्दाश्रममुद्रणालयः (१९२९ ख्रिस्ताब्दे)।

२१. वेदान्तपरिभाषा (अनन्तकृष्णशास्त्रिकृतटीकासहिता), धर्मराजाध्वरीन्द्रः–कलिकाताविश्वविद्यालयः (१९३२ ख्रिस्ताब्दे)।

२२. तत्त्वसंग्रहः, शान्तरक्षितः–गायकवाडसंस्थानम् (१९३७ ख्रिस्ताब्दे)।

२३. आत्मतत्त्वविवेकः, उदयनाचार्यः–चौखम्बा संस्कृत सीरिज (१९४० ख्रिस्ताब्दे)।

२४. प्रमेयकमलमार्त्तण्डः, प्रमाचन्द्राचार्यः–निर्णयसागरप्रेस (१९४१ ख्रिस्ताब्दे)।

२५. पातञ्जलदर्शनम्, पतञ्जलिः–रोहिणीकान्तसिद्धान्तवागीशः (१९२२ ख्रिस्ताब्दे)।

२६. आन् इन्ट्रोडक्शन टु इण्डियन फिलासफी, डाट्-चटर्जी–कलिकाताविश्वविद्यालयः (१९४४ ख्रिस्ताब्दे)।

२७. व्याप्तिपञ्चकम् (दीधिति-युक्तम्), गङ्गेशोपाध्यायः–रोजेन्द्रनाथघोषः (१३२२ वंगाब्दे)।

२८. सप्तपदार्थी, शिवादित्यः–डि० गुरुमूर्त्तिः–(१९३२ ख्रिस्ताब्दे)।

२९. वङ्गे नव्यन्यायचर्चा (वङ्गभाषायाम्), डॉ० दिनेशचन्द्रभट्टाचार्यः–वङ्गीयसाहित्य-परिषद् (१३५८ वंगाब्दे)।

३०. वेदान्तदर्शनेर इतिहास (वङ्गभाषायाम्), प्रज्ञानानन्दसरस्वती–वरिशाक्तशंकरमठ (१३३४ वंगाब्दे)।

३१. वेदान्तदर्शनम्–अद्वैतवादः प्रथमखण्डः (वङ्गभाषायाम्), डॉ० आशुतोषशास्त्री–कलिकाताविश्वविद्यालयः (१३६८ वंगाब्दे)।

३२. वेदान्तदर्शनम्–अद्वैतवादः द्वितीयखण्डः (वङ्गभाषायाम्), डॉ० आशुतोषशास्त्री–कलिकाताविश्वविद्यालयः (१३६८ वंगाब्दे)।

३३. वेदान्तदर्शनम्–अद्वैतवादः तृतीयखण्डः (वङ्गभाषायाम्), डॉ० आशुतोषशास्त्री–कलिकाताविश्वविद्यालयः (१३६८ वंगाब्दे)।

३४. न्यायप्रवेशः (वङ्गभाषायाम्), प्रमथतर्कभूषणः–राजेन्द्रनाथघोषः

३५. सिक्स ओयेज् आन नोर्थ (आंग्लभाषायाम्), डि० एम्० दत्तः–कलिकाताविश्व-विद्यालयः (१९६० ख्रिस्ताब्दे)।

३६. न्यायपरिचयः (वङ्गभाषायाम्), फणिभूषणतर्कवागीशः–वङ्गीयसाहित्यपरिषद् (१३४० वंगाब्दे)।

३७. कन्सेप्ट आव् रिलेशन एण्ड नेगेशन इन इण्डियन फिलासफी (आंग्लभाषायाम्), डॉ० कालिदासभट्टाचार्यः–कलिकातासंस्कृतकालेज, कलिकाता (१९७९ ख्रि०)।

३८. भारतीयदर्शनकोष, श्रीश्रीमोहनतर्कतीर्थः—कलिकातासंस्कृतकालेज (१९७९ ख्रिस्ताब्दे)।
३९. पदार्थतत्त्वनिरूपणम्, मधुसूदनन्यायाचार्यः—कलिकातासंस्कृतकालेज (१९७६ ख्रिस्ताब्दे)।
४०. अन्नम्भट्टकृततर्कसङ्ग्रहः (वङ्गभाषायां सम्पादितः), नारायणचन्द्र गोस्वामी—कलिकातासंस्कृतपुस्तकभाण्डार।
४१. हिस्ट्री आव् इण्डियन लाजिक (आंग्लभाषायाम्), एस्० सी० विद्याभूषणः—विश्वभारतीग्रन्थालयः (१३५३ वंगाब्दे)।
४२. न्यायदर्शनम् (वङ्गभाषायाम्), सुखमयभट्टाचार्यः—विश्वभारतीग्रन्थालयः (१३५३ वंगाब्दे)।
४३. स्टडीज़ इन न्यायवैशेषिक (आंग्लभाषायाम्), डॉ० गोपिकामोहनभट्टाचार्यः—कलिकातासंस्कृतकालेज (१९६२ ख्रिस्ताब्दे)।
४४. हिस्ट्री आव् इण्डियन फिलासफी (आंग्लभाषायाम्), डॉ० सुरेन्द्रनाथदासगुप्तः—केम्ब्रिजविश्वविद्यालयः (१९३२ ख्रिस्ताब्दे)।
४५. नव्यन्याय—डाक्ट्रिन आव् नेगेशन (आंग्लभाषायाम्), डॉ० वि० के० मतिलाल—हारवार्डविश्वविद्यालयः (१९६८ ख्रिस्ताब्दे)।
४६. नेगेशन, डॉ० जानकीवल्लभभट्टाचार्यः—इण्डियन स्टडीज पास्ट एण्ड प्रेजेन्ट (१९६५ ख्रिस्ताब्दे)।
४७. नव्यन्याय—सिस्टेम आव् लाजिक, डि० सि० गुहा—भारतीयविद्याप्रकाशन, वाराणसी।
४८. नव्यन्यायभाषाप्रदीपः, महामहोपाध्याय कालीपदतर्काचार्यः—कलिकाता-संस्कृत-कालेज (१९७३ ख्रिस्ताब्दे)।
४९. न्यायतात्पर्यटीका, वाचस्पतिमिश्रः—गङ्गाधरशास्त्री तैलङ्गः, वाराणसी (१८६८ ख्रिस्ताब्दे)।
५०. आन् इन्ट्रोडक्शन टु पूर्वमीमांसा, डॉ० पशुपतिनाथशास्त्री—संस्कृतपुस्तकभाण्डार (१९८० ख्रिस्ताब्दे)।

●●●